Digitized by the Internet Archive
in 2007 with funding from
Microsoft Corporation

http://www.archive.org/details/kamiraabdamr00isvauoft

NOTE.

(Preliminary.)

This edition of the Kaçmīraçabdāmṛta of Īçvara-kaula has been prepared from a single MS. which the Editor owes to the courtesy of Bābū Nīlāmbara Mukarji. The MS. was presented to that gentleman by the Author himself, and has been carefully revised by him in his own handwriting. It may therefore be taken as the Author's final statement of his views on Kāçmīrī Grammar. Considering the authoritative nature of the MS. the Editor has not felt justified in making any alterations when preparing it for the Press. All that he has done has been to correct obvious slips of the pen. In most cases, when the Author in the course of his revision, altered a rule, he carefully made the necessary corrections in other portions of the work to which the rule incidentally applied. Here and there he has omitted to do so, and the Editor has exercised his discretion in making the necessary corrections or not. When it has been merely a question of spelling, he has usually done so, so as to secure uniformity in this most important particular. In more serious points, even when the Author is clearly wrong, *e.g.*, when he marks the first उ *u* in गुर् *gur*[u], a horse, as modified when it is certainly not modified (thus, गुर् *gur*[u]), the Editor has left the text unaltered, and has contented himself with adding a footnote. Any additions made by the Editor, which are principally cross-references and a few rules added to make the work more accurate and more complete, are enclosed in square brackets. The reader can thus at once see what is the Author's and what is the Editor's.

Īçvara-kaula's work is a Grammar of the Kāçmīrī language written in Sanskrit, on the model of an ordinary *vyākaraṇa*. It is an excellent work, and might have been composed by Hēmacandra himself. Kāçmīrī is a language which is very little known, but which is of great importance for the purposes of comparative philology. Existing Grammars of it have been made by foreigners, and are imperfect. They all suffer from at least one grave fault, *viz.*, that they are based on the representation of the language which is displayed to them by the Persian alphabet, a system of characters which is quite unable to express the many broken vowel sounds in the language. Īçvara-kaula has adopted the Dēvanāgarī character, ingeniously modified to suit his purpose. With his system, there is no doubt, whatever, as to what is the exact sound of each word in the language. The phase

of the language which is illustrated by him is that spoken by Hindūs of the City of Çrīnagar. It differs slightly from the dialect used by Musalmāns and from that used in the rest of the valley. Former Grammars have been based on the Musalmān language, which is that used by 90 per cent. of the population of the Happy Valley. The Hindū dialect has, however, its value. It is the language of the educated ruling class, and its contamination with Persian has been prevented by a wholesome tradition, which had no hold on the Muḥammadan inhabitants. It is hence much the purest form of the tongue.

Īçvara-kaula is not always consistent in his spelling. At least in two cases, he represents the same sound by various modes of spelling. It is important to note these in order to understand his Grammar. In the first place, he treats ञ् *ñ* and ञ् *ñ*ᵘ as convertible terms. He nowhere says this, and unless the reader is forewarned he will find himself puzzled more than once. Thus on p. 14 he writes चामंञ् *tsāmaṇñ*ᵘ, but on p. 24 कृपरामंञ् *kṛpārāmaṇñ*, and again, on p. 103, he writes words like वञ् *waṇñ*, although he has, only a page or two back, said that these feminines must end in *ū-mātrā*, and we should hence except वञ् *waṇñ*ᵘ. In the second place, he is not consistent in his spelling of words which etymologically end in *i* followed by a consonant followed by *u-mātrā*. Take, for instance, the word कितु *kit*ᵘ. This is no doubt the correct etymological spelling, but the word is pronounced क्युत् *kyut*, and thus he occasionally writes similar words, as in the case of मंज़्युम् *maṇzyum*, on p. 64. He generally, however, spells it क्युतु *kyut*ᵘ, which is no doubt the best way of dealing with the problem; for to omit the *u-mātrā* would be to play havoc with all the Author's rules of declension. Sometimes Īçvara-kaula uses one system of spelling, and sometimes another, and, in this case, the Editor has not felt himself at liberty to choose only one method, as it would entail too free a treatment of the text.

The Editor had intended to prefix to the present instalment of the Grammar, an account of the rules of the Kāçmīrī language, as given by the Author; but an affection of the eyes has put a stop for the present to his studies, and he must postpone a formal introduction to the completion of the work. The part now issued takes the student down to the end of Declension. The work will be completed in one more instalment which will deal with the Verb. The Author commences his Grammar with a chapter on the rules of Sandhi or Combination of Vowels only. Then follows a chapter on Declension, divided into three sections, the first describing the declension of Nouns, Substantive and Adjective, the second the luxuriant varieties of the Vocative Case, and the third the declension of

Pronouns. We next have a short chapter on Concordance and Composition of Nouns, and a long one on Secondary Suffixes, or the Formation of Nouns and Adjectives from other nouns and adjectives. The first part, now issued, concludes with a chapter on Indeclinables and another on the Formation of Feminines. The second part will contain a *Dhātupāṭha*, a chapter on Conjugation, and a chapter on Primary Suffixes, or the formation of Substantives, Adjectives, and various Verbal Forms from Roots.

In default of an exposition of the peculiarities of Kāçmīrī pronunciation, which, for the reason above stated the Editor is unable at present to give, he would refer the reader to his article on the Kāçmīrī vowel system which has appeared in the *Journal* of the Bengal Asiatic Society for 1896, pp. 280 & ff. This will be found to give all the necessary information, and to explain the system of spelling adopted by Īçvara-kaula.

The Editor has read the Grammar carefully through with Paṇḍit Mukunda Rāma Çāstrī, a Kāçmīrī born and bred in Çrīnagar, who came down to Patna for the purpose. The Paṇḍit has also read the proof sheets with him and has elucidated many doubtful points. The Editor is glad to have an opportunity of acknowledging the assistance which he has received from so learned and intelligent a co-worker.

The printing, which was a more complicated business than ordinary, has been carried out at Patna, under the Editor's personal supervision, and his thanks are due to the printers, Babu Rām Dīn Singh and Babu Sāhib Prasād Singh for the care with which the work has been carried out.

BANKIPUR :
17*th March*, 1897.

Pronouns. We next have a short chapter on Concordance and Composition of Nouns, and a long one on Secondary Suffixes, or the Formation of Nouns and Adjectives from other nouns and adjectives. The first part, now issued, concludes with a chapter on Indeclinables and another on the Formation of Feminines. The second part will contain a *Dhâtupâṭha*, a chapter on Conjugation, and a chapter on Primary Suffixes, or the formation of Substantives, Adjectives, and various Verbal Forms from Roots.

In default of an exposition of the peculiarities of Kâṣmîrî pronunciation, which, for the reason above stated the Editor is unable at present to give, he would refer the reader to his article on the Kâṣmîrî vowel system which has appeared in the Journal of the Bengal Asiatic Society for 1896, pp. 880 & ff. This will be found to give all the necessary information, and to explain the system of spelling adopted by Jayana-kaula.

The Editor has read the Grammar carefully through with Paṇḍit Mukunda Rama Çâstrî, a Kâṣmîrî born and bred in Çrînagar, who came down to Patna for the purpose. The Paṇḍit has also read the proof sheets with him and has elucidated many doubtful points. The Editor is glad to have an opportunity of acknowledging the assistance which he has received from so learned and intelligent a co-worker.

The printing, which was a more complicated business than ordinary, has been carried out at Patna, under the Editor's personal supervision, and his thanks are due to the printers, Bâbu Râm Dîn Siṅgh and Bâbu Sâhib Prasâd Siṅgh for the care with which the work has been carried out.

BIRKBECK.

17th March, 1897.

ॐ श्रीगणेशाय नमः ।

अथ

कश्मीरशब्दामृतं

लिख्यते ॥

यत्प्रसादाद्विना विघ्नगणा यान्ति ह्यगण्यताम् ।
अभीप्सिताय तं वन्दे शरदीव घनाघनाः ॥ १ ॥
तां वन्दे या चतुष्षष्टिवर्णरूपेण भारती ।
वागर्थरूपवन्यायां क्रीडयत्यखिलान्कृतीन् ॥ २ ॥
कश्मीरे संस्कृता भाषा ह्यभूदित्यनुमीयते ।
पूर्वं सैवाधुना कालवशात्संकरतामिता ॥ ३ ॥
सूत्रधातुनिबन्धेन शब्दाश्चाधुनिकाः क्रियाः ।
व्याक्रियन्ते तथा नोपभ्रष्टाः स्युस्ते पुनर्यथा ॥ ४ ॥
यस्य हृत्सदने वाञ्छे प्रभातो ऽच्छप्रपूरिते ।
इवाभीक्ष्णमसापत्न्यसूचके धरणीपतेः ॥ ५ ॥
तस्य राजाधिराजस्य जम्बूकश्मीरभूभुजः ।
श्रीमच्छ्रीरणवीराख्यसिंहस्यामिततेजसः ।
अतिवेलप्रसादाप्तवृत्तिना क्रियते त्विदम् ॥ ६ ॥
संवीक्ष्य कल्पनाभोगं हृष्यन्त्वस्मिन्सुपूरुषाः ।
स्वोत्पादने पितृद्वेषी कुहनो ऽन्यस्य का कथा ॥ ७ ॥

वेदव्याकरणे किल त्रिनयनाभ्यस्ते च सारस्वत
ऐन्द्रे सादर ऐन्दवे सुमनसां यो बाहुलेये ऽपि च ।
प्रीत्या इश्वरकौल ईशनिरतः कश्मीरशब्दामृतं
सद्वर्षे सुतिथौ शुभोडुनि शुभे घस्रे च मासे व्यधात् ॥ ८ ॥

[८ । अस्य श्लोकस्य श्लिष्टार्थपदेभ्यो ऽयमर्थान्तरो व्यज्यते, वेदव्याकरणे वेदा इति संख्यार्थे चत्वारि, व्याकरणानि अष्टौ, अङ्कानां वामतो गतिरिति नयेन तच्चतुरष्टरूपं संख्यानं चतुरशीतिर्भवति तस्मिंश्चतुरशीत्यात्मके ८४ संख्याने त्रिनयनाभ्यस्ते त्रिभिर्नयनाभ्यां द्वाभ्यां पूर्वरीत्या त्रयोविंशत्या अभ्यस्ते गुणिते सति द्वि२त्रि३नव९एका१त्मिका संख्या अर्थत एकोनविंशतिः शतं द्वात्रिंशच्च जायते, तत्संख्यात्मके सद्वर्षे एकोनविंशतिशताधिकद्वात्रिंशे वैक्रमे संवत्सरे इत्यन्वयः, तथा सारस्वते सुतिथौ सरस्वतीदेवतायां तिथौ पञ्चम्यामिति यावत्, पुनश्च ऐन्द्रे शुभोडुनि सति इन्द्रदेवतात्मके ज्येष्ठानक्षत्रे, घस्रे च शुभे ऐन्दवे इन्दुर्देवतास्येत्यैन्दवः सोमवासरे इत्यर्थः, मासे च बाहुलेये बहुलाः कृत्तिकाः तद्युता पौर्णमासी यस्मिन्मासे कार्तिके इत्यर्थः. शुभपदेन अवशिष्टः शुक्लपक्षो ऽवगम्यते इति भावः ॥ तथाकृते । संवत् १९३२ कार्तिकशुक्लपञ्चम्यां सोमवासरे ज्येष्ठानक्षत्रे ईशनिरतः शिवभक्त ईश्वरकौलः सुमनसां सहृदयानां देवानां च प्रीत्यै कश्मीरशब्दामृतम् नाम इदं कश्मीरभाषाव्याकरणं व्यधात् निरमादिति ॥]

ॐ अक्षरसंकेतपरिपाटीयम् ।

तत्रादौ काश्मीरभाषायां वर्गचतुर्थाक्षराणि क्वचिन्नोच्चार्यन्ते अकारश्च प्रसिद्धोच्चारणतया न शब्दायत इति बोध्यम् ॥

प्रसिद्धा वर्णाः ।

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः क ख ग ङ च छ ज ट ठ ड त थ द न प फ ब म य र ल व श ष स ह क्ष ॥

अप्रसिद्धानां संकेतः ।

अं आं उं ऊं ऋं च्च छ्च ज्ज झ्झ ॥

भाषाशब्दाः ।	अंगुनु ।	अंलुतु ।	आंशिद् ।	उंजुलु[1] ।	ऋंथ् ॥
संस्कृताः शब्दाः ।	अग्निः ।	अलक्तः ।	आश्विनः ।	उज्ज्वलः ।	ऋतुः ॥
भाषाशब्दाः ।	पंपु ।	तंनु ।	दांरू ।	गुरु[2] [?] ।	तूरू ।	कुंमू ॥
संस्कृताः शब्दाः ।	पक्वः ।	तनु ।	श्मश्रु ।	अश्वः ।	शीतम् ।	कूर्मः ॥
भाषाशब्दाः ।	वंरि ।	पंपि ।	दंरि ॥	कंरु ।	पंपु ।	दंरु ॥
संस्कृताः शब्दाः ।	वलयाः ।	पक्वाः ।	दृढाः ॥	वलयः ।	पक्वः ।	दृढः ॥
भाषाशब्दाः ।	दंरू ।	पंपू ।	कंरू ॥	च्चंरु ।	छ्चंरु ।	ज्जंरु ।	पोझ् ॥
संस्कृताः शब्दाः ।	दृढा ।	पक्वा ।	अप्रसूता ॥	बहु ।	रिक्तम् ।	बधिरः ।	पानीयम् ॥

अत्रोर्ध्वचिह्नं स्वरस्याधोबिन्दुर्व्यञ्जनस्य ज्ञेया । तथा ऊकारमात्रा (पू) इकारमात्रा (रि) उकारस्य (रु) ज्ञेया ॥

[[1] वुजुलु इत्यपि ॥]

[[2] सर्वदा हि गुरुइत्यत्र गकाराश्रित उकारः प्रसिद्धतयोच्चार्यते ॥]

कश्मीरशब्दामृतम् ।

तत्रादौ ।

संधिप्रकरणम् ॥१॥

संधिसिद्धिः पदेषु ॥ १ ॥

अत्र वक्ष्यमाणशब्दशास्त्रे संधेः (अक्षरसंयोगस्य) सिद्धिः (विधानं) पदेषु (लिङ्गस्वरूपेषु धातुस्वरूपेषु च) विज्ञेया ॥

॥ न वाक्येषु ॥ २ ॥

अत्र तिङन्तसुबन्तसमुदायरूपेषु वाक्येषु संधिर्नावधार्यः ॥

॥ व्यञ्जनं परेण संधेयम् ॥ ३ ॥

ताप् उकु । अनेन संधौ कृते । तापुकु । आतपस्य ॥ इति सिद्धम् ॥ कर् यान् । अनेन संयोगे कृते कर्यान् । चकार । इति सिद्धम् ॥ पदेषु किम् । तिम् आय् । त आयाताः । अत्रोभयोः सुबन्ततिङन्तयोर्विद्यमानत्वात्संधिनिषेधः ॥

॥ असवर्णे ऽकारस्य लोपः ॥ ४ ॥

ड्यक उकु । गाट उलु । अनेन अकारस्य लोपे कृते । ड्यकुकु । ललाटस्य ॥ गाटुलु । बुद्धिमान् । इति सिद्धम् ॥ पदेषु किम् । चूह् वुल । तुम् एहि । अत्र

संधिर्न भवति ॥ [क्वाचित्को ऽयं विधिरुकारादिष्वसवर्णेषु विध्यन्तरस्य वक्ष्यमाणत्वात्] ॥

॥ स्वरः सवर्णे दीर्घपरलोपौ ॥ ५ ॥

करान् छ्य आ । अ॑छि इट् । अनेन दीर्घे परलोपे च कृते । करान् छ्या । [सा किं नु करोति] । अछीट् । [दुर्दृष्टिः] [सू० ४।३६] । इति सिद्धम् ॥ पदेषु किम् । प॑छि इम् । अतिथय एते । इत्यत्र संधिर्न भवति ॥

[॥ अकारे ऽकारलोपः ॥ ५ क ॥

गर अन् । अनेन अकारस्य लोपः । गरन् । गृहाणि । इति सिद्धम् ॥]

॥ अकार इकार ए ॥ ६ ॥

अकार इकारे परे एकारो भवति परलोपश्च ॥ च्य इन् । [च्येन् । तेन पीतानि] ॥ च्यकारादकारविश्लेषं कृत्वानेनाकारस्यैकारे कृते च्येन् इति सिद्धम् ॥

॥ उकार ओ ॥ ७ ॥

अकार उकारे परे ओकारो भवति परलोपश्च ॥ ख्य उन् । ख्योन् । तेन खादितम्] ॥ च्य उन् च्योन् । [तेन पीतम्] ॥ अत्राकारोकारयोः संधौ कृते अनेन ओकारपरलोपौ ॥

॥ एकार ऐ ॥ ८ ॥

अकार एकारे परे ऐ संपद्यते ॥ ग एय् । [गैय् । ते गताः] ॥ प्य एय् । [प्यैय् । ते पतिताः] ॥ अनेन संधौ कृते गैय् प्यैय् इति भवति ॥

[क । इदं सूत्रं ग्रन्थकृतात्र लिखितं नास्ति लिङ्गपादस्थ ५२ सूत्रमध्ये त्वनुकृष्टम् । तस्मादवश्योपयोग्यत्र मध्ये प्रक्षिप्तम् ॥]

॥ ओकार औ ॥९॥

अकार ओकारे परे औ भवति ॥ ग ओव् । प्य ओव् ॥ अनेन संधौ कृते । गौव [। स गतः] ॥ प्यौव् [। स पतितः] ॥

॥ इकारो ऽसवर्णे यो ऽपरलोपः ॥ १०॥

इकारो ऽसवर्णे स्वरे न परलोपो यस्य तथाविधो यः संपद्यते ॥ करि उकु । इकारस्य यत्वे परलोपाभावे च व्यञ्जनं परेण संधेयमिति (सू० ३) । कर्युकु । इति सिद्धम् ॥ पदेषु किम् । कति आय् । कुत आगताः । इत्यत्र वाक्ययोर्विद्यमानत्वात्संधिनिषेधः ॥

॥ उकारो वः ॥ ११ ॥

उकारो ऽसवर्णे स्वरे परे वकारो भवति परलोपाभावश्च ॥ करान् छु आ । अनेन वत्वे कृते । करान् छ्वा [। स किं नु करोति] । इति सिद्धम् ॥ पदेषु किम् पटु अन् । और्णमानय । अत्र संधिनिषेधः ॥

इति श्रीशारदाक्षेत्रभाषाव्याकरणे
कश्मीरशब्दामृते संधिप्रकरणम् ॥१॥

अथ लिङ्गप्रकरणे ॥२॥

लिङ्गपादः ॥१॥

॥ अकारान्तानां प्रथमैकबहुत्वे लिङ्गवत् ॥ १ ॥

अकारान्तानां लिङ्गानामेकवचनं बहुवचनं च स्त्रीपुंसोर्लिङ्गवद्विज्ञेयम् ॥ ज्यक्क। ललाटम् ॥ ज्यक्क। ललाटानि ॥ ज्यञ्ज। भगिनी ॥ ज्यञ्ज। भगिन्यः ॥

॥ ऊदन्तानां पुंसि ॥ २ ॥

ऊकारान्तानां च लिङ्गानां प्रथमाया एकवचनं बहुवचनं च लिङ्गवद्विज्ञेयं पुंलिङ्ग एव ॥ अत्र शारदाक्षेत्रभाषाशब्दशास्त्रे इकारान्तं लिङ्गमुवर्णान्तं च लिङ्गं तत्तन्मात्रिकान्तमेव बोध्यम्। न तु संपूर्णम्। किंतु तेषु पूर्ववर्णसंबन्धिनः स्वरस्याप्रसिद्धता विज्ञेया। [७० सूत्रोक्तो विधिरयम्]। सा च आकारस्य अकारप्लुतत्वशब्दवद्भवतीति परिभाष्यते ॥ दा॑नू। करकः। अनार ॥ दा॑नू। करकाः। बहुत अनार ॥ पुंसि किम्। ब॑हू। महती। बडी ॥ बज्य। महत्यः। बडियाँ ॥

॥ व्यञ्जनान्तानां च ॥ ३ ॥

व्यञ्जनान्तानां पुंलिङ्गानां प्रथमैकबहुत्वे लिङ्गवद्भवतः ॥ दय्। ईश्वरः। ईश्वर ॥ दय्। ईश्वराः। बहुत ईश्वर ॥

॥ इप्रत्ययस्याकारो व्यञ्जने ॥ ४ ॥

व्यञ्जनान्तानां पुंलिङ्गानामकारान्तानां च व्यञ्जने परे इप्रत्ययस्य अकारो भवति ॥ गर सूतिन् । गृहेण । घर कर के ॥ वाल सूतिन् । वालेन । बाल कर के ॥ गर शब्दात् वाल् शब्दात् च । हेतौ सूतिन्नन्तौ सूत्यन्तौ वा (सू० ५९) इत्यनेन इ सूतिन्प्रत्ययः । अनेन इकारस्य अकारः । अकारव्यञ्जनान्तानां किम् । गुरि सूतिन् । अश्वेन । घोडे कर के ॥ व्यञ्जने किम् । गुरि लोयु । अश्वेन हतः । घोडे ने मारा ॥ पुंसि किम् । मालि सूतिन् । मालया । माला कर के ॥

॥ न संख्यावाचिभ्यः ॥ ५ ॥

संख्यावाचिभ्यो व्यञ्जनान्तेभ्यो लिङ्गेभ्यः इप्रत्ययस्य अकारो न भवति ॥ सति सूतिन् । सप्तभिः । सात कर के ॥ ऐठि सूतिन् । अष्टाभिः । आठ कर के ॥ सत् शब्दात् ऐट् शब्दात् इ सूतिन् प्रत्ययः ॥

॥ इतो लोपः ॥ ६ ॥

इकारात् इप्रत्ययस्य लोपो भवति ॥ पोथि सूतिन् । पुस्तिकया । पोथी कर के ॥ पूथि शब्दात् इ सूतिन् प्रत्ययः । पूर्ववर्णोकारस्यौकारः स्त्रियाम् (सू० ३३) इत्यनेन उपधाया ऊकारस्य ओकारः । अनेन इकारलोपः ॥

॥ यड्गावृथर्क्कठ्वड्भ्य ऊकारमात्रादेशः ॥ ७ ॥

एभ्यः शब्देभ्यः इप्रत्ययस्य ऊकारमात्रादेशो भवति ॥ यंडू सूतिन् । उदरेण । पेट कर के ॥ यड् शब्दात् इ सूतिन् प्रत्ययः । अनेन इकारस्य ऊकारमात्रादेशः । ऊदन्तत्वे सिद्धे पूर्वस्वरस्याख्यातता ज्ञेया । व्यञ्जनं परेण संधेयम् (सू० १।३) यंडू सूतिन् । इति सिद्धम् ॥ एवं । गोवू (सू०७२) सूतिन् । गवा । गऊ कर के ॥ थंरू सूतिन् । पृष्ठेन । पीठ कर के ॥ कंठू सूतिन् । कुष्ठेन । कुठ कर के ॥ वंडू सूतिन् । व्याजेन । व्याज कर के ॥

॥ उदन्तानां लिङ्गवदेकत्वमेव ॥ ८ ॥

स्पष्टम् ॥ कंरु । कटकः । कडा ॥

॥ स्त्रियामिदूदन्तानाम् ॥ ९ ॥

इकारान्तानामूकारान्तानां च स्त्रियामेकवचनमेव लिङ्गवद्भवति ॥ पूथि । पुस्तिका । पोथी ॥ पंटू । पट्टिका । फट्टी ॥ एकवचनं किम् । पोथ्य । पुस्तिकाः । पोथियाँ ॥ पच्य । पट्टिकाः । फट्टियाँ ॥ स्त्रियां किम् । बांचू । कुटुम्बजनाः । टब्बर ॥

॥ व्यञ्जनान्तानां च ॥ १० ॥

व्यञ्जनान्तानां स्त्रीलिङ्गानामेकवचनमेव लिङ्गवद्भवति ॥ क्रख् । कोलाहलः । ऊँचा शब्द ॥ क्रक्शब्दस्य । वर्गप्रथमान्तानां प्रथमायां द्वितीय (सू० ६६) इत्यनेन कस्य खः ॥ एकवचनं किम् । क्रक । कोलाहलाः । ऊँचे शब्द ॥

॥ बहुत्वे ऽकारागमः ॥ ११ ॥

व्यञ्जनान्तानाम् [इद्] ऊदन्तानां च स्त्रीलिङ्गानां बहुवचने अकारागमो भवति ॥ [पोथ्य । पुस्तकानि । पोथियाँ ॥] पच्य । पट्टिकाः । फटियाँ ॥ क्रक । कोलाहलाः । ऊँचे शब्द ॥ पंटू शब्दात् अनेन अकारागमे कृते । ऊदन्तटवर्गस्य चवर्गः प्रथमाबहुत्वादिषु स्त्रियाम् (सू०२२) इत्यनेन सूत्रेण टकारस्य चकारे कृते । उवर्णान्तानामिकार (सू०३०) इति ऊमात्राया इकारः । इकारो ऽसवर्णे यो ऽपरलोप (सू०१।१०) इति यत्वम् । अन्यत् स्पष्टम् ॥

॥ न्प्रत्यये सर्वत्र ॥ १२ ॥

सर्वत्र स्त्रीलिङ्गे पुंलिङ्गे च न् प्रत्यये पर अकारागमो भवति ॥ गुर्यन् छुह् खसान् । अश्वानारोहति । घोडियों को चढता है ॥ कोर्यन् छुह् रछान् । कन्याः पाति । कूडियों को पालता है ॥ कटन् छुह् मारान् । मेषान्हन्ति । भेडुओं को

मारता है ॥ गुरु शब्दात्। द्वितीयायां स्नाव् (सू० ३८) इति न् प्रत्ययः। अनेनाकारागमः। उवर्णान्तानामिकार (सू०३०) इतीकारः॥ कूरू शब्दस्य। पूर्ववर्णोकारस्यौकारः स्त्रियाम् (सू०३१) इत्यनेनोपधाया ऊकारस्यौकारः। यत्वम्। शेषं पूर्ववत्॥

॥ नोदन्तानां पुंसि ॥१३॥

ऊकारमात्रान्तानां पुंलिङ्गानां न् प्रत्यये परे अकारागमो न भवति॥ दानून् छुह् ख्यवान्। करकान् खादति। अनारों को खाता है॥ लारून्। इन्द्रवारुणीः। खीरों को॥ कान्जून्। काञ्चिकानि [। काँजी]॥

॥ कृतादेशव्यञ्जनान्तेभ्यश्च ॥ १४ ॥

येषां व्यञ्जनान्तानां लिङ्गानामादेशः कृतो भवति न तु ऊमात्रान्तानां तेषां न् प्रत्यये परे अकारागमो न भवति॥ रात्। ग्रन्द्। कथ्। इति शब्दाः (सू०२३)॥ रात्रून् छुह् परान्। रात्रीः पठति। रात्रियों को पढता है॥ ग्रन्जून् छुह् वुछान्। संख्याः पश्यति। गिन्तियों को देखता है॥ कछून् छुह् वुठान्। [सूत्रतन्तुराशीन् वेष्टयति। लच्छे के सूत बाटता है]॥ कृतादेशव्यञ्जनान्तेभ्यः किम्। पच्यन् छुह् गरान्। पट्टिका घटयति। फट्टियों को गडता है॥

॥ वा गन्जूगासूबाचूहान्जूभ्यः ॥ १५ ॥

एभ्यः शब्देभ्यः पुंस्त्वादकारागमो वा विकल्पेन भवति॥ गन्जून् छुह् मारान्। चर्मकारान्मारयति। चमिआरों को मारता है॥ गासून्। [तृणविक्रेतॄन्। घसियारों को]॥ बाचून् छुह् प्यतरान्। कुटुम्बजनान्पाति। कुटुम्ब को पालता है॥ हान्जून् छुह् रछान्। नाविकान्पाति। हाँजियों को पालता है॥ वा॥ गन्जन्। गासन्। हान्जन्। बाचन्॥

॥ कृतादेशानामूमात्रा आगमः ॥ १६ ॥

कृतादेशशब्दस्य पुनर्ग्रहणम् । यत्र यत्र वचने व्यञ्जनान्तानां लिङ्गानामादेशः कृतः स्यात्तत्र ऊमात्रा आगमो भवति ॥ रात् । सत् । कथ् । ग्रन्द् । हान् । इति लिङ्गानि (सू०२३) । रा॑चू । रात्रयः । रातियाँ ॥ सचू । आशाः । आशाआँ ॥ कछू । [सूत्रतन्तुराशयः । लच्छे] ॥ ग्रन्ज़ू । संख्याः । गिन्तियाँ ॥ हांशू । हानयः । हानियाँ ॥ ऊमात्रान्तत्वे पूर्वस्वरस्याप्रसिद्धता ॥

॥ यङ्गाव्कठ्थर्वडां च कृतादेशविधिः ॥१७॥

एषां शब्दानां च कृतादेशलिङ्गवद्विधिरागमनिषेधौ भवतः । अकारागमस्य निषेधः ऊमात्रागमस्य विधिः स्यात् ॥ यंदू । उदराणि । पेटाँ ॥ गोवू (सू०७२) । गावः । गऊआँ । कंठू ॥ कुष्ठानि [औषधविशेषः] । कुठाँ ॥ थंरू । पृष्ठानि पीठाँ ॥ वंडू । कलान्तराणि । व्याजाँ ॥

॥ खार्मार्सार्राशादीनां च ॥ १८ ॥

एतदादीनां व्यञ्जनान्तानां स्त्रीलिङ्गानां चाऽकारागमनिषेध ऊमात्रागमश्च भवति ॥ खार् । खारी । खांरू । खार्यः ॥ मार् । नाम नदी । मांरू । नद्यः ॥ सार् । पट्टीभेदः । सांरू । पट्ट्यः ॥ राश् । वणिग्धनम् । रांशू । धनानि ॥

॥ हान्तानां शश्च ॥ १९ ॥

हकारान्तानां स्त्रीलिङ्गानां प्रथमाबहुत्वादिष्वऽकारागमनिषेध ऊमात्रागमाभिर्भवति अन्त्यस्य हकारस्य च शकारो भवति ॥ काह् । एकादशी । कांशू । एकादश्यः ॥ बाह् । द्वादशी । बांशू । द्वादश्यः ॥ पाह् । विष्टा । पांशू । विष्टाः ॥ एवं । कांशूव् सूतिन् । एकादशीभिरित्यादि ॥

॥ ऊकारादौकारस्य वत्वम् ॥ २० ॥

ऊमात्रायाः परस्य औकारस्य सर्वत्र पुंलिङ्गे स्त्रीलिङ्गे च वकारः स्यात् ॥ रात्रूव् सूतिन्। रात्रिभिः। रातियाँ कर के ॥ यंदूव् पुछ्य्। उदरेभ्यः। पेटों वास्ते ॥ दानूव् सूतिन्। करकैः। अनारों कर के ॥ बांचूव् सूत्य्। कुटुम्बैः। टब्बरों कर के ॥

॥ ऊदितोरकारागमः स्त्रियां सकारे ॥ २१ ॥

ऊकारान्तस्येकारान्तस्य च लिङ्गस्य सकारे परे ऽकारागमो भवति स्त्रियाम् ॥ पंदू। तंजू। हंदू। पृथि। शब्दाः ॥ पच्य। पट्टिकाम्। फट्टी ॥ तज्य। तन्वीम्। पतली ॥ हच्य। काष्ठम्। लकड़ी ॥ पोथ्य। पुस्तिकाम्। पोथी ॥ द्वितीयायां स्नाव् (सू० ३८) इति स् प्रत्ययः [। स्लोपः स्त्रियां सर्वत्र (सू० ४०) इति सकारस्य। लोपः]। ऊदन्तटवर्गस्य (सू० २२) इति टस्य चः। उवर्णान्तानामिकार (सू० ३०) इति ऊमात्राया इकारः। इकारो ऽसवर्णे योऽपरलोप (सू० १।१०) इति यत्वम्। अनेनाकारागमः ॥ पृथि शब्दस्य चानेनाकारागमः। इकारो ऽसवर्णे यो ऽपरलोप (सू० १।१०) इति यत्वम्। व्यञ्जनं परेण संधेयम् (सू० १।३)। पूर्ववर्णोकारस्यौकार (सू० ३३) इत्यूकारस्यौत्वम् ॥

॥ ऊदन्तटवर्गस्य चवर्गः प्रथमाबहुत्वादिषु ॥२२॥

प्रथमाया बहुवचनादिषु ऊमात्रायुतस्य टवर्गस्य चवर्गादेशो भवति स्त्रीलिङ्गे ॥ पंदू। कांठू। बंडू। इति शब्दाः ॥ पच्य छ्यह्। पट्टिकाः सन्ति। फट्टियाँ हैं॥ पच्यन् छुह् गरान्। पट्टिका घटयति। फट्टियाँ को गडता है॥ पच्य सूतिन्। पट्टिकया। फट्टी कर के॥ काछ्य छ्यह्। शाकादिकाष्ठानि सन्ति। सागों की लकडियाँ हैं॥ काछ्यन् छुह् फुटरान्। काष्ठानि भनक्ति। सागों की लकडियों को तोडता है॥ काछि सूतिन्। शाककाष्ठेन। सागों की लकडी कर के ॥ बज्य छ्यह। महत्यः

सन्ति। बडियाँ हैं ॥ बज्यन् छुह् दपान् । महतीर्वदति । बडी स्त्रियों को कहता है ॥ बज्यौ सूतिन् । महतीभिः । बडी स्त्रियों कर के ॥

॥ तवर्गान्तानामप्रसिद्धः ॥ २३ ॥

तवर्गान्तानां स्त्रीलिङ्गानां क्रमेण अप्रसिद्धः चवर्गादेशो भवति अप्रसिद्धो दन्त्यः ॥ रात् । कथ् । ग्रन्द् । ईरन् । चामन् । इति शब्दाः ॥ राचू छ्यह् । रात्रयः सन्ति । रातियाँ हैं ॥ राचून् छुह् निवान् । रात्रीर्हरति । रातियों को लेता है ॥ राचूव् सूतिन् । रात्रिभिः । रातियों कर के ॥ कछू छ्यह् [। सूत्रतन्तुराशयः सन्ति । लच्छे हैं] ॥ कछून् छुह् वुठान् [। सूत्रतन्तुराशीन् वेष्टयति । लच्छों को बाटता है] ॥ कछूव् सूतिन् [। सूत्रतन्तुराशिभिः । लच्छों कर के] ॥ ग्रन्जू छ्यह् । संख्याः सन्ति । गिन्तियाँ हैं ॥ ग्रन्जून् छुह् गन्जरान् । संख्या गणयति । गिन्तियों को गिनता है ॥ एवं । ईरचू [। स्थूणाः । निहाइयाँ] ॥ ईरचूव् सूतिन् [। स्थूणाभिः । निहाइयाँ कर के] ॥ चामचू [। आमिक्षाः । पनीर] ॥ चामचूव् सूतिन् [। आमिक्षाभिः । पनीरों कर के] ॥ (सू० १४,१६,२०) ॥

॥ न खून्तन्नान्स्वन्हन्बनादीनाम् ॥ २४ ॥

एषां शब्दानां वर्गाक्षरादेशो न भवति ॥ खून् । कफोणिः । आरकी ॥ खून । कफोणयः । आरकियाँ ॥ तन् । तनुः । देह ॥ तन । तन्वः ॥ तनौ सूत्य् ॥ नान् । नाभिः । नाभि ॥ नान । नाभयः ॥ नानौ सूतिन् ॥ स्वन् । सपत्नी । साकन् ॥ स्वन । सपत्न्यः । स्वनौ सूतिन् ॥ हनि सूतिन् । अल्पेन ॥ बनि सूतिन् । पुञ्जेन ॥

॥ कथादीनां च ॥ २५ ॥

कथ् [। कथा] ॥ वथ् [। मार्गः] ॥ व्यथ् । [वितस्ता नाम नदी] ॥ लथ् [। लत्ताप्रहारः] ॥ दथ् [। लोष्टम्] ॥ थ्वथ् [। अन्तरायः] ॥ च्वथ् [। गुदम्] ॥ चित्थ् [। नाडीस्तम्भः] ॥ चेंथ् [। शरीरपरिवर्तनेन क्रीडाविशेषः] ॥ गथ् [। नदीप्रवाह

वेगः] ॥ पाँथ् [। लेशः] ॥ तोँथ् [। चञ्चुः] ॥ इति कथादयः ॥ एषां शब्दानां च वर्गाक्षरादेशो न भवति ॥ कथ । कथाः । बाताँ ॥ लत । लत्ताः । लताँ ॥ दत । लोष्टानि [। ढेले] ॥ थ्वत । अन्तरायाः [। विघ्न] ॥ च्वत । गुदानि । गाँडाँ ॥ चित । नाडीस्तम्भनानि । थंभना ॥ कथौ सूतिन् । कथाभिः ॥ लतौ सूत्य् । लत्ताभिः ॥ दतौ पुछ्य् । लोष्टेभ्यः ॥ थ्वति सूतिन् । अन्तरायेण ॥ च्वतन् प्यट् । गुदेषु ॥ चिति सूतिन् । नाडीस्तम्भनेन ॥ चैंति सूतिन् ॥ गति सूत्य् । प्रवाहेन ॥ पाँति सूत्य् । अल्पेन ॥ तोँति सूतिन् । चञ्च्वा ॥

॥ टवर्गान्तानां च ॥ २६ ॥

टवर्गान्तानां ऊमात्रारहितानां स्त्रीलिङ्गानां च वर्गादेशो न भवति ॥ नट् । गर्वेट् । हड् । इति शब्दाः ॥ नटि सूतिन् । कम्पेन ॥ गर्वेटि पुछ्य् । गृहोपकरणाय ॥ हडि सूतिन् । हठेन ॥ ऊमात्रारहितानां किम् । च्वट् । अपूपः ॥ च्वच्य छुह् ख्यवान् । पूपान् खादति ॥ च्वच्यौ सूतिन् । अपूपैः ॥

॥ वाल्साल्ज़ाल्कलां जः ॥ २७ ॥

एषां शब्दानां अन्त्यस्य जकारो भवति स्त्रियाम् ॥ वाल् । सर्पादिबिलम् ॥ साल् । स्याली ॥ ज़ाल् । जालिका ॥ कल् । चिन्ता ॥ वाजू । बिलानि ॥ साजू । स्याल्यः ॥ ज़ाजू । जालिकाः ॥ कजू । चिन्ताः ॥ वाजूव् सूतिन् ॥ साजूव् सूतिन् ॥ ज़ाजूव् सूत्य् ॥ कजूव् सूतिन् ॥ साधनं पूर्ववत् ॥ स्त्रियां किम् । वाल सूतिन् ॥ एषां शब्दानां किम् । गल् । कपोलादधो गलसंज्ञः ॥ गलौ सूतिन् ॥ ज़ालि सूत्य् । कम्पेन ॥

॥ हाल्शब्दस्य स्त्रियां समासे ऽपि ॥ २८ ॥

हाल् शब्दस्य लकारस्य जकारो भवति स्त्रीलिङ्गवर्तमानसमासपदान्ते ऽपि ॥ हाल् । शाला । हाजू किन्य् । शालातः । हाजू प्यट् । शालोपरि ॥ समासान्ते यथा । स्वरहाजू अंदर् । महानसे ॥ हस्तिहाजू अंदर् । हस्तिशालायां ॥ स्त्रीलिङ्गे किम् । च्वाटहालम् अंदर् । पाठशालायाम् ॥

॥ वा कुंडल्कर्तलोः ॥ २९ ॥

कुंडल् कर्तल् इत्यनयोः शब्दयोर्वा विकल्पेन लकारस्य जकारो भवति ॥ कुंडल् । कपालिका । कुंडलि सूंतिन् । कुंडजू सूंतिन् ॥ कर्तल् । खड्गः । कर्तलि सूंतिन् । कर्तजू सूंतिन् ॥

॥ उवर्णान्तानामिकारः ॥ ३० ॥

उकारान्तानां ऊकारान्तानां च लिङ्गानां प्रथमाबहुत्वादिविभक्तिगणे अन्त्यस्वरस्य इकारो भवति ॥ गुरु । घोटकः ॥ गुरिस् छुह् खसान् । अश्वमारोहति ॥ एवं । गुर्यन् । गुरि सूंतिन् । इत्यादि । गुरु शब्दात् द्वितीयायां स्लाव् (सू० ३८) इति स् न् प्रत्ययौ । न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः । अनेन उकारस्य इकारः । यत्वम् ॥ पटू । पटिका । पच्य । पच्यन् । पचि सूंतिन् ॥ प्रथमे । बहुत्वे ऽकारागमः (सू० ११) इति । अपरत्र न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः । ऊदन्तटवर्गस्य (सू० २२) इति टकारस्य चकारः । अनेन ऊकारस्य इकारः । तृतीये । इतो लोप (सू० ६) इति इप्रत्ययस्य लोपः ॥

॥ नोदन्तानां पुंसि ॥ ३१ ॥

ऊकारान्तानां लिङ्गानां पुंलिङ्गे अन्त्यस्वरस्य इकारो न भवति ॥ दानू । करकः ॥ दानू । दाडिमान् । दानूव् सूंतिन् । दाडिमैः ॥ हान्जूव् सूंत्य् । नाविकैः ॥ बाचूव् सूंत्य् ॥ कुटुम्बैः ॥ गन्जूव् सूंत्य् । चर्मकारैः ॥ ऊदन्तानां पुंसि (सू० २) इति बहुवचनं लिङ्गवत् । द्वितीयायां स्लाव् (सू० ३८) इति न् प्रत्ययः । ऊकारादौकारस्य वत्वम् (सू० २०) इति सूत्रेण औ सूंतिन् औ सूंत्य् प्रत्यययोः औकारस्य वत्वम् । पुंसि किम् । व्यछ्यौ सूंतिन् । स्थूलाभिः ॥

॥ व्यञ्जनान्तस्योकारोपधाया अन् ॥३२॥

व्यञ्जनान्तस्य शब्दस्य उपधाभूतस्य उकारस्य प्रथमाबहुत्वादिषु अकारो भवति ॥ वाँदुर् शब्दः । वाँदर् । वानराः ॥ वाँदरौ सूत्य् । वानरैः ॥

॥ पूर्ववर्णोकारस्योकारः स्त्रियाम् ॥ ३३ ॥

स्त्रीलिङ्गे वर्तमानस्य पूर्ववर्णसंबन्धिन ऊकारस्य ओकारो भवति प्रथमाबहुत्वादिविभक्तिगणे ॥ पूथि (प्र०ए०) । पुस्तकम् ॥ कूरू (प्र०ए०) । कन्या ॥ पोथ्य (प्र०ब०) । पोथ्य (द्वि०ए०) छुह् परान् । पोथि सूतिन् (तृ०ए०) । पोथ्यौ पुछ्य् (च०ब०) । इत्यादि ॥ कोर्य (प्र०ब०) । कन्याः । कोर्य (द्वि० ए०) छुह् रछान् । कोर्यन् (द्वि० ब०) । कोर्यौ सूत्य् (तृ०ब०) । इत्यादि ॥ अनेन पूर्ववर्णोकारस्य ओकारः । साधनं पूर्ववत् ॥

अत्र स्थाने ऽन्तरतम [पा० १।१।५०।] इति वचनाद्यथा पूर्ववर्णसंबन्धिन ऊकारस्य ओकारो भवति तथैव ईकारस्य एकारो भवतीति बोध्यम् ॥ सीरू । इष्टिका । सेर्य । इष्टिकाः ॥ खीति । क्षेत्रम् । खेत्य । क्षेत्राणि ॥ इत्यादि ॥ गीरादीनां तु न ॥ गीरादयस्तु । गीरू [। गैरिकम्] ॥ गीदू [। अर्भकविष्ठा] ॥ चीरि [। चीरिका] ॥ टीँदू [। अहंकारः] ॥ टीरू [। शीतस्थौदनस्य घनीभूतो राशिः] ॥ पीरू [। पीठकम्] ॥ इत्यादयः प्रायशो ज्ञेयाः । गीरू । गैरिकम् । गीरि सूतिन् । गैरिकेण ॥ इत्यादीनि स्वरूपाणि भवन्ति ॥

॥ बहुषु पुंस्यप्रथमायाम् ॥ ३४ ॥

प्रथमाबहुवचनं वर्जयित्वा पुंलिङ्गे विद्यमानस्य पूर्ववर्णसंबन्धिन ऊकारस्य बहुवचनेषु ओकारो भवति ॥ गूरु । गोपः ॥ गूलु । फलसारः ॥ गोर्यन् (द्वि० ब०) । गोल्यन् । गोर्यौ सूतिन् । इत्यादि ॥ द्वितीयायां न् प्रत्ययः । तृतीयायां औ सूतिन् प्रत्ययः ॥ उवर्णान्तानामिकारः (सू० ३०) न् प्रत्यये सर्वत्र (सू० १२) इत्यकारागमः । अनेनोपधाया ऊकारस्य ओकारः । यत्वम् ॥ बहुषु किम् । गूरिस् ।

गोपम् ॥ गूलिम् । फलसारम् ॥ अप्रथमायां किम् । गूरि । गोपाः ॥ गूलि । फलसाराः ॥ पुंसि किम् । कोर्य । कन्याः ॥ पोथ्य । पुस्तकानि ॥

॥ न मूलादीनाम् ॥ ३५ ॥

मूल् [। मूलम्] ॥ कस्तूरु [। पक्षि-विशेषः] ॥ कूटु [। वृक्षस्तम्भः] ॥ चूँठु [। पालीवतः, सेव् इति भाषायाम्] ॥ छूल् [। निर्झरः] ॥ टूरु [। पात्र-विशेषः, स्त्रीभिर्यस्मिन्नन्नं भुज्यते] ॥ डूरु [। पुष्पादिलघुवाटिका] ॥ ढूस् [। गदा विशेषः] ॥ तूरु [। शीतम्] ॥ दूरु [। अल्पमार्गः, गलीति भाषायाम्] ॥ नस्तूरु [। नस्तितः] ॥ बूथ् [। भूतः] ॥ मूरु [। अल्पशाखा] ॥ रूद् [। वृष्टिः ॥ लूख् [। लोकाः, लोग् इति भाषायाम्] ॥ लूद्र् [। लोलुभः] ॥ लूब्र् [। लोलुभः] ॥ वूँठ् [। उष्ट्रः] ॥ सूर् [। भस्म] ॥ हूस् [। कोलाहलः] ॥ इत्यादयः प्रायशो बोध्याः ॥ एषां शब्दानां पूर्ववर्णोकारस्य ओकारो न भवति ॥

मूल् शब्दः ।

	प्र०	द्वि०	तृ०	च०
ए०	मूल ।	मूलस् वा मूल् ।	मूल सूतिन् ।	मूल पुछ्य् ।
ब०	मूल ।	मूलन् वा मूल् ।	मूलौ सूतिन् ।	मूलौ पुछ्य् ।

	पं०	ष०	स०	आ०
ए०	मूल निश ।	मूलुकु ।	मूलस् प्यद् ।	हा मूल ॥
ब०	मूलौ निश ।	मूलन् हंन्दु ।	मूलन् प्यद् ।	हा मूलौ ॥

॥ व्यञ्जनान्तादकारागमो व्यञ्जने ॥३६ ॥

व्यञ्जनान्तात्पुंलिङ्गात् व्यञ्जने परे अकारागमो भवति ॥ काव् । काकः । काव सन्दु ॥ काव् शब्दात् । स्त्रीसंबन्धैकानेकत्वे स्त्रौ हंन्दु (सू० ४२) इति स् हंन्दु प्रत्ययः । पुंप्राणिन (सू०४६) इति हस्य सः ॥ पुंसि संबन्धषष्ठ्यां च (सू० ४१) इति आदिसकारस्य लोपः । अनेन अकारागमः ॥ पुंसि किम् ।

मालि हन्दु ॥ व्यञ्जनान्तानां किम् । गुरि सन्दु । अश्वस्य ॥ व्यञ्जने किम् । काबौ सूतिन् । काकैः ॥

॥ स्त्रियामिकारः ॥ ३७ ॥

व्यञ्जनान्तात् स्त्रियां वर्तमानात् लिङ्गात् व्यञ्जने परे इकारागमो भवति । माल् । माला ॥ मालि हन्दु । मालायाः ॥ माल् शब्दात् । स्त्रीसंबन्धैकानेकत्वे स्नौ हन्दु (सू० ४२) इत्यादिना स् हन्दु प्रत्ययः । सलोपः स्त्रियां (सू० ४०) इति सलोपः । अनेन इकारागमः । व्यञ्जनान्तात् किम् । पच्य हन्दु । पट्टिकायाः ॥ व्यञ्जने किम् मालौ सूतिन् । मालाभिः ॥

॥ द्वितीयायां स्नावसंबन्धषष्ठ्यां च ॥ ३८ ॥

स् न् इत्येतौ द्वितीयायाः एकत्वबहुत्वयोः प्रत्ययौ भवतः । संबन्धषष्ठीं वर्जयित्वा षष्ठ्याश्च क्रमेण प्रत्ययौ भवतः ॥ गुरु । घोटकः ॥ गुरिस् छुह् खसान् । अश्वमारोहति ॥ गुर्यन् छुह् रछान् । अश्वान्पालयति ॥ गुरु शब्दात् अनेन स् न् प्रत्ययौ । बहुत्वे । न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः ॥ उवर्णान्तानामिकार (सू० ३०) इति उकारस्य इकारः । यत्वम् ॥ षष्ठ्यां यथा । ग्वरस् करिज़ि नमस्कार् । गुरोर्नमस्कुर्यात् ॥ द्वब्यन् दिज़ि च्रादर् । रजकानां वृहतिकां दद्यात् ॥ ग्वर् शब्दात् अनेन स् प्रत्ययः । व्यञ्जनान्तादकारागमो व्यञ्जने (सू० ३६) इति अकारागमः ॥ द्वबु शब्दात् अनेन न् प्रत्ययः । न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः । उवर्णान्तानामिकारः (सू० ३०) । यत्वम् ॥

॥ वा प्रथमावदसर्वनाम्नः ॥ ३९ ॥

सर्वनामशब्दान् वर्जयित्वा द्वितीयाया एकत्वबहुत्वे प्रथमावद्वा विकल्पेन

भवतः । द्वितीयाषष्ठीसमुदायवाक्ये तु नित्यं प्रथमावद्भवत इति बोध्यम् ॥ कंरु छुह् गरान् । वा । करिस् छुह् गरान् । वलयं घटयति ॥ ख्वच्य छुह् ख्यवान् । वा । ख्वच्यन् छुह् ख्यवान् । अपूपान्भक्षयति ॥ समुदायवाक्ये यथा ॥ द्वविस् दिज़ि च्रादर् । रजकस्य वृहतिकां दद्यात् ॥ अत्र द्वविस् इति षष्ठी । च्रादर् इति द्वितीया । समुदायवाक्यत्वान्नित्यं प्रथमावदेव स्यात् न तु द्वविस् दिज़ि च्रादरि इति संभवेत् ॥ असर्वनाम्नः किम् । तमिस् दपिज़ि । तं वदेत् ॥ कमिस् वनि । कं वदेत् ॥ इत्यादि ॥

॥ स्लोपः स्त्रियां सर्वत्र ॥ ४० ॥

सर्वेषां स्त्रीलिङ्गानां सर्वत्र द्वितीयायां षष्ठ्यां च स् प्रत्ययस्य लोपो भवति ॥ मालि छुह् छुनान् । मालां पातयति ॥ मालि हंन्दु पोष् । मालायाः पुष्पम् ॥ माल् शब्दात् प्रथमे स् प्रत्ययः । स्त्रियामिकार (सू० ३७) इति इकारागमः । अनेन स् प्रत्ययलोपः । अपरत्र स् हंन्दु प्रत्ययः । शेषं प्रथमवत् सर्वेषां स्त्रीलिङ्गानां बोध्यम् ॥

॥ पुंसि संबन्धषष्ठ्यां च ॥ ४१ ॥

सर्वेषां पुंलिङ्गानां संबन्धषष्ठ्यां स् प्रत्ययस्य लोपो भवति । ग्वर संन्दु च्राद् । गुरोः शिष्यः ॥ ग्वर् शब्दात् । स्त्रीसंबन्ध (सू० ४२) इति स् हंन्दु प्रत्ययः । अनेन सकारलोपः । पुंप्राणिन (सू० ४६) इति हस्य सः । व्यञ्जनान्ताद् (सू० ३६) इत्यकारागमः ॥ ड्यकुकु । ललाटस्य ॥ ड्यक शब्दात् । अप्राणिना (सू० ४८) इति स् उकु प्रत्ययः । अनेन सलोपः । असवर्णे ऽकारस्य लोपः (सू० १।४) । संबन्धषष्ठ्यां किम् । ग्वरस् छुह् नमस्कार् करान् । गुरोर्नमस्कारं करोति । साधनं पूर्ववत् ॥

॥ स्त्रीसंबन्धैकानेकत्वे स्त्रौ ह्न्द्वन्तावेकत्वे ॥४२॥

पुंलिङ्गानां स्त्रीलिङ्गशब्दस्य एकत्वेन संबन्धे सति संबन्धलिङ्गादेकवचने स् ह्न्दु प्रत्ययः स्यात्। बहुत्वेन संबन्धे सत्येकवचने न् ह्न्दु प्रत्ययः स्यात्॥ माज्य ह्न्दु न्यचिवु। मातुः पुत्रः॥ माज्यन् ह्न्दु न्यचिवु। मातॄणां पुत्रः॥ न्यचिवु शब्दस्यैकस्य पुंलिङ्गस्य माजू शब्देन स्त्रीलिङ्गेन संबन्धात्संबन्धलिङ्गात् माजू शब्दात् स् ह्न्दु प्रत्यय न् ह्न्दु प्रत्ययौ। [ऊदितोरकारागमः स्त्रियां सकार (सू० २१) इत्यकारागमः]। स्लोपः स्त्रियां सर्वत्र (सू०४०) इति सकार-लोपः। उवर्णान्तानामिकार (सू० ३०) इत्यनेन ऊमात्राया इकारः। न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः। यत्वम्॥

॥ बहुत्वे ह्न्द्यन्तौ ॥ ४३ ॥

पुंलिङ्गानां स्त्रीलिङ्गस्यैकत्वेन संबन्धे सति संबन्धलिङ्गादेकवचने स् ह्न्दि प्रत्ययः। बहुत्वेन संबन्धे न् ह्न्दि प्रत्ययो भवति॥ माज्य ह्न्दि न्यचिवि। मातुः पुत्राः॥ माज्यन् ह्न्दि न्यचिवि। मातॄणां पुत्राः॥ अत्र न्यचिवि शब्दस्य बहु-वचनत्वात् माजू शब्दात् स् ह्न्दि न् ह्न्दि प्रत्ययौ। स्लोपः। साधनं पूर्ववत्॥

॥ स्त्रियां ह्न्ज़ू अन्तावेकत्वे ॥ ४४ ॥

स्त्रीलिङ्गस्य स्त्रीलिङ्गैकत्वेन संबन्धे सति संबन्धलिङ्गादेकवचने स् ह्न्ज़ू प्रत्ययः स्त्रीलिङ्गानेकत्वेन संबन्धे सति न् ह्न्ज़ू प्रत्ययो भवति॥ माज्य ह्न्ज़ू कूरू। मातुः कन्या॥ माज्यन् ह्न्ज़ू कूरू। मातॄणां कन्या॥ अत्रापि कूरू शब्दस्यै-कत्वात्संबन्धलिङ्गात् माजू शब्दात् स् ह्न्ज़ू न् ह्न्ज़ू प्रत्ययौ। साधनं पूर्ववत्॥

॥ बहुत्वे ह्न्ज़ अन्तौ ॥ ४५ ॥

स्त्रीलिङ्गानां बहुवचने स्त्रीलिङ्गैकानेकत्वसंबन्धतः संबन्धिलिङ्गात् स् ह्न्ज़

न् हन्ज प्रत्ययौ भवतः ॥ माज्य हन्ज कोर्य । मातुः कन्याः ॥ माज्यन् हन्ज कोर्य । मातॄणां कन्याः ॥

॥ पुंप्राणिन एकत्वसंबन्धे हस्य सः सर्वत्र ॥४६॥

पुंलिङ्गस्य प्राणिन एकवचनेन सह संबन्धे सति सर्वत्र स्त्रीलिङ्गे पुंलिङ्गे च हकारस्य सकारो भवति ॥ मा॑लि सं॑न्दु न्यचिवु । पितुः पुत्रः ॥ मा॑लि सन्ज कोर्य । पितुः कन्याः ॥ दान्द सं॑न्दु ह्यंग् । वृषभस्य शृङ्गम् ॥ गु॑रि सं॑न्दु ल॑टु । अश्वस्य पुच्छः ॥ प्राणिनः किम् । कनुकु वाल् । कर्णस्य वालः ॥ च्राँग्युकु तील् । दीपस्य तैलम् ॥ अथुकु माज़् । हस्तस्य मांसम् ॥ अत्र अथ कन् शब्दयोः प्राणित्वसंभवे ऽपि खण्डप्राणित्वादप्राणित्वमेव । प्राणिनः कर्णे छिन्ने ऽपि न कर्णस्य प्राणिसंज्ञा । नापि छिन्नकर्णेन प्राणिनो ऽप्राणित्वम् ॥ पुंलिङ्गस्य किम् ॥ गोवू हं॑न्दु वं॑छु । गावो वत्सः ॥ गोवू हं॑न्जू वं॑छ्रू । गावो वत्सा ॥ कञ्ज हं॑न्दु प्यंतु । शिलाया अग्रम् ॥ कञ्ज हं॑न्जू छल् । शिलायाः खण्डम् ॥ माज्य हं॑न्दु मोलु । मातुः पिता ॥ माज्य हं॑न्जू मा॑जू । मातुर्माता ॥

॥ स्वन् रुप् शब्दयोर्वा ॥ ४७ ॥

स्वन् शब्दस्य रुप् शब्दस्य चैकत्वेन संबन्धे सति सर्वत्र स्त्रीलिङ्गे पुंलिङ्गे च विकल्पेन पुंप्राणिवत्स्वरूपं भवति ॥ स्वन सं॑न्दु कं॑कु । स्वर्णस्य कटकः ॥ रुप सं॑न्दु खोस् । रौप्यस्य कंसः ॥ स्वन सं॑न्जू गंग्जू । स्वर्णस्य गलन्तिका ॥ रुप सं॑न्जू लूर् । रौप्यस्य दण्डः ॥ स्वनुकु छं॑थ्र् । स्वर्णस्य छत्रम् ॥ रुपुकु थाल् । रौप्यस्य थालः ॥ स्वनचू वा॑जू । स्वर्णस्योर्मिका ॥ रुपचू रज् । रौप्यस्य रज्जुः ॥

[४७ अत्र मूलपुस्तके रुप् इति पाठः। शुद्धोच्चारणं तु र्वप् इत्यस्ति ॥]

[४७ स्वनुकु छं॑थ्र्, रुपुकु थाल्, स्वनचू वा॑जू, रुपचू रज्, अस्मिन्वाक्यचतुष्टये

॥ अप्राणिना पुंसोकुक्यौ पुंसि ॥ ४८ ॥

प्राणिव्यतिरिक्तस्य पुंलिङ्गस्य एकत्वेन संबन्धे सति पुंलिङ्गात् उकु कि क्रमेण भवतः । एकवचने उकु प्रत्ययः बहुवचने कि प्रत्ययो भवति ॥ दाञ्चुकु त्वमुल् । धान्यस्य तण्डुलः ॥ हारुकु मुंग् । आषाढस्य मुद्गः ॥ कुलिकि वथ्र् । वृक्षस्य पत्राणि ॥ मार्गकि द्वह् । माघस्य दिवसाः ॥ एकत्वेन किम् । कुल्यन् हंन्दि वथ्र् । वृक्षाणां पत्राणि ॥ कुल्यन् हंन्दु वथ्र् । वृक्षाणां पत्रम् ॥ अप्राणिना किम् ॥ काव सन्दु । काकस्य ॥ गोवू हंन्दु । गोः ॥

॥ चूचौ च स्त्रियाम् ॥ ४९ ॥

स्त्रीलिङ्गानां प्राणिव्यतिरिक्तस्य पुंलिङ्गस्यैकत्वेन संबन्धे संबन्धिपुंलिङ्गादेकवचने चू प्रत्ययः बहुवचने च प्रत्ययो भवति ॥ कुलिचू लंण्ढू । वृक्षस्य शाखा ॥ कुलिच लञ्ज्य । वृक्षस्य शाखाः ॥ नांगचू नांरिज् । नागस्य प्रणालिका ॥ नागच नांरिज । नागस्य प्रणालिकाः ॥ एकत्वेन किम् ॥ कुल्यन् हन्ज़ लञ्ज्य । वृक्षाणां शाखाः ॥ नागन् हन्ज़ नांरिज । अखातानां प्रणालिकाः ॥ अप्राणिना किम् । गुरि सन्ज़ू ज़ंग् । अश्वस्य जङ्घा ॥ कट सन्ज़ झोर्य । मेषस्य खुराः ॥

॥ मनुष्यसंज्ञयोनुन्यौ पुंसि ॥ ५० ॥

मनुष्यनाम्ना संबन्धे सति पुंलिङ्गे एकत्वबहुत्वयोः उनु नि प्रत्ययौ भवतः ॥ गण इति संज्ञा । गणनु न्यचिवु । गणस्य पुत्रः ॥ राधाकृष्ण इति नाम ।

सुवर्णाद्भिन्नं छत्रम्, रौप्यस्याधाराद्यर्थं थाली, स्वर्णाद्यर्थं तद्भिन्नोर्मिका, रौप्यस्य बन्धनार्थं तद्भिन्नरूपा रज्जुरित्येवमर्थो विवक्षितश्चेत्तदा मूलपाठः संगच्छते—अन्यथा स्वर्णमयं छत्रम्, रौप्यमयी थाली, स्वर्णमय्यूर्मिका, रौप्यमयी रज्जुरस्मिन्नर्थे, स्वन संन्दु छथ्र्, वंप संन्दु थाल्, स्वन संन्ज़ू वाज़ू । वंप संन्ज़ू रज़् इत्येवं रूपाणि शुद्धानि सन्तीति ॥]

राधाकृष्णानि गुरि । राधाकृष्णस्याश्वाः ॥ ड्यकुनु बत । ललाटस्य भक्तम् ॥ अत्र ड्यक शब्दस्य दैवार्थकत्वात् उनु प्रत्ययः । अन्यत्र ड्यकुकु रथ् । ललाटस्य रक्तम् ॥

॥ स्त्रियां ञ्ञौ च ॥ ५१ ॥

स्त्रीलिङ्गस्य मनुष्यनाम्ना संबन्धे सति संबन्धिलिङ्गादेकबहुवचनयोः ञ् ञ प्रत्ययौ भवतः ॥ मनु इति नाम । मनिञ् कूरू । मनु इत्यस्य कन्या ॥ मनिञ कोर्य । मनु इत्यस्य कन्याः ॥ कृपाराम इति नाम । कृपारामञ् मांजू । कृपारामस्य माता ॥ कृपारामञ ब्यञ । कृपारामस्य भगिन्यः ॥

॥ सप्तम्यां स्नावन्दर्मन्ज़्प्यठन्तौ स्वार्थभेदतः ॥५२॥

स्नौ प्रत्ययौ । अन्दर् अन्तौ । मन्ज़् अन्तौ । प्यठ् अन्तौ । स्वस्वार्थभेदतः सप्तम्यां प्रत्ययौ भवतः । अन्तरार्थे अन्दरन्तौ । मध्यार्थे मन्ज़न्तौ । उपर्यर्थे प्यठन्ता विति ॥ अन्तर्वाणिभाषायां तु वेषान्तावपि प्रयुज्येते इति निर्णेयम् ॥ गरस् अन्दर् । गृहस्यान्तरे ॥ नावि मन्ज़् । नौकाया मध्ये ॥ गरन् अन्दर् । गृहाणामन्तरे ॥ नावन् मन्ज़् । नौकानां मध्ये ॥ गुरिस् प्यठ् । अश्वस्योपरि ॥ गुर्यन् प्यठ् । अश्वानामुपरि ॥ गर शब्दात् स् अन्दर् न् अन्दर् प्रत्ययौ ॥ न्प्रत्यये सर्वत्र (सू० १२) इत्यकारागमः । अकारे ऽकारलोपः (सू० १ । ५ क) । नाव् शब्दात् स् मन्ज़् न् मन्ज़् प्रत्ययौ । स्लोपः सर्वत्र (सू०४०) इति सकारलोपः । स्त्रियामिकार (सू० ३७) इति इकारागमः ॥ गुरु शब्दात् स् प्यठ् न् प्यठ् प्रत्ययौ । उवर्णान्तानामिकार (सू० ३०) इति उकारस्य इकारः । न्प्रत्यये सर्वत्र (सू० १२) इत्यकारागमः । यत्वम् ॥

॥ अधिकरणे क्यथन्तौ ॥ ५३ ॥

स् नौ प्रत्ययौ क्यथ् अन्तावाधारसप्तम्या एकत्वबहुत्वयोः प्रत्ययौ भवतः ॥ थालस् क्यथ् । थाले ॥ नावि क्यथ् । नौकायाम् ॥ थालन् क्यथ् । थालेषु ॥ नावन् क्यथ् । नौकासु ॥

॥ चतुर्थ्यां कितुकिचूअन्तौ पुंस्त्रीकर्मैकतः ॥ ५४ ॥

वाक्येषु पुंलिङ्गैकत्वे कर्मणि सति स् नौ प्रत्ययौ कितु अन्तौ स्त्रीलिङ्गैकत्वे कर्मणि स् नौ किचू अन्तौ चतुर्थ्यामेकत्वबहुत्वयोः प्रत्ययौ भवतः ॥ मालिस् कितु अनुन् पोत्रु । पित्रे [तेन] आनीतं पानीयम् ॥ मालिस् किचू अनून् गाव् । पित्रयानीता गौः ॥

॥ किति किचान्तौ कर्मबहुत्वतः ॥ ५५ ॥

वाक्ये पुंलिङ्गस्य बहुत्वे कर्मणि सति स् नौ प्रत्ययौ किति अन्तौ स्त्रीबहुत्वे कर्मणि सति स् नौ किच अन्तौ चतुर्थ्यां प्रत्ययौ भवतः ॥ गुरिस् किति अनिन् रव । अश्वायानीताः कम्बलाः ॥ गुर्यन् किति । अश्वेभ्यः ॥ ग्वरस् किच अञ्जन् पोथ्य । गुरवे आनीतानि पुस्तकानि ॥ ग्वरन् किच । गुरुभ्यः ॥ अत्रेदं ध्येयम् । कर्मधातूनां कर्मणः स्त्रीपुंकर्मानुसारतः प्रोक्ताः प्रत्यया विज्ञेयाः । कर्तृधातूनां तु कर्तुः स्त्रीपुंलिङ्गैकवचनबहुवचनानुसारतो बोध्याः ॥ यथा । व्यठनस् कितु आव् । स्थूलीभवनायागतः ॥ व्यठनस् किति आय् । स्थूलीभवनायागताः ॥

॥ कर्तृतृतीयायामिदौतौ ॥ ५६ ॥

तिसृषु कर्तृतृतीयाहेतुतृतीयासहार्थतृतीयासु मध्यात् इदौतौ इ औ

इत्येतौ प्रत्ययौ कर्तृतृतीयाया एकत्वबहुत्वयोः प्रत्ययौ भवतः । अत्रापि पुंलिङ्गे इकारस्यार्धमात्रता बोध्या । स्त्रीलिङ्गे तु पूर्णता विज्ञेया ॥ गुरि मोरु । अश्वेन हतः ॥ तिपि वंनु । तेन वणितम् ॥ गुर्यौ मोरु । अश्वैर्हतः ॥ तिमौ वंनु । तैर्वणितम् ॥ कोरि दंपु । कन्यया प्रोक्तम् ॥ कोर्यौ दंपु । कन्याभिः प्रोक्तम् ॥

॥ अन्द्रान्तौ निर्धारणे च ॥ ५७ ॥

इ औ प्रत्ययौ अन्द्र अन्तौ निर्धारणे एकत्वबहुत्वयोः प्रत्ययौ भवतः । एकत्वे इ अन्द्र प्रत्ययः । बहुत्वे औ अन्द्र प्रत्ययो भवति ॥ गर अन्द्र छुह् जान् लँक । गृहे ऽमुकः साधुरस्ति ॥ गरौ अन्द्र छुह् जान् आँगुन् । गृहाणां साध्वङ्गनमस्ति ॥

॥ अकारव्यञ्जनान्तानां पुंस्येकवचने वा-ऽन ऽसर्वनाम्नाम् ॥ ५८ ॥

चानुकृष्टं नानुवर्तते इति निर्धारण इति निवृत्तम् । पुंलिङ्गानामकारव्यञ्जनान्तानां कर्तृतृतीयाया एकत्वविषये विकल्पेन अन् भवति असर्वनाम्नाम् सर्वनामशब्दान्वर्जयित्वा । तत्रेदानन्तिनभाषायामन्प्रत्यय एव साधुतयोच्चार्यते । इ प्रत्ययविकल्पः प्राचीनभाषयैवेति बोध्यम् ॥ ईश्वरन् दंपु । ईश्वरेणोक्तम् ।

[५७ । गर अन्द्र छुह् जान् लँक । ईदृशेषु वाक्येषु स्वरे परे ऽपि (सू० ४) उक्तो विधिरिप्रत्ययलोपो ऽवगन्तव्यः ॥ किं चैतद्वाक्यार्थे विवक्षिते प्रायशो गर मन्ज़ छुह् जान् लँक इत्येवं रूपवाक्यमेवोच्चार्यते इति । एवं गाम अन्द्र इत्यादिष्वपि ज्ञेयम् ॥]

[५८ । ऊमात्रान्तानामपि क्वचित्प्रत्ययादिलोपश्चेष्यते ॥ कर्तृतृतीयाया एकत्वे अन् प्रत्ययस्तदाद्यक्षरस्याकारस्य च लोप इत्यर्थः ॥ दानून् गन्जून् हान्जून् इत्यादि ॥]

दंयि दंपु । ईश्वरेणोक्तम् ॥ ड्यकन् कंरु । ललाटेन कृतम् ॥ खरन् नंचु । खरेण नर्तितम् ॥ अकारव्यञ्जनान्तानां किम् । शुंरि वंदु । बालेन रुदितम् ॥ पुंसि किम् । जंगि लोयु । जङ्घया क्षिप्तम् ॥ एकवचने किम् । ईश्वरौ दंपु । ईश्वरैः प्रोक्तम् ॥

॥ हेतौ सूंतिन्नन्तौ सूंत्यन्तौ वा ॥ ५९ ॥

इ औ प्रत्ययौ सूंतिन् अन्तौ सूंत्य् अन्तौ वा हेतुतृतीयायामेकत्वबहुत्वयोः प्रत्ययौ भवतः । अत्र इकारस्य पूर्णता बोध्या ॥ अथ सूंतिन् ख्योन् । हस्तेन भुक्तम् ॥ अथौ सूंतिन् ख्योन् । हस्तैर्भुक्तम् ॥ श्राकि सूंतिन् मोरुन् । छुरिकया हतः ॥ श्राकौ सूंतिन् मोरुन् । छुरिकाभिर्हतः ॥ खुर सूंत्य् आव् । पादेनागतः ॥ खुरौ सूंत्य् गौव् । पादैर्गतः ॥

॥ सहार्थायां स्नौ ॥ ६० ॥

स्न् प्रत्ययौ सूंतिन् अन्तौ सूंत्य् अन्तौ वा सहार्थतृतीयायामेकत्वबहुत्वयोः प्रत्ययौ भवतः ॥ मांलिस् सूंतिन् आव् । पित्रा सहागतः ॥ बांयिस् सूंतिन् म्यूलु । भ्रात्रा सार्कं संगतः ॥

॥ हेतोः संबन्धषष्ठीकर्तृतृतीययोः प्रयोगलिङ्गात्प्रत्ययौ वा ॥ ६१ ॥

हेतुभूतस्याश्वादेर्यः संबन्धषष्ठीप्रयोगः कर्तृतृतीयाप्रयोगो वा स एव लिङ्गं तस्मात्प्रोक्तौ इ सूंतिन् औ सूंतिन् प्रत्ययौ वा इ सूंत्य् औ सूंत्य् प्रत्ययौ हेतुतृतीयाया एकत्वबहुत्वयोर्भवतः । लिङ्गग्रहणं तु तेषां प्रयोगानामागमादेशाद्यर्थम् ॥ गुंरि सन्दि सूंतिन् आव् । अश्वेनागतः ॥ नावि हन्दि सूंत्य् वोतु । नौकया प्राप्तः ॥ महनिव्यन् हन्दि सूंत्य् गौव् । पुरुषैर्गतः ॥ गुरि सूंत्य् आव् ।

अश्वेनागतः ॥ नावि सूत्य् वोतु । नौकया प्राप्तः ॥ महनिव्यौ सूत्य् गौव् । पुरुषैर्यातः ॥ गुरि सन्दु शब्दात् इ सूतिन् प्रत्ययः । उवर्णान्तानामिकार (सू० ३०) इत्यनेन सन्दु इत्यस्य उकारस्य इकारः । एवं सर्वेषाम् ॥

॥ खुत निश वा ऽपायपञ्चम्याम् ॥ ६२ ॥

तस्मादेव संबन्धषष्ठीप्रयोगलिङ्गात्तृतीयाप्रयोगलिङ्गाद्वा खुत प्रत्ययो निश प्रत्ययो वा अपायपञ्चम्याः स्वरूपं भवति । निशस्थाने निशिन् इति खुतस्थाने खुतन् इति च व्यवह्रियत इति बोध्यम् ॥ ग्वर सन्दि खुत छुह् गाडुलु । गुरोः सकाशादक्षो ऽस्ति ॥ यद्वा । कञ्ज हन्दि खुत छुह् त्रकुरु । शिलायाः कठिनो ऽस्ति ॥ रुप निश छुह् स्वन् जान् । रौप्यात्स्वर्णं साध्वस्ति ॥ यद्वा । रुपौ खुत छिह् द्यार् जान् । रौप्याद्धनं शुभमस्ति ॥

॥ सामान्यचतुर्थ्यां पुछ्य् ॥ ६३ ॥

संबन्धषष्ठीप्रयोगलिङ्गात्तृतीयाप्रयोगलिङ्गाद्वा चतुर्थ्यां पुछ्य् प्रत्ययः स्यात् । एकबहुत्वे लिङ्गादेव बोध्येते ॥ पुत्र पुछ्य् आव् । पुत्रायागतः ॥ यद्वा । पुत्र सन्दि पुछ्य् । पुत्राय ॥ पुत्रौ पुछ्य् आव् । पुत्रेभ्य आगतः ॥ यद्वा । पुत्रन् हन्दि पुछ्य् । पुत्रेभ्यः ॥

॥ उकुप्रत्ययस्योकारस्याऽकारः ॥ ६४ ॥

षष्ठीप्रयोगसंबन्धिन उकु प्रत्ययोकारस्य अकारः स्यात् ॥ पव्यकि पुछ्य् । और्णवस्त्राय ॥ पव्युकु प्रयोगलिङ्गात्पुछ्य् प्रत्ययः । अनेन उकारस्य अकारः । उवर्णान्तानाम् (सू०३०) इति इकारागमः ॥

॥ पञ्चम्यामिदौतौ प्यठान्तौ निशान्तावन्द्रान्तौ वा ॥६५॥

लिङ्गात् इ औ प्रत्ययौ प्यठ अन्तौ वा निश अन्तौ वा अन्द्र अन्तौ पञ्चम्या एकत्वबहुत्वयोः प्रत्ययौ भवतः । ते च स्वस्वस्थानेषु प्रयुज्यन्ते ॥ गाम प्यठ । ग्रामात् ॥ सर्प निश । सर्पात् ॥ गामौ प्यठ । ग्रामेभ्यः ॥ सर्पौ निश । सर्पेभ्यः ॥ गर अन्द्र द्राव् । गृहान्निर्गतः ॥ नावि अन्द्र द्राव् । नावो निर्गतः ॥

॥ वर्गप्रथमान्तानां प्रथमायां द्वितीयः ॥६६॥

वर्गप्रथमान्तानां लिङ्गानां प्रथमाविभक्तौ स्वस्ववर्गसंबन्धी द्वितीयाक्षरो भवति ॥ त्रख् । द्रोणः ॥ काछ् । काचः ॥ कठ् । मेषः ॥ त्रख् । द्रोणाः ॥ काछ् । काचाः ॥ कठ् । मेषाः ॥ हथ् । शतम् ॥ हथ् । शतानि ॥ ताफ् । आतपः ॥ ताफ् । आतपाः ॥ प्रथमायां किम् । त्रक सूतिन् । द्रोणेन ॥ काच सूतिन् । यक्ष्मणा ॥ कट पुछ्य् । मेषाय ॥ हतुकु । शतस्य ॥ तापस् प्यठ् । आतपोपरि ॥

॥ स्त्रियामेकवचन एव ॥ ६७ ॥

स्त्रीलिङ्गे वर्तमानस्य वर्गप्रथमान्तस्य प्रथमाया एकवचने एव स्वस्ववर्गद्वितीयाक्षरो भवति ॥ क्रख् । कोलाहलः ॥ रछ् । गुञ्जा ॥ नठ् । कम्पः ॥ वथ् । मार्गः ॥ त्राफ् । भुक्तिः ॥ एकवचने किम् । क्रक । कोलाहलाः ॥ रच । गुञ्जाः ॥ नट । कम्पाः ॥ वत । मार्गाः ॥ त्राप । भुक्तयः ॥ एवं । द्वितीयादिविभक्तिषु बोध्यम् ॥

॥ न संयोगे तचोः ॥ ६८ ॥

लिङ्गान्ते पूर्ववर्णसंयुक्तयोस्तकारचकारयोर्द्वितीयाक्षरादेशो न भवति ॥

[६५ । गर अन्द्र । अत्रापि (सू० ५७) लिखितसंकेतो (नोट्) द्रष्टव्यः ॥

स्च्। सौचिकः ॥ बत्च । वर्तिका ॥ ब्वक्च्। बाला शुनी ॥ मक्च् । परशुः ॥ मस्त् । शिरोरुहः॥ नस्त्। नासिका ॥ तच्चोः किम् । रेम्फ्। अल्पार्थः॥ च्राम्फ्। सान्त्वम् ॥ संयोगे किम् । रथ् । रक्तम् ॥ ऋछ्। उपजातिः ॥

॥ उदन्तानामोदुपधाया आत्वमप्रथमैकत्वे ॥६९॥

प्रथमैकवचनं वर्जयित्वा उदन्तानामुकारान्तानां लिङ्गानामुपधाभूतो य ओकारस्तस्य आत्वं भवति शेषासु विभक्तिषु । तत्रादेशागमादिना इकारान्तीभूतस्थाने उपधाया वक्ष्यमाणसूत्रेण (सू०७०) अप्रसिद्धता विज्ञेया ॥ मा॑लि । पितरः ॥ मा॑लिस्। पितरम् ॥ मा॑लि सन्दु । पितुः ॥ वा॑लि। कुण्डलानि ॥ वा॑लिस् । कुण्डलम् ॥ वा॑लि दंपु । कुण्डलेनोक्तम् ॥ बा॑यि । भ्रातरः ॥ बा॑यिस । भ्रातरम् ॥ बा॑यि सन्दु। भ्रातुः॥ मोलु । वोलु । बोयु शब्देभ्यः । उवर्णान्तानामिकार (सू०३०) इति सूत्रेण उमात्राया इकारमात्रादेशः । अनेनोपधाया ओकारस्य आत्वम् । उदन्तानां किम् । पोष् । पुष्पाणि ॥ पोष सूतिन् । पुष्पेण ॥

॥ इदुदूदन्तानामवर्णाप्रसिद्धता ॥ ७० ॥

इमात्रान्तानामुमात्रान्तानामूमात्रान्तानां च लिङ्गानां शब्दानां चोपधाया अवर्णस्याप्रसिद्धता निर्णेया । उदाहरणानि पूर्वसूत्रोक्तानि (सू०६९) । अन्यान्यपि यथा ॥ पंटु [। और्णवस्त्रम्] ॥ हंटु [। कण्ठः] ॥ तंनु [। तनुः] ॥ इत्यादीनां शब्दानां स्वयमुकारमात्रान्तत्वादुपधाया अकारस्याऽप्रसिद्धता । एषामेव शब्दानाम् । उवर्णान्तानाम् (सू०३०) इत्यादिसूत्रेण बहुत्वविषये उकारस्य इकारे कृते इकारान्तीभूतत्वात्तत्राप्यप्रसिद्धता ॥ पंटि । हंटि । तंनि ॥ ऊमात्रान्तानां यथा ॥ मांजू

[७० । येषां शब्दानां पूर्वसूत्रेण (६९) उपधाभूतस्योकारस्याकारः कृतस्तेषामेव तस्योपधाकारस्य द्वितीयैकत्वे ऽप्रसिद्धता विज्ञेया । यथा । मा॑लिस् बा॑यिस् इत्यादि । नत्वन्येषामिदुदूदन्तानाम् । यथा । पटिस् करिस् इत्यादि ॥]

[। माता] ॥ कांठू [। काष्ठम्] ॥ अत्र स्वयमूपात्रान्तत्वादप्रसिद्धता। बहुत्वे तु। बहुत्वे ऽकारागमे (सू० ११) इति सूत्रेणाकारागमे कृते। ऊदन्तटवर्गस्य (सू० २२) इत्यादिना टकारस्य छकारे च कृते। उवर्णान्तानामिकारः (सू० ३०) इत्यूकारस्य इकारः यत्वे च कृते उपधाया अकारस्य प्रसिद्धता सिद्धा इति [। माज्य। काछ्य] ॥

॥ ज़ाम ओत्वं परस्वरलोपश्च ॥ ७१ ॥

ज़ाम् शब्दस्योपधाया ओत्वं भवति तस्मात्परस्य प्रत्ययागमादिजस्य स्वरस्य च लोपः स्यात् अप्रथमैकत्वे ॥ ज़ोम्। ननन्दरः ॥ ज़ोम् वन्। ननन्दरं वद ॥ ज़ोम्न्। ननन्दृः ॥ ज़ोम् दंपु। ननन्द्रोक्तम् ॥ ज़ोम्ब्। ननन्दृभिः ॥ ज़ोम् हन्दु। ननन्दुः ॥ इत्यादि ॥

॥ गाव् शब्दस्यौकारः ॥ ७२ ॥

गाव् शब्दसंबन्धिन उपधाया आकारस्य ओकारो भवति प्रथमैकवचनं वर्जयित्वा ॥ गोवू। गावः। गोवून्। गावः ॥ गोवू हन्दु। गोः ॥ गाव् शब्दात्सर्वत्रानेनोपधाया ओकारे कृते। यङ्गाव्कठ्थर्वडां च कृतादेशविधि (सू० १७) रिति सूत्रेण अकारागमनिषेधः ॥

॥ उदन्तत्र्यक्षराणामुकारस्याकारः ॥ ७३ ॥

उदन्तानां त्र्यक्षरादीनां लिङ्गानामुपधाभूतस्य उकारस्य अकारो भवति प्रथमैकवचनं वर्जयित्वा ॥ गाटलिस्। दक्षम् ॥ गाटल्यन्। दक्षान् ॥ गाटल्यौ। दक्षैः ॥ गाटलिस् प्यठ। दक्षात् ॥ गाटुलु शब्दात्। द्वितीयायां स्नौ (सू० ३८) स् न् प्रत्ययौ। उवर्णान्तानामिकारः (सू० ३०)। न्प्रत्यये सर्वत्र (सू० १२) अकारागमः। अनेनोपधाया अकारः। त्र्यक्षराणां किम्। कुलिस्। वृक्षम् ॥ कुल्यन्। वृक्षान् ॥

॥ न क्वछ़लादीनां शेषं कर्म ॥ ७४ ॥

क्वछ़ुलु । च्वतुलु । चकुलु । ग्वगुलु । वातुलु । बतुकु । गगुरु । म्वंगुरु । इत्यादयः ॥ एषां शब्दानामुकारान्तलिङ्गशेषक्रिया न भवति किंतु उपधाया अकारादेशो भवति ॥ क्वछ़ल् । भारिकाः ॥ च्वतल् । स्वव्यभिचारकारयितारः ॥ चकल् । चक्राकाराः ॥ ग्वगल् । वर्तुलाकाराः ॥ वातल् । चण्डालाः ॥ बतक् वर्तकाः ॥ गगर् । मूषकाः ॥ म्वंगर् । छागपोताः ॥

॥ इकारे लोपः ॥ ७५ ॥

त्र्यक्षराधिकानामुकारान्तानामिकारे परे उपधाया उकारस्य लोपो भवति ॥ गाट्लि । दक्षाः ॥ गाट्लि वंनु । दक्षेणोक्तम् ॥ गाट्लि सन्दि पुछ्य् । दक्षाय ॥ गाट्लि संन्दु । दक्षस्य ॥ साधनं पूर्ववत् ॥ इकारे किम् । गाटलिस् । दक्षम् ॥ साधितचरमेव ॥

॥ युकारोपधाया इत् ॥ ७६ ॥

उकारान्तानां लिङ्गानामुपधाभूतस्य युकारस्य इत् भवति । प्रथमैकवचनं वर्जयित्वा ॥ ज़िठि । वृद्धाः ॥ ज़िठिस् । वृद्धम् ॥ ज़्युंठु शब्दात् । उवर्णान्तानाम् (सू० ३०) इत्यनेन इकारे कृते । अनेन यु उपधाया इत्वम् ॥

[७६।७९ ॥ महन्युवु । महनिवु ॥ न्यच्युवु । निचिवु ॥ क्युतु । कितु ॥ ज़्युंठु । ज़िठु ॥ इत्यादयः शब्दा उभयरूपेणात्र लिखिता अपि प्रथमरूपेणैव महन्युवु इत्याद्यात्मकेन शुद्धोच्चारणाः संगताश्चावगन्तव्याः ॥]

॥ यूकारस्येसोरीत् ॥ ७७ ॥

उकारान्तानां लिङ्गानाम् इ स् इत्येतयोः परयोरुपधाया यूकारस्य ईकारो भवति ॥ क्षीनि । भित्तयः ॥ क्षीनिम् । भित्तिम् ॥

॥ शेषेष्वेकारः ॥ ७८ ॥

उकारान्तानां यूकारोपधायाः शेषप्रत्ययेषु एकारो भवति ॥ क्षेन्यन् । भित्तीः ॥ क्षेन्यौ सूतिन् । भित्तिभिः ॥ क्षेन्युकु । भित्तेः ॥ क्षेन्यन् ष्यट् । भित्तिषु ॥ साधनं पूर्ववत् ॥

॥ न गुरुत्वं ह्रस्वस्य संयोगे ॥ ७९ ॥

संयोगे परे पूर्ववर्णसंबन्धिनो ह्रस्वस्य गुरुत्वं नोच्चार्यते इति परिभाष्यते ॥ महन्युकु । पुमान् ॥ अत्र हकारसंबन्धिनः अकारस्य न गुरुत्वम् । एवं सर्वत्र विज्ञेयम् ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
लिङ्गप्रकरणे लिङ्गपादः प्रथमः ॥ २ । १ ॥

[७७ । न्यूलु शब्दस्य सर्वत्र ॥ सर्वेषु प्रत्ययेषु परेषूपधाया ईकारो विधेय इत्यर्थः । नील्यन् । नील्यौ सूतिन् । इत्यादि ॥]

अथ लिङ्गप्रकरणे ॥२॥

संबुद्धिपादः ॥२॥

॥ आमन्त्रणे ॥१॥

इत उत्तरं ये प्रत्ययास्त आह्वाने विज्ञातव्याः ॥

॥ पुमादराह्वाने विशिष्टान्नाम्नो वा पूर्वं हे ॥२॥

पुंसा पुरुषस्यादरेण संबोधने कर्तव्ये जात्यादिना जुव् शब्दादिना विशिष्टान्नाम्नो वा शब्देन केवलान्नाम्नो वा पूर्वं हे शब्दः प्रयोज्यः ॥ हे नारान् जुव् ॥ हे गण कौल् ॥

॥ अन्ते सा प्रत्ययश्च ॥३॥

तस्मादेव हे-शब्दपूर्वाद्विशिष्टात्केवलान्नाम्नो वा आदरसंबोधनविषये सा प्रत्ययो भवति ॥ हे नारान् जुव् सा ॥ हे राम कौल् सा ॥ हे नारान् सा ॥

॥ हतसाहे पूर्वं वा ॥४॥

तस्मादेव विशिष्टात्केवलाद्वा नाम्नः हतसाहे शब्दः वा पूर्वं प्रयोज्यः । तकारः सर्वत्र विकल्पेन बोध्यः ॥ हतसाहे नारान् जुव् ॥ हतसाहे राम कौल् ॥ वा । हतसाहे नारान् जुव् सा ॥ हतसाहे राम कौल् सा ॥ विकल्पे तु ॥ हसाहे

नारान् जुब् । इत्यादि ॥ केवलान्नाम्नस्तु सा प्रत्ययो ऽवश्यं प्रयोज्यः ॥ हतसाहे गण सा ॥ हतसाहे गण इति न भवति ॥

॥ वा प्रत्ययः पुरोहितसामान्यदासेषु ॥५॥

पुरोहितस्य श्राद्धादिकारयितुः सामान्यजनस्य दासस्य च संबोधने कर्तव्ये केवलान्नाम्नो वा प्रत्ययो भवति हे शब्दश्च पूर्वं प्रयोज्यः ॥ हे नारान् वा ॥ केवलान्नाम्नः किम् ॥ हे गण ब्रेट् वा । इति तु न भवति । ब्रेट् अत्र जातिर्विज्ञेया ॥

॥ हतसाहे पूर्वं वा वृद्धेषु ॥६॥

तेषु पुरोहितादिषु वृद्धेषु सत्सु हतसाहे पूर्वं प्रयोज्यः । वा शब्दात् हतबाहे च ॥ हतसाहे सहज् वा ॥ हतबाहे जन वा ॥

॥ आ प्रत्ययः कनिष्ठनीचयोः ॥७॥

कनिष्ठस्य नीचस्य च संबोधने कर्तव्ये विशिष्टात्केवलान्नाम्नो वा आ प्रत्ययः स्यात् ॥

॥ हताशब्दः पूर्वं च ॥८॥

स्पष्टम् ॥ हता माना ॥ हता मान कौला ॥ हता गुल्या ॥ तृतीयस्यात्र गुलु शब्दस्योकारान्तत्वादुवर्णान्तानामिकार (सू० २।१।३०) इत्यनेन सूत्रेण इकारः । यत्वम् ॥ व्यञ्जनं परेण संधेयम् (सू० १।३) । इत्थं पुंलिङ्गानां स्त्रीलिङ्गानां च यत्किंचिद्द्वितीयादिष्वागमादिकमभिहितं तत्सर्वं संबोधने चावधार्यम् ॥

॥ हा दूरविषादयोराप्रत्ययस्य चोकारः ॥९॥

स्पष्टम् ॥ हा नारानो ॥ हा काको ॥

॥ हतो वा ॥१०॥

नाम्नः पूर्वं दूरतो विषादतो वा संबोधने विधेये सति हतो शब्दः पूर्वं वा प्रयोज्यः ॥ हतो पर्यो ॥

॥ मांजू प्रत्ययो वृद्धास्त्रियो नाम्नः ॥११॥

पुरुषेण वृद्धाया ज्येष्ठायाः स्त्रियाः संबोधने कर्तव्ये केवलान्नाम्नो मांजू प्रत्ययो भवति ॥

॥ बिञ् सामान्यायाः ॥१२॥

सामान्यायास्तुल्यायाश्च स्त्रिया आह्वाने बिञ् प्रत्ययः अग्रे प्रयोज्यः ॥

॥ हतपूर्वौ पूर्वे च ॥१३॥

तौ मांजू बिञ् प्रत्ययौ हतशब्दः पूर्वो ययोस्तथाविधौ पूर्वं च प्रयोज्यौ ॥ हतमांजू पार्वत् मांजू ॥ हतबिञ् सरस्वत् बिञ् ॥ वा। हतबिञ् पार्वत् मांजू ॥

॥ य् प्रत्ययः कनिष्ठनीचयोः ॥१४॥

पुरुषेण कनिष्ठाया नीचाया वा संबोधने कर्तव्ये नाम्नः य् प्रत्ययो भवति। तत्र नीचायां वृद्धायां सत्यां पूर्वप्रयुक्तप्रत्ययादग्रे वा प्रयोज्यः ॥

॥ हा हत हतां पूर्वः पूर्वे च ॥१५॥

स एव य् प्रत्ययः हापूर्वो हतपूर्वो हतांपूर्वो वा नाम्नः पूर्वं प्रयोज्यः ॥ हाय् वछ़रिय् ॥ हतय् वछ़रिय् ॥ हतांय् वछ़रिय् ॥

॥ स्त्रियादराहूते पुंनाम्नो वा प्रत्ययः ॥१६॥

स्त्रिया पुरुषस्यादरेणाहाने कर्तव्ये पुंनाम्नो वा प्रत्ययो भवति ॥ तत्र प्रायः पुरोहितादिष्वेवात्र प्रयुज्यते ॥

॥ औ प्रत्ययः प्रियकनिष्ठयोः ॥१७॥

स्पष्टम् ॥

॥ हतपूर्वौ पूर्वं च ॥१८॥

तौ वा औ प्रत्ययौ हतपूर्वौ हत शब्दः पूर्वं ययोस्तथाविधौ पूर्वं च प्रयोज्यौ॥ हतवा हिमत् वा ॥ हतौ हिमत् कोलौ ॥ हतवा काकौ ॥ हतौ काकौ ॥

॥ अ वा ॥१९॥

नाम्नः अग्रे अप्रत्ययो वा प्रयोज्यः ॥ हतवा काक ॥ हतौ गण ॥

॥ बाय बायौ सामान्यसंज्ञायाश्च ॥२०॥

सामान्यसंज्ञाया लोकेषु ख्यातायाः परौ बाय बायौ वा प्रयोज्यौ ॥ हत बा महादेव बाय ॥ हतौ महादेव बायौ ॥ सामान्य संज्ञायाः किम् । हत बा काक बाय । इति न भवति ॥ काक् शब्दस्य पित्रादिष्वेव विशिष्टत्वात् ॥

॥ दूरे पूर्वं हतोव् च ॥२१॥

स्त्रिया पुरुषस्याह्वाने दूरतः कर्तव्ये हतोव् शब्दः पूर्वं प्रयोज्यः ॥ हतोव मनसा रामौ ॥

॥ पत्याह्वाने म्लेच्छयापि ॥२२॥

म्लेच्छस्त्रिया भर्तुराह्वाने कर्तव्ये नाम्नो हतोव् शब्दः प्रयुज्यते ॥

॥ ब्राह्मण्यां पतिसंबोधनाभावः ॥२३॥

॥ केवलो हतशब्दः क्वचिन्नैकट्ये ॥२४॥

क्वचिद्विविक्ते निकटस्थस्य भर्तुराह्वाने कर्तव्ये नामजात्यादिरहितः केवलो हतशब्दः प्रयुज्यते ॥

॥ स्त्रीसंबोधने पुंवत् ॥२५॥

स्त्रिया स्त्रियः संबोधने कर्तव्ये पुंवत् प्रत्यया भवन्ति ॥ यथा पुरुषेण स्त्रीसंबोधनं क्रियते तथैव स्त्रियापीत्यर्थः ॥

॥ अङ्गीकारे संबोधनमुख्यप्रत्यया आहन्शब्दात्परा उक्त्युपक्रमे ॥२६॥

अङ्गीकारे कर्तव्ये प्रोक्ताः संबोधनस्य मुख्याः प्रत्यया उक्तेरारम्भे आहन् शब्दात्परे प्रयोज्याः ॥ आहन्सा॑ ॥ आहन्बा ॥ आहनो ॥ आहन् मा॑जू ॥ आहन् बिञ् ॥ आहनिय् ॥ आहनू ॥ आहनुव् ॥

॥ हपूर्वाश्च केवलक्रियाया अन्ते ॥२७॥

केवलक्रियाया अङ्गीकारे कर्तव्ये ते सा॑ आदिप्रत्यया हपूर्वाः केवलक्रियायाश्चान्ते प्रयोज्याः ॥

॥ वर्तमानायां प्रत्ययादावेव ॥२८॥

वर्तमानायां विभक्तौ ते हपूर्वाः सा आदि प्रत्ययाः प्रत्ययात्पूर्वं प्रयोज्याः ॥ आहन्सा करान् हसा छुह् ॥

॥ तदभावे नपूर्वाः ॥२९॥

तस्याङ्गीकारस्याभावे सति नपूर्वा वाक्यारम्भे क्रियान्ते च प्रयोज्याः ॥ नबा करान् नबा छुह् ॥ एवमन्यत् ॥

॥ कर्मयुक्तायाः कर्मान्ते ॥३०॥

कर्मयुक्तायाः क्रियाया अङ्गीकारे अभिधेये सति वाक्यारम्भे आहन्सा आदयो भवन्ति कर्मान्ते तु हसा आदयो भवन्ति ॥ आहन्सा बत हसा छुह् रनान् ॥

॥ कर्तृयुक्तायाः कर्तुरन्ते च ॥३१॥

कर्तृकर्मयुक्तायाः क्रियायाः अङ्गीकारे गम्यमाने वाक्यारम्भे आहन्सा आदयः प्रयोज्याः कर्तुरन्ते हसा आदयो भवन्ति ॥ आहन्सा नारान् हसा छुह् पूथि परान् ॥ आहन्बा राम हबा छुस् न्यन्दूर् करान् ॥ इत्यादयो बुद्धिमता स्वयमूह्याः ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
लिङ्गप्रकरणे संबुद्धिपादो द्वितीयः ॥२॥२॥

अथ लिङ्गप्रकरणे ॥२॥

सर्वनामपादः ॥३॥

॥ तिह् यिह् क्याह् इह् हुह् शब्दाः पुंस्यप्राणिनि ॥१॥

प्राणिव्यतिरिक्तानां तदादीनां पुंसि तिह् आदयः शब्दा भवन्ति ॥ तद् शब्दस्य तिह् । यद् शब्दस्य यिह् । किम् शब्दस्य क्याह् । इदम् शब्दस्य इह् । अदस् शब्दस्य हुह् शब्दो बोध्यः ॥ प्रथमैकवचनं सर्वत्र लिङ्गवदेव ज्ञेयम् ॥

॥ सुह् युस् कुस् इह् हुह् शब्दाश्च प्राणिनि ॥२॥

प्राणिनां मनुष्यादीनां तदादिशब्देषु सुह् आदिशब्दा अवधार्याः ॥ सुह् । सः ॥ युस् यः ॥ कुस् । कः ॥ इह् । अयम् ॥ हुह् । असौ ॥ अत्राप्येकवचनं लिङ्गवत् ॥

॥ उकारोपधायाः स्त्रियां वत्वमप्राणिनि च ॥३॥

प्राणिनां स्त्रीलिङ्गानां तदादिशब्देष्वभिधेयेषु सुह् आदिशब्दानामुपधाभूतो य उकारस्तस्य वत्वं भवति अप्राणिनि स्त्रीलिङ्गे च ॥ स्वह् । सा । वा स । सा ॥ हह् । असौ ॥

॥ युस्कुसोरन्त्यस्य द्वित्वमकारागमश्च ॥४॥

युस् कुस् इत्येतयोः शब्दयोः स्त्रियामन्त्यस्य द्वित्वं भवति अकारागमश्च ॥ य्यस्स । या ॥ क्कस्स । का ॥

॥ उभयेषां तम् यम् कम् इम् हुमो द्वितीयाद्येकवचनेषु ॥५॥

उभयेषां प्राणिवाचिनामप्राणिवाचिनां च तिद्दादिशब्दानां द्वितीयादीनामेकवचनेषु क्रमेण तम् आदय आदेशाः स्युः ॥ तमिस् । तम् ॥ यमिस् । यम् ॥ कमिस् । कम् ॥ इमिस् । इमम् ॥ हुमिस् । अमुम् ॥ सुह् शब्दादिभ्यो द्वितीयायां स्त्राव् (सू० २।१।३८) इत्यादिना स्प्रत्ययः । स्प्रत्यय इकारागम (सू० १७) इति इकारागमः । अनेन तम् आदय आदेशाः ॥ केषांचिन्मते इह् शब्दस्य न्वम् आदेशो भवति । तन्मते । न्वमिस् । एनम् । इति स्वरूपं भवति ॥

॥ अन्त्यस्य वा ऽमिसोः ॥६॥

अन्त्यस्य इह् शब्दस्य इकारसकारयोः परयोर्विकल्पेन अम् आदेशः स्यात् ॥ अमिस् । अमुम् ॥ अमि । अमुना ॥ इसोः किम् । हुमौ । अमीभिः ॥

॥ अप्राणिनि स्प्रत्ययलोपस्तकारादेशश्च ॥७॥

अप्राणिनि अभिधेये सति तम् आदीनां स् प्रत्ययलोपो भवति । अन्त्यस्य च तकारादेशः स्यात् ॥ तथ् छुह् ऋटान् । तच्छिनत्ति ॥ यथ् । यत् ॥ कथ् । किम् ॥ इथ् । इदम् ॥ हुथ् । अदः ॥ तिह् आदिशब्देभ्यो । द्वितीयायां स्त्राव् (सू० २।१।३८) इति स्प्रत्ययः । उभयेषाम् (सू० ५) इत्यादिसूत्रेण तम् आदय आदेशाः । अनेन स्प्रत्ययलोपः अन्त्याक्षराणां तकारः । वर्गप्रथमान्तानाम् (सू० २।१।६६) इति सूत्रेण तस्य थः ॥

॥ चूहूब्वहोश्च्यम्यौ च ॥ ८ ॥

त्वम् अहम् इति शब्दवाचकयोः चूह् ब्वह् शब्दयोर्द्वितीयादीनामेकवचनेषु क्रमेण च्य म्य आदेशौ भवतः स्प्रत्ययलोपश्च ॥ च्य छुह् वनान् । त्वां वदति ॥ चूह् शब्दाद्द्वितीयायां स्नाव् (सू० २।१।३८) इति स्प्रत्ययः । अनेन च्य आदेशः स्प्रत्ययलोपश्च । एवमन्यत् ॥

॥ प्रत्ययस्य लोपो द्वितीयाकर्तृतृतीययोः ॥९॥

चूह् ब्वह् इत्येताभ्यां शब्दाभ्यां द्वितीयायां कर्तृतृतीयायां च प्रत्ययस्य लोपः स्यात् ॥ च्य छुह् वनान् । त्वां वदति ॥ त्वह्य छुह् वनान् । युष्मान् वदति ॥ च्य वनुथ् । त्वया प्रोक्तम् ॥ त्वह्य वनुव । युष्माभिः प्रोक्तम् ॥

॥ सश्च ॥ १० ॥

चूह् ब्वह् शब्दाभ्यां स् इत्यस्य लोपो भवति चशब्दात्कर्तृतृतीयासंबन्धिनोः इ औ प्रत्यययोश्च लोपः स्यात् ॥ च्य सूतिन् । त्वया सह ॥ म्य सूत्य् । मया सह ॥ चूह् ब्वह् शब्दाभ्याम् इ सूतिन् प्रत्ययः । चूहूब्वहोश्च्यम्यौ च (सू० ८) इति सूत्रेण च्य म्य आदेशौ । प्रत्ययस्य लोप (सू० ९) इत्यनेन इकारस्य लोपः । अनेन स् लोपः ॥

॥ षष्ठ्यामन्त्यस्वरस्य च्यख्यातत्वं च ॥११॥

चूह् ब्वह् शब्दाभ्यां षष्ठ्यामन्त्यस्वरस्य लोपो भवति च्यसंबन्धिनश्चकारस्य ख्यातत्वं च स्यात् ॥ च्योनु । तव ॥ म्योनु । मम ॥ चूह् ब्वह् लिङ्गाभ्यां मनुष्यसंज्ञयोनु (सू० २।१।५०) इति उनु प्रत्ययः । चूहूब्वहोश्च्यम्यौ च (सू० ८) इति च्य म्य आदेशौ । अनेन अकारलोपः । प्रत्ययादेरोत्पुंसि (सू० १३) इत्युकारस्यौकारः । चकारस्य च ख्यातता बोध्या ॥

॥ स्त्रियामाकारः पुंबहुत्वे च ॥ १२ ॥

स्त्रियां वर्तमानाभ्यां चूह् ब्वह् शब्दाभ्यां षष्ठ्यामेकत्वबहुत्वयोरन्त्यस्वरस्याकारो भवति पुंलिङ्गस्य बहुवचने ऽपि ॥ च्या॑ञ् । तव । स्त्रीलिङ्गवाची शब्दः ॥ च्याञ । तव स्त्रीलिङ्गवाचिनः शब्दाः ॥ च्या॑नि न्यचि॑वि । तव पुत्राः ॥ म्या॑नि न्याचि॑वि । मम पुत्राः ॥ साधनं पूर्ववत् ॥

॥ प्रत्ययादेरोत्पुंसि ॥१३॥

तयोः पुंलिङ्गस्य एकवचने प्रत्ययादेरुकारस्य ओकारो भवति ॥ च्योनु । तव ॥ म्योनु । मम ॥ साधितचरावेव ॥

॥ प्रयोगलिङ्गस्यौकारोपधाया आत्वं सर्वत्र ॥१४॥

सर्वनामशब्दानां यत्र प्रयोगलिङ्गस्य उपधाभूत ओकारः स्यात्तत्र आत्वं भवति ॥ च्यानि सू॑तिन् । त्वद्धतुना ॥ म्यानि सू॑तिन् । मद्धेतुना ॥ सानि सू॑तिन् । अस्मद्धेतुना ॥ तुहन्दि सू॑तिन् । युष्मद्धेतुना ॥ च्योनु । म्योनु । सोनु । इति प्रयोगलिङ्गेभ्यः इ सू॑तिन् प्रत्ययः । उवर्णान्तानामिकार (सू०२।१।३०) इति उमात्राया इकारः । इतो लोप (सू०२।१।६) इति इ प्रत्ययस्य लोपः । अनेनोपधाया आत्वम् ॥ च्या॑नि सन्दि सू॑तिन् । त्वदीयेन ॥ म्या॑नि सन्दि सू॑तिन् । मदीयेन ॥ अत्र च्योनु म्योनु शब्दाभ्यां पूर्वं सन्दु प्रत्ययः । उवर्णान्तानाम् (सू०२।१।३०) इति इकारः । अनेनोपधाया आकारः । षष्ठीप्रयोगात् इ सू॑तिन् प्रत्ययः । शेषं पूर्ववत् ॥ बहुत्वे तु । च्यान्यौ सू॑तिन् । त्वदीयैः ॥ म्यान्यौ सू॑तिन् । मदीयैः ॥ तुहन्द्यौ सू॑तिन् । युष्मदीयैः ॥ सान्यौ सू॑तिन् । अस्मदीयैः ॥ तृतीयाया औ सू॑तिन् प्रत्यय एव भवति । तुहन्दि सन्द्यौ सू॑तिन् । इति ग्राम्याः । एवं सर्वनामशब्देषु सर्वत्र बोध्यम् ॥

॥ त्वह्यस्यो बहुत्वे ॥१५॥

चूह् ब्वह् शब्दयोः सर्वत्र बहुत्वे त्वहि असि आदेशौ भवतः ॥ त्वहि । यूयम् ॥ असि । वयम् ॥ त्वह्य । युष्मान् ॥ अस्य । अस्मान् ॥ द्वितीयायां न्प्रत्यये सर्वत्र (सू० २।१।११) इत्यकारागमे कृते प्रत्ययस्य लोप (सू० ९) इत्यादिसूत्रेण नकारलोपः । यत्वम् ॥

॥ तिम् यिम् कम् इम् हुमश्चोभयेषाम् ॥१६॥

उभयेषां प्राणिवाचिनामप्राणिवाचिनां च शब्दानां सर्वत्र बहुत्वे तिम् आदय आदेशा भवन्ति ॥ तिमन् । तान् । तानि ॥ यिमन् । यान् । यानि ॥ कमन् । कान् । कानि ॥ इमन् । इमान् । इमानि ॥ हुमन् । अमून् । अमूनि ॥ तिह् आदिशब्देभ्यो । द्वितीयायां स्लाव् (सू०२।१।३८) इति न् प्रत्ययः । अनेन तिम् आदय आदेशाः । न्प्रत्यये सर्वत्र (सू०२।१।१२) इत्यकारागमः ॥ एवं तिमौ स्तूतेन् ॥ तिहन्दि पुछ्य् । तिमौ प्यउ । तिहन्दु । तिमन् प्यह् । इत्यादि विज्ञेयम् ॥

॥ स्प्रत्यय इकारागमः ॥१७॥

तिह् आदिशब्दानां सकारे परे इकारागमो भवति ॥ तमिस् । तम् ॥ एवं सर्वेषाम् । अत्र लोपविधेर्बलीयस्त्वात् अप्राणिविषये सकारस्य लोपे कृते प्रोक्त आगमो न भवतीति ॥

॥ त्वहेर्हन्दौ हिलोपः पुंस्त्रियोर्वस्योत्वं च ॥१८॥

चूह् शब्दबहुत्वनियतस्य त्वहेः पुंलिङ्गे स्त्रीलिङ्गे च हन्दौ परे हिलोपो भवति वकारस्य च उत्वं भवति । पुंलिङ्गकथनात् हकारस्य सकारनिषेधः ॥

तुहन्दु । युष्माकं पुं ॥ तुहन्जू । युष्माकं स्त्री ॥ स्हन्दु स्हन्जू प्रत्ययौ । एकत्र सश्च (सू०१०) इति । अपरत्र स्लोपः स्त्रियां सर्वत्र (सू०२।१।४०) इति स्लोपः । अनेन हिलोपः वकारस्य उत्वं च ॥

॥ असेराद्यन्तस्वरयोर्लोपाकारावुनुञोः ॥१९॥

ब्वह् शब्दस्य बहुत्वे नियतस्य अस्मिपदस्य उनु ञ् इत्येतयोः परयोरादिस्वरस्य लोपः अन्त्यस्वरस्य चाकारो भवति ॥ सोनु । अस्माकम् । एकवचनम् ॥ सोनि । अस्माकम् । बहुवचनम् ॥ ब्वह् शब्दात् उनु नि प्रत्ययौ । त्वह्मस्यौ बहुत्वे (सू० १५) इति अस्मि आदेशः । अनेनाकारस्य लोपः । इकारस्य च अकारः । एकत्र प्रत्ययादेर्गोत्पुंसि (सू० १३) उकारस्य ओकारः । षष्ठ्यामन्त्यस्वरस्य (सू० ११) इत्यादिना अकारलोपः । अपरत्र स्त्रियामाकारः पुंबहुत्वे च (सू०१२) इति आकारः । स च इदन्तत्वादप्रसिद्धः (सू०२।१।७०) ॥ एवं । सोञ् । अस्माकम् । एकवचनं स्त्रीलिङ्गवाचकम् ॥ साञ । अस्माकम् । बहुवचनं स्त्रीलिङ्गवाचकम् ॥ साधनं पूर्ववत् ॥

॥ प्राणिनि मिलोपो वा सकारे ॥ २० ॥

प्राणिवाचिनां तदादिशब्दानां सकारे परे मिकारस्य विकल्पेन लोपो भवति ॥ तस् । तम् वा तस्य ॥ तमिस् । तम् वा तस्य ॥ तसन्दु । तस्य ॥ तमि सन्दु । तस्य ॥ सुह् शब्दात्स्प्रत्ययः । उभयेषाम् (सू०५) इति तम् आदेशः । स्प्रत्यये इकारागमः (सू०१७) । अनेन एकत्र मिलोपः ॥ एवं । यस् । यम् वा यस्य ॥ यमिस् । यम् वा यस्य ॥ यसन्दु । यस्य ॥ यमि सन्दु । यस्य ॥ कस् । कम् वा कस्य ॥ कमिस् । कम् वा कस्य ॥ कसन्दु । कस्य ॥ कमि सन्दु । कस्य ॥

इम् हुम् शब्दयोः संबन्धषष्ठ्यामेव । इसंन्दु । अस्य ॥ इमिसंन्दु अस्य ॥ हुसंन्दु । अमुष्य ॥ हुमि संन्दु । अमुष्य ॥ असंन्दु । अस्य ॥ अमि संन्दु । अस्य ॥

बहुत्वे तु सर्वेषां मन् इत्यस्य विकल्पेन लोप इष्यते ॥ तिहंन्दु वा तिमन् हंन्दु । तेषाम् ॥ यिहंन्दु वा यिमन् हंन्दु । येषाम् ॥ कहंन्दु वा कमन् हंन्दु केषाम् ॥ इहंन्दु वा इमन् हंन्दु । एषाम् ॥ हुहंन्दु वा हुमन् हंन्दु । अमीषाम् ॥

संबन्धषष्ठ्यां किम् । इमिस् । इमं वा अस्य ॥ हुमिस् । अमुं वा अमुष्य ॥ अत्र विकल्पाभावः ॥ प्राणिनि किम् । तम्युकु । तस्य वस्तुनः ॥

॥ निश्चयार्थे धातुलिङ्गस्वरूपान्ते यः प्रत्यययोर्मध्ये वा ॥ २१ ॥

धातुस्वरूपस्य वर्तमानादिषु लिङ्गस्वरूपस्य च प्रथमादिषु तद्धितादिषु च निश्चयार्थे गम्यमाने अन्ते यः प्रत्ययो भवति । द्वयोः प्रत्यययोर्मध्ये वा भवति ॥ तसंन्दुय् । तस्यैव ॥ तमि संन्दुय् । तस्यैव ॥ ग्वरसूय् अन्दर् । गुरावेव ॥ ग्वरनूय् अन्दर् । गुरुष्वेव ॥ एवं सर्वेषां लिङ्गानां सर्वासु विभक्तिषु बोध्यम् ॥ प्रत्यययोर्मध्ये यथा ॥ ग्वरनूय् हन्दि पुछ्य् । गुरुभ्य एव ॥ ग्वर सन्दिय् पुछ्य् । गुरवे एव ॥ अत्र एकवचने स् प्रत्ययस्य लोपे कृते संन्दु पुछ्य् इत्येतयोर्मध्ये य् प्रत्ययः ॥ ग्वरन् हन्दिय् पुछ्य् । वा ग्वरन् हन्दि पुछ्यि् । इत्यपि साधु ॥ तद्धितप्रत्ययेभ्यो यथा । गाटलुय् । दक्ष एव ॥ धातुस्वरूपेभ्यो यथा । करानूय् छह् । करोत्येव ॥ कर्योनूय् । अकृतैव तेन ॥ करिय् करिष्यत्येव ॥ उपमायामपि क्वचिद्व्यवह्रियते । यथा चाट् ति गौव् न्यचिवुय् । शिष्यो ऽपि पुत्र एवास्ति ॥

॥ सोरुशब्दस्वरूपेभ्यो नित्यमेव ॥ २२ ॥

सोरु शब्दस्य यानि स्वरूपाणि तेभ्यः प्रायशो नित्यमेव य् प्रत्ययो भवति ॥ सोरु । सर्वः ॥ सोरुय् । सर्व एव ॥ सारि । सर्वे ॥ सारिय् । सर्वे एव ॥

॥ यप्रत्यये औकारस्याव् ॥ २३ ॥

प्रत्ययसंबन्धिन औकारस्य य् प्रत्यये परे अव् भवति ॥ गुर्यवूय् सूतिन् । घोटकैरेव ॥ नमवूय् सूतिन् । नखैरेव ॥ गुर्यौ सूतिन् । नमौ सूतिन् इत्यनयोर्मध्ये य् प्रत्यये कृते अनेन औकारस्य अव् । व्यञ्जनं परेण संधेयम् (सू० १।३) ॥

॥ ब्याख् शब्दस्य बिय् प्रथमाबहुत्वादिषु ॥ २४॥

स्पष्टम् ॥ बिय् । अपरे ॥ बियन् । अपरान् ॥ बियौ । अपरैः ॥ अनेन बिय् आदेशे कृते व्यञ्जनान्तलिङ्गवत्साधनम् ॥

॥ कूतुशब्दस्योपधायाः प्रथमाबहुत्वे द्वितीयाद्येकवचनादिषु चाप्रसिद्धता ॥ २५ ॥

स्पष्टम् ॥ कूति । कियन्तः ॥ कूतिम् । कियन्तम् ॥ कूति । कियता ॥

॥ बहुत्वे वैत्वम् ॥२६॥

कूतु शब्दस्य द्वितीयादिबहुत्वे वा ऐत्वं भवति विकल्पेनाप्रसिद्धता च ॥ कूत्यन् । कियतः ॥ कैत्यन् । कियतः ॥ कूत्यौ सूतिन् । कियद्भिर्हेतुभिः ॥ कैत्यौ सूतिन् । कियद्भिर्हेतुभिः ॥ एवं सर्वत्र विज्ञेयम् ॥

॥ य्यूतुत्यूतुयूतुशब्दानामीत्वमप्रथमैक-वचने ॥२७॥

प्रथमैकवचनं वर्जयित्वा एषां शब्दानां यूकारस्य ईत्वं भवति ॥ यीति । यावन्तः ॥ तीति । तावन्तः । ईति । इयन्तः ॥ एवं सर्वत्र ज्ञेयम् ॥

॥ मूँष ऐत्वम् ॥२८॥

मूँष् शब्दोपधायाः प्रथमाबहुत्वादिषु ऐत्वं भवति ॥ मैँष । महिष्यः ॥ मैँषन् । महिषीः ॥ मैँषौ सूतिन् । महिषीभिः ॥

॥ कूँहो ऽन्त्यस्य सश्च ॥२९॥

कूँह् शब्दस्य उपधाया ऐत्वं भवति अन्त्याक्षरस्य च सकारो भवति ॥ कैँसि दप् । कंचिद्वद ॥ कैँसि दंपु । केनचिदुक्तम् ॥ कैँसि हंन्दु । कस्यचित् ॥ इत्यादि । साधनं पूर्ववत् ॥ कूँहशब्दापरपर्यायस्य काँह् शब्दस्य चेत्थं बोध्यम् । किंचानयोः शब्दयोरुभयलिङ्गत्वात् द्वितीयायां स् प्रत्ययः । स्त्रियामिकार (सू०२।१।३७) इति इकारागमः । स्लोपः स्त्रियां सर्वत्र (सू०२।१।४०) इति स् लोपः ॥

॥ केन्च् शब्दो नित्यं बहुत्वे ॥३०॥

स्पष्टम् ॥ केन्च् । केचित् ॥ केन्चन् । कांश्चित् ॥ केन्चौ । कैश्चित् ॥

॥ काँछ़ाह् कैँछ़ाह् शब्दावेकत्वे ॥३१ ॥

स्पष्टम् ॥ काँछ़ाह् । कश्चित् ॥ कैँछ़ाह् । किंचित् ॥

॥ ज़्ह् शब्दस्य दु द्वितीयादिषु ॥३२॥

द्विवाचकस्य ज़्ह् शब्दस्य द्वितीयादिविभक्तिषु दु आदेशः स्यात् ॥ द्वन् । द्वौ ॥ द्वयौ सूतिन् । द्वाभ्याम् ॥

॥ अयागमः स्वरे ॥३३॥

तस्मादादेशकृतात् दुशब्दात्स्वरे परे अयागमो भवति ॥ द्वयि सूतिन् । द्वयेन ॥ द्वयौ सूतिन् । द्वाभ्याम् ॥ ज़्ह् शब्दात् औ सूतिन् प्रत्ययः । पूर्वसूत्रेण दु आदेशः । अनेन अय् आगमः । व्यञ्जनं परेण संधेयम् (सू० १।३) ॥

॥ त्रिह्षह्होरन्त्यलोपश्च ॥३४॥

त्रिह् षह् शब्दाभ्यां स्वरे परे अयागमो भवति । अन्त्याक्षरस्य च लोपो भवति ॥ त्रयौ सूतिन् । त्रिभिः ॥ षयौ सूतिन् । षड्भिः ॥

॥ वा चोर्शब्दस्य न्प्रत्यये ह्रस्वश्च ॥३५॥

चोर् शब्दस्य न्प्रत्यये परे विकल्पेनान्त्याक्षरस्य लोपः ओकारस्य च उकारो भवति ॥ चुन् । चतुरः । वा । चोरन् । चतुरः ॥ चोर् शब्दात् द्वितीयायां न् प्रत्ययः अनेन रकारलोपः ओकारस्य च उकारः । उकारो वः (सू० १।११) इति वत्वम् । व्यञ्जनं परेण संधेयम् (सू० १।३) । अन्यत्र न्प्रत्यये (सू० २।१।१२) अकारागमः ॥

॥ पानशब्दादिप्रत्ययलोपः ॥३६॥

अयं शब्दो नित्यमेकवचन एव । देहार्थवाचकस्य पान् शब्दस्य तु एकानेकत्वं भवति ॥ पान । स्वयम् ॥ पानस् । स्वम् ॥ पान । स्वेन ॥

॥ अकारलोपोपधाह्रस्वौ चोनुञोः ॥३७॥

तस्यैव पानशब्दस्य उनुञ् इत्येतयोः प्रत्यययोः परयोरकारस्य लोप उपधायाश्च ह्रस्वो भवति ॥ पनुनु । स्वस्य पुंलिङ्गे ॥ पनञ् । स्वस्य स्त्रीलिङ्गे ॥ साधनं पूर्ववत् ॥ देहार्थवाचकस्य पान् शब्दस्य । पानुकु । देहस्य पुंलिङ्गे ॥ पानचू । देहस्य स्त्रीलिङ्गे ॥ इत्यादिस्वरूपाणि भवन्ति ॥

॥ अख्जोरयोराहागमो निश्चयसामान्ये ॥३८॥

अख्शब्दात् द्विवाचकाज्जोरशब्दाच्च निश्चयसामान्ये गम्यमाने आह् आगमो भवति ॥ अखाह् । एककः ॥ जोराह् । द्विकम् ॥ अख्शब्दस्य प्रथमायामेव विज्ञेयम् । अपरस्य सर्वासु विभक्तिषु । अख्शब्दग्रहणात्प्रथमैकवचनान्तेभ्यः सर्वेभ्यः शब्देभ्यो भवति ॥ कथाह् । एक आलापः ॥ जोराहौ मूर्तिन् । द्विकेन ॥

॥ त्रिहस्तारादेशः ॥ ३९ ॥

निश्चयसामान्ये त्रिह्शब्दस्य तार आदेशो भवति ॥ तार । त्रिकम् ॥ निश्चयसामान्ये किम् । त्रिय् । त्रय एव ॥

॥ चोरश्च्वमरः ॥ ४० ॥

चोर् शब्दस्य च्वमर आदेशो भवति निश्चयसामान्ये ॥ च्वमर । चतुष्कम् ॥ निश्चयसामान्ये किम् । चोरय् । चत्वार एव ॥

॥ पान्चः पैँशः ॥ ४१ ॥

पान्च्शब्दस्य पैँश आदेशो भवति निश्चयसामान्ये ॥ पैँश । पञ्चकम् ॥ निश्चयसामान्ये किम् । पान्चय् । पञ्चैव ॥

॥ षहो ऽन्त्यस्य खाह् ॥ ४२ ॥

षह्शब्दस्यान्त्याक्षरस्य खाह् आदेशो भवति निश्चयसामान्ये ॥ षखाह् । षट्कम् ॥ निश्चयसामान्ये किम् । षय् । षडेव ॥

॥ सतष्ट एठागमश्च ॥ ४३ ॥

सत्शब्दस्यान्त्याक्षरस्य टकारो भवति एठ आगमश्च निश्चयसामान्ये ॥ सटेठ । सप्तकम् ॥ निश्चयसामान्ये किम् । सतय् सप्तैव ॥

॥ ऐठादिभ्यो ऽमरागमश्च ॥ ४४ ॥

ऐठ्आदिभ्यः संख्याभ्यो निश्चयसामान्ये अमर आगमो भवति ॥ ऐठमर । अष्टकम् ॥ नवमर । नवकम् ॥ दहमर । दशकम् ॥ निश्चयसामान्ये किम् ॥ ऐठय् । अष्टावेव ॥ नवय् । नवैव ॥

॥ एकत्वनिर्दिष्टपरिमाणादिशब्दात्खण्डा च ॥४५॥

एकवचनेन निर्दिष्टो यः संख्यापरिमाणादिशब्दस्तस्मान्निश्चयसामान्ये खण्डा प्रत्ययो भवति । चशब्दात् आह् आगमो ऽपि भवति ॥ अखाह् खण्डा । एकमात्रम् ॥ चाखाह् खण्डा । चतुष्टयमात्रम् ॥ दहाह् खण्डा । दशकमात्रम् ॥ हथाह् खण्डा । शतमात्रम् ॥ क्रुहाह् खण्डा । क्रोशमात्रम् ॥ ह्रहाह् खण्डा ।

दिनमात्रम् ॥ ऋथाह् खण्डा । ऋतुमात्रम् ॥ रुपयाह् खण्डा । मुद्रिकामात्रम् ॥ एकत्वनिर्दिष्टात्किम् ॥ तार । त्रयः ॥ च़्वमर । चत्वारः ॥ चोराह् खण्डा । इति तु न भवति ॥ चाख्शब्दस्य त्वेकत्वनिर्देशाद्भवत्येव । परं तु यत्रैव आह् आगमो भवति तत्रैव खण्डा प्रत्ययः सस्वरः स्यात् । यत्र तु केवलः स्यात्तत्र खण्ड् प्रत्ययो भवति । यथा । क्रुह् खण्ड् । क्रोशमात्रम् ॥

॥ सर्वेभ्यो बहुवचनान्तेभ्यो ज़ू ॥ ४६ ॥

बहुवचनान्तेभ्यः सर्वेभ्यः शब्देभ्यो निश्चयसामान्ये ज़ू प्रत्ययो भवति । कटंज़ू । मेषाः ॥ गुरिज़ू । अश्वाः ॥ रुपयंज़ू । रूपिकाः ॥ कञ्जंज़ू । शिलाः इत्यादि ।

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
लिङ्गप्रकरणे सर्वनामपादस्तृतीयः ॥ ३ ॥
समाप्तं चेदं लिङ्गप्रकरणम् ॥२॥

अथ समासप्रक्रिया ॥३॥

शब्दाः संज्ञाविभक्त्यव्ययधातुभेदाच्चतुर्धा भवन्ति ॥ तत्र विभक्तिः केवलं स्वयमर्थदानाभावात्संज्ञया संगत्य कारकार्थं जनयति । धातुना च संगत्यातीतादिकालबोधिनी क्रिया भवतीति ॥ अव्यया हि स्वार्थदाने विभक्तिनिरपेक्षा इति ॥ विभक्तियोगात्संपन्नयोः क्रिययोर्वक्ष्यमाणसमासरीतिवत्संयोगो ऽसंभाव्यो ऽस्ति किंत्वव्ययभूतैः कृत्प्रत्ययैरेवेति ॥ संज्ञा तु विशेष्यपदविशेषणपदभेदाद्द्विविधा । तत्र द्वयोर्विशेष्यपदविशेषणपदयोः परस्परसंयोगो युक्तः विशेष्याद्विशेषणस्य बहिरनवस्थानादिति । विशेष्ययोस्तु पदयोः संयोगः कदाचित्संभाव्यः स्यात् । संयोगसंभवे तु पदे विशेष्ये वा भवतां । विशेष्यविशेषणे वा भवतामिति तुल्यमस्ति । कदाचित्त्वसंभाव्यः । इति द्वे स्वरूपे । तयोस्तु तुल्यातुल्यविभक्तिसंयोजनया चत्वारि स्वरूपाणि भवन्तीत्यतः समासाश्चत्वार एव भवितुमर्हन्त्येतदर्थं युक्तायुक्तेति समासलक्षणं सूत्रयति ॥

॥ युक्तायुक्तपदविभक्तीनां संगतिकृत्समासः ॥१॥

युक्तानां योग्यानामयुक्तानामयोग्यानां पदानां विभक्तीनां च संगतिकृत्संयोगकारकः समासो ऽवगन्तव्यः ॥ तत्रायुक्तपदसमविभक्तीनां संधायको द्वन्द्वः ॥ युक्तपदसमविभक्तीनां योगकारी कर्मधारयः ॥ युक्तपदभिन्नविभक्तीनां संधायकस्तत्पुरुषः ॥ अयुक्तपदायुक्तविभक्तीनां संयोगकारको बहुव्रीहिरिति ॥ संबन्धसंज्ञायां समासे विशेषः । तत्र संबन्धसंज्ञा द्विविधा ॥ एका

सामान्यसंबन्धसंज्ञा । द्वितीया विशेषसंबन्धसंज्ञा ॥ तत्र तदादिशब्दाः सामान्यसंबन्धसंज्ञकाः ॥ यथैकस्मिन्नेव मनुष्ये स्वयं वक्तरि सति अहमिति संज्ञा कथ्यते ॥ तस्मिन्नेव श्रोतृतया संनिधिस्थेन येन केनचित्प्रोक्ते त्वमिति संज्ञा ॥ अश्रोतृतया संनिधिस्थेन प्रोक्ते अयमिति संज्ञा ॥ असंनिधिस्थेन येन केनचित्प्रोक्ते स इति संज्ञा ॥ द्वापरतया क इति संज्ञा ॥ सामान्यतया य इति संज्ञा । इति सामान्यसंबन्धसंज्ञा । अत्र संबन्धषष्ठीतत्पुरुषं विना समासाबाप्तिर्नावधार्येति ॥ विशेषसंबन्धसंज्ञापि सामान्यविशेषाभ्यां द्विविधा ॥ तत्राद्या शिल्पवशात्सूपादिसंज्ञा तस्मिन्सूपत्वशिल्पस्य समवायिसंबन्धान्न हि तदादिशब्दवदेकेन सूप इत्युच्यते अपरेण स्वर्णकार इत्युच्यत इति विशेषत्वम् । परं तु सर्वैः सूप इत्युच्यत इति सामान्यत्वमिति ॥ अपरा पितृपुत्रादिवत्संबन्धसंज्ञा ॥ यथा हे पितरिति पुत्रेणैव कथ्यते बैजिकसंबन्धात् नान्येन ॥ स एव सहोदरेण भ्रातेति कथ्यते समानोदर्यत्वात् ॥ इत्यादयो विशेषसंबन्धसंज्ञकाः ॥ अत्र समासावाप्तिर्धीमद्भिरवधार्या इति ॥

द्वन्द्वोदाहरणं यथा ॥ ताफ् गट । आतपान्धकारौ ॥ अत्रातपेन साकं न कोऽपि ध्वान्तस्य संबन्धः किंतु समविभक्तित्वात् द्वन्द्वेन संबन्धः संपन्नः ॥

कर्मधारयोदाहरणं यथा ॥ म्वटि गुरि सूतिन् गौव् । स्थूलघोटकेन गतः ॥ अत्र य एव स्थूलः स एव घोटक इति युक्तपदत्वम् । स्थूलेन घोटकेन गत इति समविभक्तित्वमित्यतः कर्मधारयेण संगतिः ॥

तत्पुरुषोदाहरणं यथा ॥ राज़ न्यच्युबु । राजपुत्रः ॥ अत्र राज्ञा सह पुत्रस्य योग्यत्वेऽपि राज्ञः पुत्र इत्यनयोर्भिन्नविभक्तित्वमित्यतस्तत्पुरुषेण संगतिः ॥

बहुव्रीह्युदाहरणं यथा ॥ हूनि बुथु । श्वमुखः ॥ अत्र श्वन्शब्दमुखशब्दयोर्न च योग्यत्वसंबन्धः नापि श्वन्मुखं यस्य स श्वमुख इति निरुक्त्या विभक्तिसंबन्ध इत्यतो बहुव्रीहिना संगतिः ॥

॥ समासमध्ये विभक्तिलोपो व्यञ्जनाद्यवयवस्य ॥ २ ॥

समासे कर्तव्ये पदयोर्मध्ये या विभक्तिस्तस्या व्यञ्जनाद्यवयवस्य लोपो भवति। "एको ह्यवयवो यस्य को ऽसावयवी भवेत्" इति कथनान्न केवलव्यञ्जनरूपप्रत्ययस्य लोपः स्यात्॥ छत्रौ गुर्यौ सूतिन् आव्। श्वेतघोटकैरागतः॥ नीलिस् गुरिस्। अत्र स् प्रत्ययस्य केवलत्वान्न लोपः। छतु शब्दाद् गुरु शब्दाच्च औ सूतिन्प्रत्ययः अनेन मध्यविभक्तेः सूतिन् इति विभक्त्यवयवस्य लोपः। प्रत्ययलोपे प्रत्ययलक्षणम् (पा० सू० १।१।६२) इति उवर्णान्तानामिकारः (२।१।३०) इति यत्वम्॥

॥ सजातीयविभक्तिकानां विजातीयपदानामन्त्यपदविभक्त्या कथनं द्वन्द्वः ॥३॥

येषां वस्तूनां लोकेषु संयोगो ऽसंभाव्यो ऽपि स्यात्तेष्वपि शब्देषु तुल्यविभक्तिकेषु सत्सु स्वकल्पितस्यान्त्यपदस्य विभक्त्या तेषां कथनं द्वन्द्वसमासो विज्ञेयः॥ नब् नम् फल्। नभोनखफलम्॥ एषां पदानां यद्यपि संयोगो ऽसंभाव्यो ऽस्ति तथाप्यनेन संगतिः॥ वारि कुलि फल जल पुछ्य् आव्। वाटिकावृक्षफलजलायागतः॥ वारुशब्दात् कुलुशब्दात् फल्शब्दात् जल्शब्दाच्च इ पुछ्य् प्रत्ययः। समासमध्ये (सू० २) इति सूत्रेण मध्यमानां पुछ्य् इति प्रत्ययावयवानां लोपः। प्रथमयोरुवर्णान्तानामिकार (सू० २।१।३०) इति ऊकारोकारयोरिकारः। इतो लोप (सू० २।१।६) इति इप्रत्ययस्य लोपः। अपरयोर्व्यञ्जनान्तत्वादिकारस्याकारः (२।१।४)॥ माज्य कोर्य। मातापुत्रिके॥ मालि पुथ्र्। पितापुत्रौ॥ हश न्वष। श्वश्रूस्नुषे॥ जोम् काकञ्ज। ननन्दाप्रजावत्यौ॥ पच्य कूच्य। पट्टिकादारुणी॥

॥ विशेषणविशेष्ययोः पूर्वोत्तरपदस्थयोरेकपदेनाभिधानं कर्मधारयः ॥४॥

विशेष्यविशेषणयोर्योग्यसंबन्धत्वाद्युक्तपदत्वं विशेष्याद्बहिर्विशेषणस्यानवस्थानात् तयोः समविभक्तित्वमपि नित्यमेव स्यात्तयोर्विशेषणे पूर्वपदस्थे विशेष्ये उत्तरपदस्थे सति एकविभक्त्या यत् कथनं स कर्मधारयसमासो विज्ञेयः ॥ बज्यन् द्यारन् छुह् ज़ेनान् । महद्द्रव्याण्यर्जयति ॥ म्वचि ह्वचि सूतिन् । स्थूलपूपेन ॥ त्रिछि कोरि पुछ्य् । दक्षकन्यायै ॥ बजि लरि प्यठ । महद्गृहात् ॥ बज्य ग्रन्ज़ू हन्दु । महत्संख्यायाः ॥ बडिस् गुरिस् प्यद् । महदश्वोपरि । अत्र प्रथमान्त्ययोः न् स् प्रत्यययोः केवलत्वान्मध्ये ऽपि न लोपः । किंतु न् प्रत्यये सर्वत्र (सू० २।१।१२) इति अकारागमः । उवर्णान्तानामिकार (सू० २।१।३०) इति सर्वत्र इकारः । ऊदन्तटवर्ग (सू०२।१।२२) इत्यादिसूत्रेण क्रमेण टवर्गान्तस्य चवर्गः । शेषं पूर्ववत् ॥

॥ अप्रथमान्ते पूर्वपदे विभिन्नविभक्तिकयोः पदयोर्युगपत्कथनं तत्पुरुषः ॥५॥

संभाव्यसंयोगसत्ताकयोः पदयोर्मध्यात्प्रथमाविभक्तिव्यतिरिक्ते पूर्वपदस्थे सति तुल्यातुल्यप्रथमादिविभक्तिके उत्तरपदस्थे तयोर्युगपत्कथनं स तत्पुरुषसमासो बोध्यः ॥ श्राकि खश् । छुरिकाच्छेदः ॥ टोपि फलु । शिरस्त्रप्रान्तम् ॥ सर्प बय सूतिन् । सर्पभयेन ॥ राज़ न्यचिवि पुछ्य् । राजपुत्राय ॥ बट कोर्य हन्दु । ब्राह्मणकन्यायाः ॥ स्वन ढब अन् । स्वर्णपुटकमानय ॥ म्यञ्चि फ्लतु थव् । मृत्कटोलं निधेहि ॥

॥ उत्तरपदस्थस्य पोञ्ज़ुशब्दस्य पो वः ॥६॥

समासविषये पोञ्ज़ुशब्द उत्तरपदस्थे सति पोञ्ज़ु शब्दसंबन्धिनः पकारस्य

वकारः स्यात्॥ गंग वोञु। गङ्गाजलम्॥ व्यथ वोञु। वितस्ताजलम्॥ शीन वोञु। हिमजलम्॥ वुग वोञु। ओघजलम्॥ मार् वोञु। मारीजलम्॥ क्रीरि वोञु। कूपपानीयम्॥ रूद वोञु। वर्षापानीयम्॥ नाग वोञु। अखातजलम्॥ समासे किम्। व्यथि हन्दि पाञि सुंतिन्। वितस्तायाः पानीयेन॥

॥ पूर्वपदस्थे ञस्यानुस्वारः ॥७॥

समासविषये पोञुशब्दे पूर्वपदस्थे सति ञकारस्यानुस्वारो भवति॥ पाँ त्रख्। पानीयद्रोणः॥ पाँ नंडु। पानीयकुम्भः॥ समासे किम्। पाञुकु त्रख्। पानीयस्य द्रोणः॥

॥ दाञशब्दस्यापि ॥८॥

समासविषये दाञशब्दे पूर्वपदस्थे सति ञकारस्यानुस्वारो भवति॥ दाँ खार्। धान्यखारी॥ दाँ फुंतु। धान्यकटोलः॥ अपिशब्दादन्येभ्यो ऽपि॥ वाँ चंलु। वणिक्कृणं॥ वाँ कूलु। वणिक्कन्या॥ समासे किम्। दाञचू खार्॥

॥ पंथ्र्शब्दस्य पुंलिङ्गे च ॥९॥

पंथ्र्शब्दः स्वयं पुंलिङ्गः समासे ऽपि पुंलिङ्गेन निर्देशे कर्तव्ये पकारस्य वकारो भवति॥ वोञि वंथ्र् [। छायावृक्षपत्रम्]॥ पोष वंथ्र् [। पुष्पपत्रम्]॥ ख्यल्ल वंथ्र्। पद्मतृणपत्रम्॥ हाक वंथ्र्। शाकपत्रम्॥ पुंलिङ्गेन किम्। मुजि पंत्र्। मूलिकापत्रम्॥ गुगुजि पंत्र्। इत्यादि॥

॥ पंचाहः समासे ॥१०॥

समासविषये पंचाहशब्दस्य पकारस्य वकारो भवति॥ अकवन्ज़ाह॥ द्ववन्ज़ाह्। कुनवन्ज़ाह्। इत्यादि॥

॥ शैठः शस्य हः ॥११॥

कुनहैद् । अकहैद् । द्वहैद् । इत्यादि ॥

॥ च़्वंटूशब्दस्य म्वंडू आदेशः सस्यव्यतिरिक्ते ॥१२॥

सस्यव्यतिरिक्तस्य वस्तुनः अपूपार्थके च़्वंटूशब्दे उत्तरपदस्थे म्वंडू आदेशो भवति ॥ ठूल-म्वंडू । अण्डापूपः ॥ नदूरि-म्वंडू । बिसापूपः ॥ च़ामंञ्-म्वंडू । आमिक्षापूपः ॥ अद्रक-म्वंडू । आद्रकापूपः ॥ सस्यव्यतिरिक्ते किम् ॥ त्वमूल-च़्वंटू । तण्डुलापूपः ॥ कनक-च़्वंटू । गोधूमापूपः ॥ वुष्कि-च़्वंटू । यवापूपः ॥ सस्ये ऽपि पुंलिङ्गनिर्देशेन म्वंडु आदेश इष्यते ॥ त्वमूल-म्वंडु । अब-म्वंडु । इत्यादि ॥

॥ पूर्वोत्तरपदस्थभेद्यभेदकोभयविशिष्टान्यपदबोधको बहुव्रीहिः ॥१३॥

विशेष्ये पूर्वपदस्थे विशेषणे चोत्तरपदस्थे सति तदुभयेन विशिष्टस्यान्यपदस्य ज्ञानविधायको बहुव्रीहिर्ज्ञेयः ॥ यड-बंडु । बृहदुदरः ॥ दारि-ज़्यूटु । दीर्घश्मश्रुः ॥ कन-च़्वंटु । छिन्नकर्णः ॥ दु-वहंरु । द्विवार्षिकः ॥ दु-वरिश् । द्विवार्षिकी ॥ सत-बोचु । सप्तकुटुम्बः ॥ पाँच़-प्यतुर् । पञ्चपुत्रः ॥ हूनि-बुथु । श्वमुखः ॥ अत्र मध्यपदलोपो बुद्धिमतावधार्यः ॥

॥ द्विरुक्तेन च ॥१४॥

एकेनैव पदेन द्विरुक्तेन विशिष्टस्यान्यपदस्यावबोधकश्च बहुव्रीहिर्विज्ञेयः ॥ स च स्त्रीलिङ्गः ॥ ठ्वल ठ्वल् । शृङ्गाशृङ्गि ॥ टप टफ् । खुराखुरि ॥ ठूँक ठूँख् । शृङ्गाशृङ्गि ॥ चप चफ् । दन्तादन्ति ॥

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
समासप्रक्रिया समाप्ता ॥३॥

अथ तद्धितप्रक्रिया ॥४॥

॥ जातेरपत्यार्थे पूतु ॥१॥

अपत्ये ऽभिधेये सति जातेर्जातिवाचकाच्छब्दात् पूतु प्रत्ययो भवति ॥ दर-पूतु । कौल-पूतु । तिक्कि-पूतु । इत्यादि ॥ दर् कौल् त्युकु इति जातिवाचकाः शब्दाः । अनेन सूत्रेण पूतु प्रत्ययः । व्यञ्जनान्तानामकारागमः (सू०२।१।३६) । तृतीये युकारोपधाया इत्वम् (सू०२।१।७६) । उवर्णान्तानामिकारः (सू० २।१।३०) एवमुत्तरत्र ज्ञेयम् ॥ जातिशब्दग्रहणात्पशुपक्ष्यादीनां जातिर्गृह्यते ॥ काव-पूतु । काकपोतः ॥ पच्चिन्-पूतु । पक्षिपोतः ॥ ककर्-पूतु । कुक्कुटपोतः ॥ कट-पूतु । मेषपोतः ॥ म्याँ-पूतु । मेषपोतः ॥ कोतर्-पूतु । कपोतपोतः ॥ इत्यादि ॥

॥ न संज्ञायाः ॥२॥

पित्रादिनाम्नः परः पूतु प्रत्ययो न भवतीति परिभाष्यते ॥

॥ चूरशब्दाद्बालक्रीडायां च ॥३॥

पित्रादौ स्तनन्धयं क्रीडयति सति चूरशब्दात् पूतु प्रत्ययो भवति । च-शब्दाच्चौरपुत्रे ऽभिधेये ऽपि ॥ चूर-पूतु । चौरपोतः ॥

[१ ककर् कोतर् इत्यादीनि पदानि उकारान्तशब्दव्युत्पन्नान्यपि कछलादि (सू० २ । १ । ७४) गणमध्यगत्वात्साधूनि विज्ञेयानि ॥]

॥ मिञ्शब्दात्स्वार्थे ॥४॥

चुम्बनवाचकात् मिञ्शब्दात्स्वार्थ एव पूतु प्रत्ययो भवति ॥ मिञ्-पूतु । चुम्बनम् ॥ मिञ् इत्यस्य म्वञ् च कथ्यते ॥ तेन । म्वञ्-पूतु । चुम्बनम् ॥ इत्यपि भवति ॥

॥ अनादरापत्यार्थे ऽधमशब्देभ्यः कठ् ॥५॥

अनादरेण क्रोधेन च अपत्ये अभिधेये सति अधमशब्देभ्यः परः कठ् प्रत्ययो भवति ॥ चूर-कठ् । चौरपुत्रः ॥ गान-कठ् । विटपुत्रः ॥ पोग-कठ् । नाशपुत्रः ॥ वाज-कठ् । सूदपुत्रः ॥ रास-कठ् । जारजः ॥ क्क-कठ् । कुपुत्रः ॥ सुशब्दादपि दृश्यते ॥ स्व-कठ् । सुपुत्रः ॥ स्वख-कठ् । सुखपुत्रः ॥

॥ स्वस्वकार्योद्यमेनाभिधेये कंटु ॥६॥

जातिवाचकानां शिल्पवाचकानां च शब्दानां निजनिजकार्यस्योद्यमेनापत्ये अभिधेये सति कंटु प्रत्ययो भवति ॥ बट-कंटु । ब्राह्मणपुत्रः ॥ दर-कंटु । कौल-कंटु । स्वनर्-कंटु । स्वर्णकारपुत्रः ॥ मनर्-कंटु । शाङ्किकपुत्रः ॥ छान-कंटु । तक्षकपुत्रः ॥

॥ मूँष्शब्दाच्च ॥७॥

महिषीवाचकस्य मूँष्शब्दस्यापत्ये अभिधेये कंटु प्रत्ययो भवति ॥ मैँष कंटु । महिषः ॥ मूँष्शब्दात् कंटु प्रत्ययः । व्यञ्जनान्तानामकारागमः (सू० २।१।३६) । मूँष ऐत्वम् (सू० २।३।२८) इति सूत्रेण ऊकारस्य ऐत्वम् ॥

॥ पित्रोः सहजापत्यीयसंबन्धे पुंसि तुरु ॥८॥

पित्रोर्जनयितुर्जनन्याश्च सहजौ पितृभ्राता पितृभगिनी मातृभ्राता मातृभगिनी च तयोः पुमपत्यसंबन्धिनि संबन्धे अभिधेये सति तत्तच्छब्दात् तुरु प्रत्ययो भवति ॥ प्वफतुरु बोयु। पैतृष्वस्रीयः ॥ मासतुरु बोयु। मातृष्वस्रीयः ॥ मामतुरु बोयु। मातुलपुत्रः ॥

॥ स्त्रियां तूर् ॥९॥

तेषामेव शब्दानां स्त्र्यपत्यसंबन्धिनि संबन्धे अभिधेये सति तूर् प्रत्ययः स्यात् ॥ प्वफतूर् ब्यञ। पैतृष्वस्रीया ॥ मासतूर् ब्यञ। मातृष्वस्रीया ॥ मामतूर् ब्यञ। मातुलपुत्रिका ॥

॥ पितूरशब्दात्तूरलोपः ॥१०॥

स्पष्टम् ॥ पितुरु बोयु। पैतृव्यः ॥ पितूर् ब्यञ। पितृव्यपुत्री ॥ एवं प्वफतूर् बांयि काकञ्। पतृष्वस्रीयभार्या ॥ मासतूर् बांयि काकञ्। मातृष्वस्रीयभार्या ॥ मामतूर् बांयि काकञ्। मातुलपुत्रभार्या ॥ पितूर् बांयि काकञ्। पैतृव्यभार्या ॥

॥ ब्यञबोयुशब्दाभ्यां पुमपत्ये थूरन्त्ययोर्नबौ च ॥११॥

ब्यञबोयुशब्दयोः पुमपत्ये ऽभिधेये सति थूर् प्रत्ययो भवति अन्त्याक्षरयोश्च क्रमेण नकारबकारादेशौ भवतः ॥ ब्यन थूर्। भागिनेयः ॥ बाब थूर्। भ्रातृव्यः ॥

॥ स्त्र्यपत्ये ज़ो नवौ च ॥१२॥

तयोर्व्यञ्नवोर्युशब्दयोः स्त्र्यपत्ये ऽभिधेये सति ज़ प्रत्ययो भवति अन्त्याक्षरयोश्च नकारवकारौ भवतः ॥ व्यनज़ । भागिनेयी ॥ बावज़ । भ्रातृपुत्री ॥

॥ द्रियुशब्दस्य द्यारादेशश्च ॥१३॥

देवरवाचकस्य द्रियुशब्दस्य पुंस्त्र्यपत्ये ऽभिधेये पूर्वोक्तौ प्रत्ययौ भवतः। द्रियुशब्दस्य च द्यार आदेशः स्यात् ॥ द्यारथ्र् । देवरपुत्रः ॥ द्यारज़ । देवरपुत्री ॥

॥ तदस्यास्तीत्यलादयः ॥१४॥

तत् अस्ति अस्य इत्यस्मिन्नर्थे वक्ष्यमाणा अलादयः प्रत्ययाः स्युः ॥

स्वमूर्तिवर्तमानद्रव्यगुणवत्त्वाभिधेये ऽल् ॥१५॥

प्राणिनो ऽप्राणिनो वा निजमूर्तौ वर्तमानं यद्द्रव्यं गुणो वा तद्वत्त्वेन तस्मिन्नभिधेये सति द्रव्यशब्दाद्गुणशब्दाच्च अल् प्रत्ययो भवति । न चात्र गुणशब्देन शुक्लादिगुणा गृह्यन्ते इति ॥ दार्यल् । श्मश्रुलः ॥ गोंछ़ल् । गुम्फवान् ॥ डखल् । काकपक्षवान् ॥ बबल् । स्तनवती ॥ कोछल् । कोष्ठवान् ॥ ह्वङ्गल् । शृङ्गी ॥ ठूँकल् । शृङ्गाघाती ॥ ठ्वलल् । शृङ्गाघाती ॥ च्रपल् । दन्ताघाती ॥ फशल् । वेशवान् ॥ ग्यञ्जल् । वलिनः ॥ स्यसल् । सीमावान् ॥ प्वंदल् । क्षुतवान् ॥ मछ्यव्यचल् । तिलकालकः ॥ च्रासल् । कासवान् ॥ च्रूँटल् । पर्दी ॥ साधनं पूर्ववत् ॥

॥ हाचो ऽभियोक्तरि ॥१६॥

अभियोगकृदर्थे हाच् शब्दादल् भवति न त्वभियोज्यार्थे॥ हाचल्। अभियोक्ता॥

॥ ज्यवः सूचके ॥१७॥

ज्यव् शब्दात्सूचकार्थे अल् प्रत्ययो भवति॥ ज्यवल्। सूचकः॥ न तु जिह्वावान्। किंतु तत्र। ज्यविर्स्तु। वा ज्यविवोलु (सू० २४) इति भवति॥

॥ व्यञ्ञकूरूशब्दाभ्यामश्लीले ॥१८॥

स्पष्टम्॥ व्यञ्ञल्। कोर्यल्॥ अश्लीले किम्। व्यञ्ञवोलु (सू० २४)। भगिनीवान्॥ कोरिवोलु। कन्यावान्॥

॥ दारूशब्दाद्यागमो वा ॥१९॥

स्पष्टम्॥ दारियाल्। श्मश्रुलः॥

॥ क्वचिल्लदपि ॥२०॥

द्रव्यगुणवत्त्वे ऽभिधेये सति क्वचित् लद् प्रत्ययो ऽपि भवति। स च प्रायो दोष एव॥ फकलद्। दुर्गन्धः॥ छ्वकलद्। विदग्धः॥ छ्वकलद्। व्रणी॥ बकलद्। भषणवान्॥ द्वखलद्। दुःखी॥ द्रागलद्। दुर्भिक्षहतः॥ क्वचिद्बृहणात्। गोँछ्लद्। डखलद्। बबलद्। इति न भवति। किंतु ग्यञ्ञलद्। स्यसलद्। घ्रासिलद्। इत्यादीनां द्वयमेव भवति॥

॥ फश उन्मादिनि ॥२१॥

फश्शब्दादुन्मत्तस्यार्थे लद् भवति ॥ फशलद् । उन्मत्तकल्पः ॥ अन्यत्र । फशल् । वेशकारी ॥

॥ पंज़ुअपंज़ुशब्दाभ्यां योरु ॥२२॥

आभ्यां शब्दाभ्यां सहितत्वे वाच्ये योरु प्रत्ययो भवति ॥ पंज़ियोरु । सत्यवक्ता ॥ अपंज़ियोरु । असत्यवक्ता ॥

॥ मंन्ज़्युम्शब्दादूतार्थे ॥२३॥

दूतस्यार्थे मंन्ज़्युम्शब्दात् योरु प्रत्ययो भवति ॥ मंन्ज़्युम्योरु । दूतः ॥

॥ मूर्तिबाह्यवस्तुवत्त्वे वोलुग्राकौ ॥२४॥

निजमूर्तेर्भिन्नैर्वस्तुभिः सहितत्वे अभिधेये ग्राक्वोलु प्रत्ययौ भवतः ॥ धारवोलु । धनवान् ॥ लरिवोलु । गृहवान् ॥ शायवोलु । स्थानवान् ॥ कोरिवोलु । कन्यावान् ॥ न्यचिविवोलु । पुत्रवान् ॥ गुपनवोलु । गोपशवान् । इत्यादि ॥ एवं । लरिग्राख् । इत्यादिस्वरूपाणि भवन्ति ॥ गरशब्दस्य गृहाध्यक्षार्थे ऽकारलोप इष्यते ॥ गर्वोलु । गृहाधिपः ॥ अन्यत्र । गरवोलु । गृहवान् ॥

॥ जीवादिव्यथाकारिभ्यो हंतु ॥२५॥

यैर्यैरान्तरीयैर्बाह्यैर्वा वस्तुभिर्जीवादिनैव पीडा भुज्यते न तु देहेन तत्साहित्ये अभिधेये सति हंतु प्रत्ययः स्यात् ॥ न्यंद्रिहंतु । निद्राहतः ॥ त्रेपहंतु । तृषाहतः ॥ बुछहंतु । बुभुक्षाहतः ॥ क्रुदहंतु । क्रोधाहतः ॥ गुमहंतु । स्वेदाहतः ॥ तापहंतु । आतपाहतः ॥ तूंरिहंतु । शीताहतः ॥ आरहंतु ।

दयाहतः ॥ लवर्हतु । [जलकणाहतः ॥] तावर्हतु । [दाहहतः ॥] इति द्वयमन्यस्मिन्नपि विशेषणीक्रियते । तावर्हच्चू बुतराथ् । [दाहहता पृथ्वी इति ॥]

॥ मंदछमोदमानेभ्यो व्यंतु ॥२६॥

एभिस्त्रिभिः शब्दैः सहितत्वे अभिधेये व्यंतु प्रत्ययो भवति ॥ मंदछव्यंतु । मन्दाक्षयुतः ॥ मोदव्यंतु । आदरयुतः ॥ मानव्यंतु । मानयुतः ॥

॥ बर्साशब्दादाढ्यार्थे ॥२७॥

स्पष्टम् ॥ बर्साव्यंतु । आढ्यः ॥

॥ दन्दनस्तोरनिष्टार्थे आन् ॥२८॥

दंदूनस्तशब्दाभ्यामनिष्टार्थाभ्यां सहितत्वे ऽभिधेये सति आन् प्रत्ययो भवति ॥ दंदान् । दन्तुरः ॥ नस्तान् । दुर्नासिकः ॥

॥ उ् वा ॥२९॥

आभ्यां शब्दाभ्यां विकल्पेन उ् प्रत्ययो भवति ॥ नस्तु । दंदु ॥ पक्षे । नस्तूरु । दंदूरु ॥

॥ यड्शब्दाद्वृद्धावल् ॥३०॥

स्पष्टम् ॥ यडल् । तुन्दिलः ॥

॥ जिघत्सावलोपश्च ॥३१॥

स्पष्टम् ॥ यडल् । कुक्षिंभरिः ॥

॥ हर्शब्दात्ताच्छील्ये ॥३२॥

अस्माच्छब्दात्तच्छीले अर्थे अल् प्रत्ययो ऽकारलोपश्च स्यात् ॥ हर्ल् । कलहशीलः ॥

॥ जत्शब्दात्तद्वति ॥३३॥

स्पष्टम् ॥ जत्ल् । रोमवान् ॥

॥ वैंसो जैवात्रके ऽट् ॥३४॥

वैंस्शब्दादायुष्मत्त्वे ऽभिधेये अट् प्रत्ययो भवति ॥ वैंसट् । आयुष्मान् ॥

॥ र्षस्ताच्छील्ये ॥३५॥

र्षशब्दात्ताच्छील्यार्थे अट् प्रत्ययो भवति ॥ र्षट् । ईर्ष्यालुः ॥

॥ अंछिशब्दाद्दुर्दृष्टाविट् ॥३६॥

दुर्दृष्टौ पुरुषे ऽभिधेये सति अंछिशब्दात् इट् भवति ॥ अछीट् । दुर्दृष्टिः ॥

॥ रूप्लूब्भ्यामतिशये ॥३७॥

रूप्लूब्शब्दयोर्भूरिवत्त्वे ऽभिधेये सति इट् प्रत्ययो भवति ॥ रूपिट् । अतिसुन्दरः ॥ लूबिट् । लोलुभः ॥

॥ ज्यवश्च ॥३८॥

ज्यविट् । सूचकः ॥

॥ ल्यकलूशब्दादूठ् ॥३९॥

स्पष्टम् ॥ ल्यकलूठ्। अश्लीलदः ॥

॥ भावे ॥४०॥

इत उत्तरं ये प्रत्ययास्ते भावे विज्ञेयाः ॥ भावस्तु संज्ञाभावधातुभावभेदाद्द्विविधः। संज्ञाभावे अधिकारो ऽयम्। धातुभावस्तु कृत्प्रक्रियायां निरूपयिष्यते ॥

॥ विशेष्यायत्तानामर् ॥४१॥

विशेष्यस्य भेद्यस्य अधीना ये विशेषणशब्दास्तेषां भावे अर् प्रत्ययो भवति। उदाहरणान्यग्रे सर्वत्र ॥ रुतुशब्दस्य तु देहशुभतायामेव भावप्रत्ययः स्यादिति वेद्यम् ॥

॥ त्र्यक्षराधिकानामार् ॥४२॥

ते नित्यविशेष्यनिघ्नाः शब्दाश्चेत् त्र्यक्षरास्तदधिका वा स्युस्तदा आर् प्रत्ययो भवति ॥ व्वज्ञज्यार्। रक्तता ॥ म्वकज्यार्। मुक्तता ॥

॥ टोठोर्वा ऽनागमो ऽन्त्यस्वरलोपश्च ॥४३॥

टोठुशब्दाद्विकल्पेन आर् प्रत्ययः अन् आगमश्च भवति अन्त्यस्योकारस्य च लोपः स्यात् ॥ टाठञार्। प्रियता ॥ अत्र लिङ्गस्य अनागमव्यवहितत्वात् टवर्गान्तानां च (सू० ४९) इत्यनेन ठकारस्य छकारो न भवति किंतु तवर्गान्तानामप्रसिद्ध (सू० ५०) इत्यनेन नकारस्य ञकारः। पक्षे। टाछ्यर्। प्रियता ॥

॥ क्वचित्पूर्व एव ॥४४॥

त्र्यक्षराधिकानां क्वचित्स्थाने पूर्वः अर् प्रत्यय एव भवति ॥ अपज़र् । असत्यता ॥ कृहज़र् । कार्ष्ण्यम् ॥ काच़र्यर् । कपिलता ॥ कावर्यर् । नीलता ॥ कृपज़र् । कार्पण्यम् ॥ कायर्यर् । असारता ॥ खोवर्यर् । वामता ॥ ग्यश्याम्यर् । श्यामता ॥ च़तर्यर् । चतुरता ॥ विसम्यर् । विषमता । इत्यादि ॥

॥ हशो ऽश्लीले ॥४५॥

हश्शब्दादश्लीले ऽर्थे अर् भवति ॥ हशर् । गालिदानेन श्वश्रूत्वम् ॥ अश्लीले किम् । हशतोनु । श्वश्रूत्वम् ॥ (सू० ६३) तोनु प्रत्ययः ॥

॥ क्वंबुर्गंशुभ्यां वा लोपः ॥४६॥

आभ्याम् शब्दाभ्यां विकल्पेन भावप्रत्ययलोपः स्यात् ॥ क्वब्यर् । कुब्जता ॥ गश्यर् । जाल्मता ॥ पक्षे । क्वंबु । कुब्जता ॥ गंशु । जाल्मता ॥

॥ कवर्गान्तानां चवर्गादेशः क्रमात् ॥४७॥

तेषां विशेष्यनिघ्नानां द्व्यक्षराणां त्र्यक्षराणां च अन्त्यस्य उकारविशिष्टस्य कवर्गीयाक्षरस्य क्रमेण चवर्गीयाक्षरादेशो भवति ॥ निकु । निच्यर् । क्षुद्रत्वम् ॥ टंकु । टच्यर् । तैक्ष्ण्यम् ॥ ह्वंखु । ह्वच्यर् । शुष्कता ॥ त्र्युखु । त्रिच्यर् । दक्षता ॥ द्वंगु । द्वज्यर् । दुर्लभता ॥ स्वंगु । स्वज्यर् । सुलभता ॥ निकुशब्दाद्विशेष्यायत्तानामर् (सू० ४१) अनेन ककारस्य चकारः । उवर्णान्तानामिकारः (सू० २।१।३०) यत्वम् । त्र्युखुशब्दोपधायुकारस्य इकारः (सू० २।१।७६) । सर्वत्र यत्वम् ॥

॥ न च्वकुखूँखुशब्दयोः ॥४८॥

च्वकुशब्दखूँखुशब्दसंबन्धिनोः ककारखकारयोश्चवर्गादेशो न भवति ॥ च्वकु । च्वक्यर् । अम्लत्वम् ॥ खूँखु । खूँख्यर् [। अवनाटवद्वचनम्] ॥

॥ टवर्गान्तानां च ॥४९॥

टवर्गान्तानां विशेष्यनिघ्नानां शब्दानां च क्रमेण चवर्गादेशो भवति ॥ म्वंटु । म्वच्यर् । स्थौल्यम् ॥ गंटु । गच्यर् । अल्पोज्ज्वलता ॥ द्रोंटु । द्रोंछ्यर् । कठोरता ॥ मूँटु । मैंछ्यर् । मन्दता ॥ म्वंडु । म्वंज्यर् । कुण्ठता ॥ बंडु । बज्यर् । महत्ता ॥ प्रोणु । प्राञ्ज्यर् । पुराणता ॥

॥ तवर्गान्तानामप्रसिद्धः ॥५०॥

तवर्गान्तानां विशेष्यनिघ्नानां शब्दानामन्त्याक्षरस्य क्रमेणाप्रसिद्धश्चवर्गादेशो भवति अप्रसिद्धो दन्त्यः ॥ तंतु । तच्चर् । तप्तता ॥ मंतु । मच्चर् । मत्तता ॥ वंथु । वच्छर् । विस्तृतता ॥ थंदु । थज्जर् । औन्नत्यम् ॥ मंदु । मन्ज़र् । मान्द्यम् ॥ तंनु । तञ्चर् । तनुता ॥ गुमंनु । गुमञ्चार् । ईषन्मालिन्यम् ॥ तमंनु । तमञ्चार् । कार्ष्ण्यम् ॥ तूंरनु । तूंरञ्चार् । शीतता ॥ कटमलिनु । कटमलिञ्चार् । धूसरता ॥ पनुनुशब्दस्यादिस्वरस्य दीर्घ इष्यते ॥ पानञ्चार् । आत्मीयता ॥

॥ अप्रसिद्धादिलोपः ॥५१॥

अप्रसिद्धाच्चवर्गात् इकारस्य लोपो भवति उदाहरणानि पूर्वसूत्रोक्तानि अप्रसिद्धचवर्गात्परस्य इकारस्य लोपः स्वयं बुद्धिमता निर्णेयः ॥ छ्वंचु । छ्वंचर् । रिक्तता ॥ अंछु । अछ्चर् । नैर्बल्यम् ॥ पंजु । पज्ज़र् । सत्यता ॥ अंनु । अञ्चर् । अन्धता ॥

॥ लान्तानां जः ॥५२॥

लकारान्तानां विशेष्यनिघ्नानामन्त्यस्य जकारो भवति ॥ खलु । खज्यर् । विस्तृतत्वम् ॥ [वुलु ।] वोज्यर् । चाञ्चल्यम् ॥ कुमुलु । कुमज्यार् । कोमलता ॥ एवं । व्वज़ज्यार् । उज्ज्वलता ॥ म्वकज्यार् । मुक्तता ॥ ज़ॉय्ज्यार् । सूक्ष्मता ॥ पिशज्यार् । पेशलता ॥ लान्तानां किम् ॥ चिय्यर् । पर्युषितत्वम् ॥ च़र्यर् । आधिक्यम् ॥ फहर्यर् । पारुष्यम् ॥ नव्यर् । नवीनता ॥

॥ त्रकुरुशब्दस्य च ॥५३॥

अन्त्यव्यञ्जनस्य रकारस्य जकारो भवति ॥ त्रकज्यार् । कठोरता ॥ पक्षे । त्रकर्यर् ॥

॥ हान्तानां शः ॥५४॥

स्पष्टम् ॥ हिहु । हिश्यर् । सादृश्यम् ॥ च़ोहु । च़ाश्यर् । कटुता ॥ हान्तानां किम् । गश्यर् । जालमता ॥ च़ाष्यर् । कटुत्वम् ॥ फ़रिश्यर् । पारुष्यम् ॥

॥ सान्तानां वा छः ॥५५॥

स्पष्टम् ॥ कूँसु । कैँछ़र् । कनिष्ठता ॥ पक्षे ॥ कैसँर् । कनिष्ठता ॥ पवर्गान्तान्युदाहरणानि यथा ॥ पंपु । पप्यर् । पक्वता ॥ फंफु । फफ्यर् । लोहलत्वम् ॥ ग्वंबु । ग्वब्यर् । गुरुत्वम् ॥ ओमु । आम्यर् । आमता । इति ॥

॥ बंडुशब्दादीमी वा ॥५६॥

बंडुशब्दात्परो विकल्पेन ईमी प्रत्ययो भवति । आदेशाभावश्च ॥ बंडु । बडीमी । महत्ता ॥ पक्षे । बज्यर् । इति ॥

॥ श्रूचुछ्यंटुशब्दाभ्यां यारू च ॥५७॥

आभ्यां शब्दाभ्यां पक्षे भावे यारू च भवति ॥ श्रूचु । श्रूचियारू । शुद्धता ॥ छ्यंटु । छ्यंटियारू । उच्छिष्टता ॥ पक्षे । श्रोचर् । छ्यच्यर् ॥ इति भवतः ॥

॥ योरुशब्दान्ताज्ज् ॥५८॥

योरुशब्दाद्भावविषये ज् प्रत्ययो भवति ॥ मंजिमूयारज् । दूतता ॥ पंजियारज् । सत्यता ॥ अपंजियारज् । असत्यता ॥ यारज् । मित्रता ॥ श्रूचियारज् । शुद्धता ॥ छ्यंटियारज् । अशुद्धता ॥

॥ विशेष्यानायत्तानामिल्आंज्प्रत्ययौ ॥५९॥

भावे इत्यनुवर्तते स्वयं विशेष्यशब्दानां भावे अभिधेये इल् प्रत्ययः आंज् प्रत्ययश्च भवति ॥ पंण्डितांज् । पण्डितता ॥ पक्षे । पंण्डितिल् ॥ छांनिल् । वा । छानांज् । तक्षकता ॥ गूरिल् । वा । गोरांज् । पुरोहितता । इत्यादि ॥

॥ क्वचिदेकतरः ॥६०॥

क्वचिच्छब्दे एकतर एव प्रयुज्यते ॥ द्वंसिलांज् । लेपकता ॥ द्वंसिलिल् । इति न साधुशब्दः ॥

॥ क्वचिद्युगपच्च ॥६१॥

क्वचित्स्थाने प्रोक्तौ प्रत्ययौ युगपत्प्रयुज्येते ॥ मतिल् । वा । मंतिलांज् ।

[६१ । युगपच्छब्दो ऽत्रोभयार्थको ज्ञेयः न तु समवायार्थकः समवेतयोः प्रत्यययोरेकस्माच्छब्दात्प्रयोगासंभवात् ॥]

उन्मत्तता ॥ अत्र मंतुशब्दस्य विशेष्यनिघ्नत्वात्पूर्वं मचरस्वरूपे सिद्धे ऽपि प्रोक्तकर्मार्थमेव पुनरुदाहृतम् ॥ गूरिलांज् । छांनिलांज् । ब्रीठिलांज् । इत्यादि ॥

॥ लाँछ्शब्दस्योपधाया ऊत्वं वा ॥६२॥

लूँछिल् । पक्षे । लाँछिल् । नपुंसकता ॥

॥ संबन्धिनां तोनु ॥६३॥

नाडीसंबन्धिनां भावे अभिधेये सति तोनु प्रत्ययो भवति ॥ मांलितोनु । पितृत्वम् ॥ माजितोनु । मातृत्वम् ॥ बांयितोनु । भ्रातृत्वम् ॥ पुत्रतोनु । पुत्रत्वम् ॥ हशतोनु । श्वश्रूत्वम् । इत्यादि ॥ कृत्रिमसंबन्धिनां भावे तु तकारस्य पकार इष्यते ॥ व्यसपोनु । वयस्यात्वम् ॥ दायपोनु । धात्रीत्वम् ॥ पांजिपोनु । नीचत्वम् । इत्यादि ॥

॥ शत्रुमित्रपितुर्ऋषिबन्धुभ्य उत् ॥६४॥

एषां शब्दानां भावे गम्यमाने सति उत् प्रत्ययो भवति ॥ शत्रुत् । शत्रुत्वम् ॥ म्यत्रुत् । मित्रत्वम् ॥ पितुरुत् । सजातीयत्वम् ॥ ऋष्युत् । ऋषित्वम् ॥ बन्दुत् । बन्धुत्वम् ॥

॥ मैत उन् ॥६५॥

शववाचकात् मैतशब्दाद्भावे उन् प्रत्ययो भवति ॥ मैत् । मैतुन् । शवता ॥

॥ म्वंड्शब्दादुस् ॥६६॥

विधवावाचकात् म्वंड्शब्दाद्भावे उस् प्रत्ययो भवति ॥ म्वंडुस् । वैधव्यम् ॥

॥ द्वबुशब्दात्सृगार्थे ॥६७॥

स्पष्टम् ॥ द्वबुस् । सृगः ॥ अन्यत्र । द्वबिल् । रजकता ॥

॥ स्वन्शब्दाद्बंदु ॥६८॥

स्पष्टम् ॥ स्वनबंदु । सापत्न्यम् ॥

॥ बोजुशब्दाद्बठ् च ॥६९॥

अस्माच्छब्दात् बठ् प्रत्ययो भवति पक्षे बंदु प्रत्ययश्च स्यात् ॥ बोजिबंदु । साधारणता ॥ पक्षे । बोजिबठ् । साधारणता ॥

॥ हतादिभ्यः संख्यायाम् ॥७०॥

हत्आदीनां संख्यावाचकानां बंदु प्रत्ययो भवति ॥ हतबंदु । शतशः ॥ सासबंदु । सहस्रशः ॥ लछ्यबंदु । लक्षशः । इत्यादि ॥

॥ शाकादिभ्यो मुष्ट्यर्थे ॥७१॥

शाकानां मुष्टावभिधेयायां सत्यां बंदु प्रत्ययो भवति ॥ हाकबंदु । शाकमुष्टिः ॥ मुजिबंदु । मूलिकामुष्टिः ॥ ग्वग्जिबंदु [। सर्षपशाकमुष्टिः] ॥

॥ उलु ॥७२॥

अधिकारो ऽयम् ॥ इत उत्तरं वक्ष्यमाणार्थेषु उलु प्रत्ययो भवति ॥

॥ गाटशब्दान्निपुणे ॥७३॥

स्पष्टम् ॥ गाटुलु । निपुणः ॥

॥ कंडो ऽल्पार्थे ॥७४॥

कंड् इति । बृहत्कुण्डं । तस्याल्पार्थे उलु प्रत्ययो भवति । कंडुलु । कुंडलाकृतिः ॥

॥ गंडो वस्तुसाकल्ये ॥७५॥

वस्तुनः साकल्ये अभिधेये ग्रन्थिवाचकाद्गंड्शब्दात् उलु प्रत्ययो भवति ॥ गंडुलु । वस्तुसामस्त्यम् ॥

॥ गृत्शब्दादतिशये ॥७६॥

नदीप्रवाहवाचकात् गृत्शब्दादतिशये ऽर्थे उलु भवति ॥ गृतुलु । बहुलम् ॥

॥ गदश्च ॥७७॥

स्पष्टम् ॥ गदुलु । बहुलम् ॥

॥ टंठुशब्दान्मानावपने ॥७८॥

द्रोणद्वयवाचकात् टंठुशब्दात्परिमाणभाण्डार्थे उलु प्रत्ययो भवति ॥ टठुलु । काष्ठावपनम् ॥

॥ द्वंगुप्वंतुशब्दाभ्यां सादृश्ये ॥७९॥

द्वंगु । मुष्टिः ॥ प्वंतु । अर्भकः ॥ आभ्यां सादृश्यार्थे उलु प्रत्ययो भवति ॥ द्वगुलु । पिण्डम् ॥ प्वतुलु । शिलामयी मूर्तिः ॥

॥ म्वल्सादोस्तद्वति ॥८०॥

स्पष्टम ॥ म्वल्लु । बहुमूल्यम् ॥ सादुलु । स्वादवान् ॥

॥ क्वछ्शब्दाद्भारिके ॥८१॥

स्पष्टम् ॥ क्वछुलु । भारवाहः ॥

॥ छ्वक्शब्दात्स्पष्टतायाम् ॥८२॥

छ्वक् । शोधना । तस्मात्स्पष्टार्थे उलु प्रत्ययो भवति ॥ छ्वकुलु । गद्गदम् ॥

॥ चट्शब्दाच्चौरे ॥८३॥

चट् । छदनमे । तस्माच्चौरार्थे उलु भवति ॥ चटुलु । चौरः ॥

॥ पत्शब्दादुडुपे ॥८४॥

स्पष्टम् ॥ पतुलु । उडुपः ॥

॥ क्वच्छब्दात्स्वव्यभिचारे ॥८५॥

गुदवाचिनः क्वत्शब्दात्स्वव्यभिचारकारयितरि उलु स्यात् ॥ क्वतुलु । स्वव्यभिचारकारयिता । गांडू ॥

॥ रात्दुह्होस्तत्काले ॥८६॥

रात्दुह्शब्दाभ्यां तत्तत्काले ऽभिधेये उलु प्रत्ययः स्यात् ॥ रातुलु । निशाकालः ॥ दुहुलु । दिनकालः ॥

॥ मून्शब्दाद्वस्त्रे ॥८७॥

उपधाह्रस्वश्च निपात्यते ॥ मुनुलु । और्णं वासः ॥

॥ युलु ॥८८॥

इत उत्तरं वक्ष्यमाणार्थेषु युलु भवति ॥ अधिकारो ऽयम् ॥

॥ टंपुजटोर्जटाधारिणि ॥८९॥

टंपुशब्दात् जटशब्दाच्च तद्धारिणो ऽर्थे युलु स्यात् ॥ टप्युलु । जटाधारी ॥ जट्युलु । जटाधारी ॥

॥ दाहः करुणायामुपधाह्रस्वश्च ॥९०॥

स्पष्टम् ॥ दह्युलु छुह् वदान् । सकरुणं रोदिति ॥

॥ रसात्तद्वति ॥९१॥

स्पष्टम् ॥ रस्युलु छुह् ग्यवान् । सरसं गायति ॥

॥ मछ्स्निहोः स्नेहवति ॥९२॥

मछ् इति । सान्त्वनं । स्निह् इति स्नेहस्तयोः शब्दयोः युलु प्रत्ययो भवति ॥ मछ्युलु । सस्नेहः ॥ स्निह्युलु । सस्नेहः ॥

॥ मिषान्नखमांसलेशे ॥९३॥

स्पष्टम् ॥ मिष्युलु । नखमांसलेशः ॥

॥ स्यकः स्वादादिसादृश्ये ॥९४॥

स्यक् । सिकता । तत्सादृश्येन स्वादादावभिधेये युलु प्रत्ययः स्यात् ॥ स्यक्युलु चूँदु । सिकतास्वादसदृशः पालीवतः ॥ स्यकिजू बुतराथ् । सैकतिला भूमिः ॥

॥ मांजूशब्दादपत्रपिष्णौ ॥९५॥

मातृवाचकात् मांजूशब्दात् लज्जावदर्थे युलु प्रत्ययः स्यात् ॥ माज्युलु। लज्जावान् ॥

॥ मलाद्युनु तद्वति ॥९६॥

मलशब्दात्तद्वदर्थे युनु प्रत्ययो भवति ॥ मल्युनु। मलिनः ॥

॥ कूटुशब्दादल्पार्थे उनु ॥९७॥

कूटु। बृहत्काष्ठं। तस्याल्पार्थे उनु प्रत्ययो भवति ॥ कूटुनु। क्षुद्रकाष्ठम् ॥

॥ दगादायुधे ॥९८॥

दग्। घातः। तस्मादायुधार्थे उनु प्रत्ययो भवति ॥ दगुनु। मृगः ॥

॥ रंग्स्वन्मन्चम्दाँद्काँद्भ्यः शिल्पिनि र्॥९९॥

एभ्यः शब्देभ्यः शिल्पिनि अर्थे र् प्रत्ययो भवति ॥ रंगर्। रजकः ॥ स्वनर्। स्वर्णकारः ॥ मनर्। शाङ्किकः ॥ चम्र्। चर्मकारः ॥ दाँद्र्। शाकविक्रयी ॥ काँद्र्। कान्दविकः ॥

॥ डास्फासोर्विनाशकभेदकयोः ॥१००॥

स्पष्टम् ॥ डास्र्। विनाशकः ॥ फास्र्। भेदकः ॥

॥ बंगात्तत्पायिनि ॥१०१॥

बंगशब्दात्तत्पायिनि अर्थे र् प्रत्ययो भवति ॥ बंगर्। भङ्गापः ॥

॥ बमो ऽन्तरायिणि ॥१०२॥

बम्शब्दाद्विघ्नकारके ऽर्थे र् प्रत्ययः स्यात् ॥ बम्र् । विघ्नकृत् ॥

॥ लमो विलम्बके ॥१०३॥

लमशब्दाद्विलम्बकर्त्रर्थे र् प्रत्ययो भवति ॥ लम्र् । विलम्बकः ॥

॥ लाबो वार्धुषिके ॥१०४॥

लाब्शब्दात् उक्तार्थे र् प्रत्ययः स्यात् ॥ लाब्र् । वृद्धाजीवः ॥

॥ सालो जन्ये ॥१०५॥

साल्शब्दान्निमन्त्रितजन्यार्थे र् प्रत्ययो भवति ॥ साल्र् । जन्याः ॥

॥ लूटो लुण्ठके ॥१०६॥

लूट्शब्दात् लुण्ठकार्थे र् प्रत्ययः स्यात् ॥ लूट्र् । लुण्ठकः ॥

॥ ब्रमो भ्रमप्रदे ॥१०७॥

स्पष्टम् ॥ ब्रम्र् । भ्रमदः ॥

॥ लूबो ऽन्त्यस्य दश्च ॥१०८॥

लूब्शब्दात्तद्वत्त्वार्थे र् प्रत्ययो भवति अन्त्यस्य बकारस्य च दकारो भवति ॥ लूद्र् । लोलुभः ॥

॥ तौल्यपरिमिते युनु ॥१०९॥

तुलया परिमिते वस्तुनि युनु प्रत्ययो भवति । तच्च द्विधा । एकं स्वयं वस्तु

कियदस्तीति द्वितीयं कियन्मितस्य वस्तुन आधारभूतमस्तीत्यनयोर्द्वयोरेव योगारम्भः ॥ त्रांक्युनु कद् । द्रौणिको मेषः ॥ सीर्युनु थाल् । प्रास्थिकः स्थालः ॥ खार्युनु बोरु । खारिको भारः ॥ त्रांक्युनु नंदु । द्रौणिकः कुम्भः ॥ सीर्युनु बान । प्रास्थिकं भाण्डम् ॥ अत्र त्रख्शब्दस्योपधाया दीर्घः सेर्शब्दस्य एकारस्य ईकारो दृश्यते । प्रस्थवाची सीर्युनु शब्दः पलवाची पल्शब्दापरपर्यायः पल्युनुशब्दश्चेतरावबधार्यौ ॥ अन्यत्र । ज्वत्रोकु । चतुर्द्रौणिकः ॥ ज्वत्रांक्युनु । चतुर्द्रौणिकः ॥

॥ पाँजुवुशब्दस्य वस्य शश्च ॥११०॥

द्रोणार्थवाची पाँजुवुशब्दस्तत्तौल्येनाभिहिते वस्तुनि युनु प्रत्ययो भवति वकारस्य च शकारो भवति ॥ पाँजशुनु । अर्धद्रौणिकः ॥

॥ षष्ट्यादेर्मौल्यसंख्यायां च ॥१११॥

मौल्यसंख्यया वस्तुनि अभिधेये सति षष्टेः परतः युनु प्रत्ययो भवति ॥ शीठ्युनु । षाष्टिकः ॥ सतत्युनु । साप्ततिकः ॥ षष्ट्यादेः किम् ॥ दहन् हंन्दु दाँदू । दशानां वृषः ॥

॥ सर्वनामशब्देभ्यश्च ॥११२॥

तीत्युनु । तावतिकः ॥ यीत्युनु । यावतिकः ॥ कूत्युनु । कियतिकः ॥ ईत्युनु । एतावतिकः ॥

॥ वर्षार्थे च ॥११३॥

वार्ष्युनु । वार्षिकः ॥

॥ संख्यायाश्च पूरणे युमु ॥११४॥

संख्यायाः पूरणे ऽर्थे युमु प्रत्ययो भवति चशब्दात्सर्वनामशब्देभ्यश्च ॥ अक्युमु। प्रथमः ॥ दह्युमु। दशमः ॥ वुह्युमु। विंशः ॥ हत्युमु। शततमः ॥ सा॑स्युमु। सहस्रतमः ॥ पुंस्त्रियोः कतिशब्दवाचकाभ्याम् कंचूकञ्चशब्दाभ्यामपि विज्ञेयः ॥ कक्युमु। कतमः ॥ यीत्युमु। यतमः ॥ तीत्युमु। ततमः ॥ ईत्युमु। इतमः ॥ स्त्रीलिङ्गे तु युकारस्य इकारो भवति ॥ कच्चिमू। कतमा ॥ यीतिमू। यतमा ॥ इत्यादि ॥

॥ अष्टसंख्यावधि शतार्थे हत ॥११५॥

स्पष्टम् ॥ अख्हथ्। एकशतम् ॥ ज़्हहथ्। शतद्वयम् ॥ त्रिहथ्। त्रिशती ॥ इत्यादि ॥

॥ तत्परतो हस्य शः ॥११६॥

नवसंख्यामारभ्य शतार्थे हकारस्य शकारो भवति ॥ नवशथ्। नव शतानि ॥ काहशथ्। एकादश शतानि ॥ बाहशथ्। द्वादश शतानि ॥ इत्यादि ॥

॥ देशभवे ङ् प्रत्ययश्च ॥११७॥

स्पष्टम् ॥ सोव्पूरि नाव्। सुय्यपुरजा नौः ॥ ईरा॑नि गुरु। ईरानदेशजो ऽश्वः ॥ चीनि खोसु [। चीनदेशभवः कंसः] ॥ हिन्दुस्ता॑नि कपुर्। इत्यादि ॥

॥ कशीर्देशभवे उरु अन्त्यस्वरादिलोपोपधादीर्घौ च ॥११८॥

काश्मीरभाषायां कश्मीरः कशीर् इति स्त्रीलिङ्गवाची शब्दः कथ्यते। तस्या उद्भूते वस्तुनि अभिधेये सति उरु प्रत्ययो भवति अन्त्यस्वराद्यवयवस्य लोप

उपधायाश्च दीर्घो भवति ॥ काशुरु कंग्। काश्मीरं कुङ्कुमम् ॥ काशुरु पश्मीन। काश्मीरं बहुमूल्यम् [राङ्कवम्] ॥ काशिरु कट्। काश्मीरं कुष्ठम्। इत्यादि ॥

॥ देशकालभवे चोकु अस्त्रियाम् ॥११९॥

देशभवे कालभवे च वस्तुनि अभिधेये उकु प्रत्ययो भवति स्त्रीलिङ्गं वर्जयित्वा ॥ कत्युकु। कुत्रत्यः ॥ तत्युकु। तत्रत्यः ॥ इत्युकु। इहत्यः ॥ यत्युकु। यत्रत्यः ॥ हुत्युकु। अत्रत्यः ॥ गरुकु। गृह्यः ॥ करुकु। किंकालिकः ॥ रातुकु। ह्योभवः ॥ परसुकु। परारि भवः। इत्यादि ॥ अज्शब्दादिकारागमश्चेष्यते ॥ अज्युकु। अद्यतनः ॥

॥ मिलोपयुक्तात्पारिप्रत्ययान्तात्सर्वनाम्नो युमु ॥१२०॥

उक्तप्रत्ययो भवतीति स्पष्टम् ॥ पार्युमु। पारदेशजः ॥ कपार्युमु। किंपार्श्वः ॥ तपार्युमु। तत्पार्श्वः ॥ यपार्युमु। यत्पार्श्वः ॥ हुपार्युमु। अपारजः ॥ इपार्युमु। एतत्पार्श्वः ॥ अपार्युमु। पारजः ॥ अस्त्रियां किम् ॥ कतिचू। कुत्रत्या ॥ एवं। पारिमू। पारजा ॥ इत्यादि ॥ दिग्भवे च दक्षिनुखोबुरुशब्दौ वर्जयित्वा युमु भवति ॥ ब्रूञ्युमु। अग्रिमः ॥ पत्युमु। पश्चिमः ॥ हीर्युमु। वा। प्यञ्युमु। ऊर्ध्वः ॥ तल्युमु। वा। ञ्वन्युमु। अधरः ॥ अन्दर्युमु। आन्तरः ॥ न्यर्बर्युम्। बाह्यः ॥ अद्रौ प्रोक्तौ किम् ॥ दक्षिन्युकु। दक्षिणः ॥ खोबर्युकु। वामः ॥

॥ समूहे रूयलु ॥१२१॥

स्पष्टम्। गोबूरूयलु। गोसमूहः ॥ गुरिरूयलु। अश्वसमूहः ॥ गुपनूरूयलु। गोपशुसमूहः ॥ तीरिरूयलु। मेषादिसमूहः ॥ जनानरूयलु। स्त्रैणम् ॥ महनिरिरूयलु। मानुष्यकम् ॥ इत्यादि ॥

॥ लूकशब्दादय् ॥१२२॥

लूकशब्दात्समूहे अय् भवति ॥ लूकय् । जनता ॥

॥ पानशब्दादुनु उपधाह्रस्वश्च ॥१२३॥

स्पष्टम् ॥ पनुनु । आत्मीयः ॥

॥ परशब्दादुदु ॥१२४॥

स्पष्टम् ॥ परुदु । परकीयः ॥

॥ तिहादिभ्यः प्रकारोक्तौ थः ॥१२५॥

तिह्यिह्आदिभ्यः पञ्चभ्यः प्रकारवचने गम्यमाने थ प्रत्ययो भवति ॥ तिथ । तथा ॥ यिथ । यथा ॥ क्यथ । कथम् ॥ इथ । इत्थम् ॥ हुथ । इत्थम् ॥

॥ उपमाने थु ॥१२६॥

तिह्आदिशब्दैरुपमाने वाच्ये सति थु प्रत्ययो भवति ॥ तिथु । तादृशः ॥ यिथु । यादृशः ॥ किथु । कीदृशः ॥ इथु । एतादृशः ॥ हुथु । ईदृशः ॥ लिङ्ग-प्रकरणोक्तनिश्चयप्रत्ययान्ताश्च [सू० २।३।२१] यथा ॥ तिथय् । तथैव ॥ यिथय् । यथैव ॥ क्यथय् । कथमेव ॥ इथय् । इत्थमेव ॥ हुथय् । इत्थमेव ॥ एवं बुद्धिमता निश्चयार्थयप्रत्ययस्य सर्वत्र प्राप्तिरवधार्या ॥

॥ तस्मात्परो पाठि पाठिन् वा ॥१२७॥

तस्मात्प्रकारप्रत्ययान्तात् परः पाठि प्रत्ययः पाठिन् प्रत्ययो वा प्रयोज्यः ॥

तिथपाठि । तथा ॥ यिथपाठि । यथा ॥ क्यथपाठि । कथम् ॥ इथपाठि । इत्थम् ॥ हुथपाठि । इत्थम् ॥ एवं । तिथपाठिन् । यिथपाठिन् । इत्यादि ॥

॥ अन्यतो ऽपि च ॥१२८॥

तौ पाठिपाठिन्प्रत्ययौ अन्येभ्यो ऽपि दृश्येते ॥ बियपाठिन् । इतरथा ॥ सारियपाठि । सर्वथा ॥ हलिपाठि । वक्रप्रकारम् ॥ इत्यादि ज्ञेयम् ॥ एवं संबन्धषष्ठ्यन्तेभ्यः सर्वेभ्यः शब्देभ्यो बोध्यम् ॥

॥ क्याहो ह्रस्वः ॥१२९॥

क्याहशब्दस्य ह्रस्वो भवति ॥ क्यथपाठि । कथम् ॥ क्यथताञ्पाठि । केनापि प्रकारेण ॥

॥ प्राणिकृतादेशेभ्यो रंग च ॥१३०॥

प्राणिनो द्वितीयादीनामेकवचनेषु [सू० २।३।५] ये तमादय आदेशाः कृतास्तेभ्यः प्रकारवचने गम्यमाने रंग प्रत्ययो भवति चशब्दादन्येभ्यो ऽपि ॥ तमिरंग । तथा ॥ यमिरंग । यथा ॥ कमिरंग । कथम् ॥ इमिरंग । इत्थम् ॥ हुमिरंग । इत्थम् ॥ अमिरंग । इत्थम् ॥ अकिरंग । एकधा ॥ द्वयिरंग । द्विधा ॥ त्रयरंग । त्रिधा ॥ सारिरंग । सर्वथा ॥ यत्रिरंग । वा । सिठाहिरंग । बहुधा ॥ इत्यादि ज्ञेयम् । साधनं पूर्ववत् ॥

॥ प्रत्ययेषु हलोपः सर्वत्र ॥१३१॥

सर्वत्र लिङ्गप्रकरणे धातुप्रकरणे च प्रत्ययेषु परेषु हकारस्य लोपो भवति ॥ क्यथपाठिन् । कथम् ॥ क्याहशब्दात् थ प्रत्ययान्तात् पाठिन् प्रत्ययश्च अनेन हकारस्य लोपः । क्याहो ह्रस्व (सू० १२९) इत्यनेनाकारस्याकारः ॥

॥ अप्राणिभ्यः स्थाने इ प्रत्ययश्च ॥१३२॥

तेभ्यः अप्राणिकृतादेशेभ्यः सामान्यस्थाने गम्यमाने इ प्रत्ययो भवति ॥ तत्र पञ्चम्यां प्रसिद्धता सप्तम्यां तु पूर्वस्वरस्याप्रसिद्धता ॥ तति । तंति । ततः । तत्र ॥ यति । यंति । यतः । यत्र ॥ कति । कुतः । कुत्र ॥ इति । इंति । अतः । अत्र ॥ हुति । हुंति । अमुतः । अमुत्र ॥ अति । अंति । अतः । अत्र ॥

॥ तस्मादनऽनसौ वा ॥१३३॥

तस्मात् इ प्रत्ययान्ताच्छब्दात् अन् प्रत्ययः अनस् प्रत्ययो वा भवति ॥ कत्यन् वा कत्यनस् । कुत्र ॥ तत्यन् वा तत्यनस् । तत्र ॥ यत्यन् वा यत्यनस् । यत्र ॥ अत्यन् वा अत्यनस् । अत्र ॥ एवमन्यत् ॥ अनसः सकारस्य नकारो ऽपि दृश्यते ॥ यत्यनन् । यत्र ॥ अत्यनन् । अत्र ॥ एवमन्यत् ॥

॥ पञ्चम्यां प्यठान्तो ऽपि ॥१३४॥

स एव इ प्रत्ययान्तः शब्दः प्यठान्तो विशेषतः पञ्चमीप्रयोगो भवति ॥ तत्तिप्यठ । ततः ॥ यतिप्यठ । यतः ॥ कतिप्यठ । कुतः ॥ इतिप्यठ । इतः ॥ हुतिप्यठ । अमुतः ॥ गरप्यठ । गृहतः ॥ गामप्यठ । ग्रामतः ॥ इत्यादि ॥

॥ सप्तम्यामनन्तादी च ॥१३५॥

अन्प्रत्ययान्ताच्छब्दात्सप्तम्यां विशेषत ई प्रत्ययो ऽपि भवति ॥ तत्यनी । तत्र ॥ यत्यनी । यत्र ॥ कत्यती । कुत्र ॥ इत्यनी । अत्र ॥ हुत्यनी । अमुत्र ॥

॥ ओर्तुप्रत्ययौ वान्त्यलोपश्च ॥१३६॥

तेभ्यः अप्राणिकृतादेशेभ्यः शब्देभ्यः सप्तम्याम् ओर् प्रत्ययः तु प्रत्ययो

वा भवति। अन्त्याक्षरस्य च लोपो भवति। तु प्रत्ययस्योकारान्तत्वात्पूर्वस्वरस्याप्रसिद्धता ज्ञेया ॥ तोर् । तत्र ॥ योर् । यत्र ॥ कोर् । कुत्र ॥ योर् ॥ अत्र ॥ होर् वा ओर् । अमुत्र ॥ एवम् ॥ तंतु । यंतु । कंतु । इतु । हुतु । अंतु । विज्ञेयाः ॥ तु प्रत्ययान्तात् त् प्रत्ययश्चेष्यते ॥ ततुत् । यतुत् । कतुत् । इतुत् । हुतुत् । अतुत् । इत्यादि ॥ यप्रत्यये ओकारस्य ऊकार इष्यते ॥ तूर्य् । तत्रैव ॥ यूर्य् । यत्रैव ॥ कूर्य् । कुत्रैव ॥ यूर्य् । अत्रैव ॥ ऊर्य् । अमुत्रैव ॥ एवं ॥ ततुर्य् । यतुर्य् । कतुर्य् । इतुर्य् । हुतुर्य् । अतुर्य् । बोध्याः ॥

॥ पञ्चम्यामपर ओर् ॥१३७॥

अकारः परो यस्मात्तथाविधः ओर् प्रत्ययः पञ्चम्यां भवति ॥ तोर । ततः ॥ योर । यतः ॥ कोर । कुतः ॥ होर वा ओर । अमुतः । इति ॥

॥ तिहादिभ्यः काले ऽलिः ॥१३८॥

तिहादिभ्यः कालविषये अलिप्रत्ययो भवति ॥ त्यलि । तदा ॥ य्यलि । यदा ॥ क्यलि । कदा ॥ प्रत्ययस्य इदन्तत्वात्पक्षे पूर्वस्वरस्याप्रसिद्धता बोध्या ॥ त्यलि । य्यलि । क्यलि । इति ॥

॥ इह्हुहोर्वुञ्व्वञादेशौ ॥१३९॥

अनयोः शब्दयोः सविभक्तिकयोः वुञ् व्वञ् आदेशौ क्रमेण भवतः ॥ वुञ् । एतर्हि ॥ व्वञ् । अधुना ॥

॥ क्याहः कर् ॥१४०॥

क्याह्शब्दस्य कालविषये कर् आदेशो भवति ॥ कर् । कदा ॥

॥ उल्वन्ताभ्यां रातूद्वद्भ्यामिः ॥१४१॥

स्पष्टम् ॥ रातूलि । नक्तम् ॥ द्वद्लि । दिवा ॥

॥ रातः कितु च ॥१४२॥

स्पष्टम् ॥ रात्कितु । नक्तम् ॥

॥ अन्यतो ऽपि च ॥१४३॥

न्यहफ्वलि । प्रभातम् ॥ सुलि । अचिरेण ॥ यंचूकालि । चिरेण ॥ कालि । कालेन ॥ कालिक्यथ् । परतरेद्युः ॥ ततिकालिक्यथ् । परतरतरेद्युः ॥ कमिविज़ि । कदा ॥ तमिविज़ि । तस्मिन्काले ॥ यमिविज़ि । यस्मिन्काले ॥ इत्यादयो विज्ञेयाः ॥

॥ कोजुमिम्युज़ुशब्दाभ्यां स् ॥१४४॥

आभ्यां शब्दाभ्यां काले गम्यमाने स् प्रत्ययो भवति ॥ काजिस् । प्राह्णम् ॥ मिमिज़िस् । अपराह्णम् ॥

॥ शेषेभ्यो ऽप्यन् ॥१४५॥

	स्वग	मूल्याल्पतायाम्
अ क	स्वंग्राव	सुमूल्यीकरणे

	धातुः ।	अर्थः ।
अ भा	सूस	अपानवायौ

॥ हकाराद्याः ॥

	हकर	कार्कश्ये
अ भा	हग	पुरीषोत्सर्गे
	हट	क्षीणीभवने
अ क	हट्र	क्षीणीकरणे
अ क	हट्राव	च
	हन्द्र	शीतीभवने
अ क	हन्द्राव	शीतीकरणे
	हप	कार्श्ये
	हम	शमने
	हर	क्षरणपतनयोः
	हल	वक्रतायाम्
अ क	हहर	विवाहकर्मणि
	हाँकल	शीतसंकोचने
	हाँठ	नैष्फल्ये
अ क	हाँठ्राव	निष्फलीकरणे
	हान	शैत्ये

	धातुः ।	अर्थः ।
	हामन	शीतलापाके [श्यामीभवने]
अ क[भा]	हार	पराजयनिपातयोः
अ क	हाव	दर्शने
अ क	हि	ग्रहणक्रीणनधारणेषु
अ क	ह्यक	शक्तौ
अ क	ह्यछ	शिक्षायाम्
अ भा	ह्यड	परिभाषणे
	हिल	प्रबलीभवने
	ह्रख	शोषे
अ क	ह्रख्र	शोषणे
अ क	ह्रख्राव	च
	ह्रच़	विस्त्रीभवने
अ क	ह्रच़्राव	विस्त्रीकरणे
अ क	ह्रब्र	पराजयने
अ क	ह्रब्राव	च
अ क	हुम	होमे
अ क	ह्रम्र	शामने
अ क	ह्रम्राव	च

	धातुः ।	अर्थः ।
	होन	उत्कटीभवने
अ क	होर	प्रतिदाने
	ह्न	शोथे
	ह्र	उपचये
	ह्ल	प्रसवारम्भे
अ क	ह्सव	श्वादिसूचनायाम्
अ क	ह्सनाव	च

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीर-
शब्दामृते धातुपाठप्रक्रिया
समाप्ता ॥ ७।१ ॥

अथ परिशिष्ट-नाम-धातवो लिख्यन्ते ॥२॥

धातुः ।	अर्थः ।
अग्य-लगुन्	अग्नाविव रिष्वादिषु संमुखीभवनम् ।
अगादि-गछुन्	निष्कारणं क्रोधाविष्कारः ।
खंख्र्-दिज़्	जन्तुनो भूमौ भ्रामणम् ।
छित-करुन्	तिरस्करणम् ।
ज़ीरू-दिज़्	क्रोधाविष्काराय प्रेरणम् ।
डाल-मारंज़्	उपेक्षाकरणम् ।
ड्यम्ब्ड्यम्ब्-करुन्	अन्तःसुषिरस्य शब्दानुकरणम् ।
तोथ्-करंज़्	अहंकारपूर्वकं भर्त्सनम् ।
दाम्-द्युन्	स्तन्यवत्पानम् ।
दारिथ्-द्युन्	प्रपातनम् ।
निन-युन्	अनवधानता ।
न्यूरु-युन्	समीपागमनम् ।
पाय्-करुन्	उपायकरणम् ।
फूह्-करुन्	कोपपूर्वकं चोदनम् ।

धातुः ।	अर्थः ।
फश्-द्युन्	विनष्टीकरणम् ।
वर्-गछुन्	अनादरेण रोषणम् ।
मान्मान्-करंञ्	स्पर्धाकरणम् ।
रथि-खारुन्	सफलीकरणम् ।
वंनु-द्युन्	स्मृतिपूर्वकमन्वेषणम् ।
वस्य-प्यंनु	हृदयंगमभिवनम् ।
वोडाल-करुन्	उपेक्षाकरणम् ।
सर-करुन्	निर्णयीकरणम् ।
सूर्-करुन्	ईषच्चेष्टाकरणम् ।
हूक-युन्	शीघ्रागमनम् ।

[अन्ये ऽपि यथायोगं बोध्याः ।]

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते धातुप्रक्रियायाः परिशिष्टे नामधातवः समाप्ताः ॥ ७ । २ ॥

ॐ श्रीविघ्नहर्त्रे नमः ॥

अथाख्यातप्रक्रियायाम् ॥ ८ ॥

वर्तमानपादः ॥ १ ॥

अथशब्दो मङ्गलार्थः ।

॥ कालत्रयतद्विशेषक्रियाकर्मकर्त्रवबोधकृदाख्यातः ॥ १ ॥

कालत्रयस्य भूतभविष्यद्वर्तमानरूपस्य तद्विशेषाणां विध्यादीनां क्रियाकर्मणोः कर्मकर्तरि तथा विभक्तिस्वरूपेष्वप्रयुक्ततच्छब्दादिकर्तृषु क्रियाकर्त्रोश्चावबोधकृत्सम्यग्बोधकारक आख्यातो विज्ञेयः ॥

॥ आरब्धानारब्धसमापितक्रियाकाला वर्तमानभविष्यद्भूतसंज्ञाः ॥ २ ॥

आरब्धक्रियाकालो वर्तमानसंज्ञः । अनारब्धक्रियाकालो भविष्यत्संज्ञः । समापितक्रियाकालो ऽतीतसंज्ञो भवति ॥

॥ अश्रोतृश्रोतृवक्तृभेदात्प्रथममध्यमोत्तमाः ॥३॥

तेषु कालत्रयेषु तद्विशेषेषु च प्रत्येकस्मिन् अश्रोता प्रथमपुरुषः । श्रोता मध्यमपुरुषः । वक्ता उत्तमपुरुषो बोध्यः । अश्रोतेति लक्षणात्संनिधाने ऽपि पुरुषे अयं करोतीति श्रोतारं वदेत्त्वमपि कुर्विति किमुतासंनिधाने इति निर्णेयम् ॥

॥ एकानेकाभ्यां द्वे द्वे वचने ॥ ४ ॥

तेषु त्रिषु पुरुषेषु प्रत्येकस्मिन्नेकवचनबहुवचनभेदाद्द्वे द्वे वचने भवतः ॥ सुह् छुह् परान् । सः पठति ॥ तिम् छिह् परान् । तौ पठतः वा ते पठन्ति ॥

॥ युगपदुक्तौ वाचकासन्नो मुख्यः ॥ ५ ॥

द्वयोस्त्रयाणां वा पुरुषाणां युगपत्क्रियाया उक्तौ सत्यां वाचकासन्नः पुरुष एव मुख्यो विज्ञेयः । तद्यथा । तच्छब्दयुष्मच्छब्दयोर्युगपद्वचने वाच्ये वाचकासन्नो युष्मच्छब्द एव मुख्यः संमुखत्वात् । एवं युष्मच्छब्दास्मच्छब्दयोर्युगपद्वचने वाच्ये वाचकस्यात्मैवासन्नतरः । अतस्तत्रास्मच्छब्दस्य मुख्यत्वम् । एवं तच्छब्दास्मच्छब्दयोस्त्रयाणामप्यवधार्यः ॥ सुह् त चूह् परिव् । स च त्वं पठतम् ॥ चूह् त बूह् परव् । त्वं चाहं पठाव ॥ सुह् त बूह् परव् । स चाहं पठाव ॥ सुह् त चूह् त बूह् परव् । स च त्वं चाहं पठाम ॥

॥ धातोः परे प्रत्ययाः ॥ ६ ॥

कालत्रयसंबन्धिविभक्तिप्रत्यया धातोः परे भवन्तीति परिभाष्यते ॥ परान् छुह् । पठति ॥ परुन् । अपठत् ॥ परि । पठिष्यति ॥

॥ तदात्वारब्धे वर्तमाना ॥ ७ ॥

तत्काले आरब्धे कर्मणि धातोर्वर्तमाना विभक्तिर्भवति ॥ पकान् छुह् । गच्छति ॥ परान् छुह् । पठति ॥

॥ नैर्यन्तरारब्धे च ॥ ८ ॥

यस्याः क्रियायाः कदाचिदपि उच्छित्तिर्न स्यात्तत्कर्म निरन्तरारब्धम् तस्मिन्नपि वर्तमाना विभक्तिर्भवति ॥ ईश्वर् जगतस् रछान् छुह् । ईश्वरो जगद्रक्षति ॥ पान पानस् रछान् छुह् । आत्म [न]ा त्मानं पालयति ॥

॥ नियमारब्धे च ॥ ९ ॥

प्रतिकुम्भं गङ्गायाः स्नानं करिष्यामीत्यादिनियमेन या या क्रिया आरब्धा स्यात्तस्यां वाच्यायां सत्यां तत्र वर्तमाना विभक्तिर्भवति ॥ व्याकरण् परान् छुह् ल्वकुङ् । व्याकरणमधीते बालः ॥ गंगाय गछान् छुह् प्रथ् कुंबस् । गङ्गां गच्छति प्रतिकुम्भम् ॥

॥ अनेककार्यवित्कर्तृसत्तायां तत्तत्क्रिया धातुभ्यश्च ॥ १० ॥

एकाधिककार्यज्ञस्य कर्तुः सत्तायां देहपाताभावे सति तत्संबन्धिषु कर्मस्वभिधेयेषु सत्सु धातुभ्यो वर्तमाना विभक्तिर्भवति । एककार्यज्ञस्य तु नियमारम्भतो वर्तमानाप्राप्तिरासीदिति ॥ क्याह् छुह् मुर्च् करान् । किं मूर्तीः कुर्वन्नस्ति ॥ क्याह् छुह् जान् लेखान् । किं साधु लिखन्नस्ति ॥ क्याह् छुह् रतु ग्यवान् । किं साधु गायन्नस्ति ॥ कथनसमकालमेव यदि प्रोक्तक्रियाविदो देहपातः स्यात् तदातीतावाप्तिर्भवेन्न तु वर्तमानाप्राप्तिरित्यादिविशेषा बुद्धिमद्भिः स्वयमूह्याः । किं च वर्तमानस्य केवलं न संप्रतिकालीनक्रियाणो

वर्तमानसंज्ञास्ति किंतु वर्तमानकर्तृसत्त्वे एव प्रायशो वर्तमानसंज्ञास्तीति ॥

॥ वर्तमानायां छुह् छिह् छुख् छिव छुस् छिह् पुंसि ॥ ११ ॥

॥ छ्यह् छ्यह् छ्यख् छ्यव छ्यस् छ्यह् स्त्रियाम् ॥ १२ ॥

पुंकर्तरि यथा ॥ करान् छुह् । सः करोति ॥ करान् छिह् । ते कुर्वन्ति ॥ करान् छुख् । त्वं करोषि ॥ करान् छिव । यूयं कुरुथ ॥ करान् छुस् । अहं करोमि ॥ करान् छिह् । वयं कुर्मः ॥ स्त्रीलिङ्गे यथा । करान् छ्यह् । सा करोति ॥ करान् छ्यह् । ताः कुर्वन्ति ॥ करान् छ्यख् । त्वं करोषि स्त्री० ॥ करान् छ्यव । यूयं कुरुथ स्त्री० ॥ करान् छ्यस् । अहं करोमि स्त्री० ॥ करान् छ्यह् । वयं कुर्मः स्त्री० ॥ कर करणे । छुह् आदयः प्रत्ययाः । धातोरानागम (सू० १९) इति आन् । व्यञ्जनं परेण संधेयम् (सू० १।३) ॥

॥ क्रिया ऽभावे नपराः ॥ १३ ॥

क्रियाया अभावे अभिधेये सति ते प्रत्यया नपरा नकारः परो येभ्यस्तथा स्युः ॥ करान् छुन । न करोति ॥ करान् छिन । न कुर्वन्ति ॥ करान् छ्यन । सा न करोति ॥ करान् छ्यख्न । त्वं न करोषि ॥ कर करणे । छुह् प्रत्ययस्तस्मान्न प्रत्ययः । धातोरानागमः(सू०१९) । प्रत्ययेषु हलोपः सर्वत्र(सू०४।१३१) इति हकारलोपः । एवं सर्वेषाम् ॥

॥ कामप्रवेदने आपराः ॥ १४ ॥

क्रियायाः कामप्रवेदने सति विभक्तिप्रत्यया आपरा आकारः परो येभ्यस्तथा स्युः । क्रियाभावस्य कामप्रवेदने सति न प्रत्यय आपरो भवति ॥ करान्

छ्वा । स किं नु करोति ॥ करान् छ्या । सा किं नु करोति ॥ कर करणे । छुह् छ्यह् प्रत्ययौ आपरौ । प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) इति ह लोपः । धातोरानागमः (सू० १९) । छु इत्यस्य उकारो वः (सू० १।११) इत्यनेन वत्वे कृते । अपरत्र स्वरः सवर्णे दीर्घपरलोपौ (सू० १।५) । व्यञ्जनं परेण संधेयम् (सू० १।३) । एवं करान् छुना । किं न करोति ॥ करान् छ्यना । सा किं न करोति ॥ अत एव निर्देशाद्यथा नकारान्तस्या ऽऽप्रत्ययः स्यात्तथा तिप्रत्ययान्तस्यापि बोध्यः (सू० ४।१७९) । करान् छुत्या । अपि किं करोति ॥ कर्यौ-नूत्या । अपि किं चकार ॥ करित्या । अपि किं करिष्यति ॥

॥ मध्यमैकत्वादित्रये ऽपरा वा ॥ १५ ॥

कामप्रवेदने सति मध्यमैकत्वानेकत्वयोरुत्तमैकत्वे च अपरा अकारः परो येभ्यस्तथा वा विकल्पेन स्युः । न क्रियाभावकामप्रवेदने नकारस्य स्वयमकारान्तत्वात् । किं चादरवत्सु संबोधनप्रत्ययेषु चायमेव मुख्यः । प्रथमस्तु । आ प्रत्ययः कनिष्ठनीचयो (सू० २ । २ । ७) रिति लिङ्गप्रकरणोक्तसूत्रेण तयोरेवावगन्तव्यः ॥ करान् छुख । वा । करान् छुखा । किं त्वं करोषि ॥ करान् छिव । वा । करान छिवा । किं यूयं कुरुथ ॥ करान् छुस । वा । करान् छुसा । किमहं करोमि ॥ साधनं पूर्ववत् ॥

॥ अपरा अय्परा वा स्त्रियां मध्यमे ॥ १६ ॥

स्त्रियाः सकाशात्कामप्रवेदने कर्तव्ये मध्यमपुरुषे प्रत्यया अकारपरा अय्परा वा भवन्ति । अत्रापि अय् प्रत्ययः । कनिष्ठनीचयो (सू० २।२।७) रित्य[र्थे] लिङ्गप्रकरणोक्तसूत्रानुसारतो बोध्यः ॥ करान् छ्यख । वा । करान् छ्यखय् । किं त्वं करोषि स्त्री० ॥ करान् छ्यव । वा । करान् छ्यवय् । किं यूयं कुरुथ स्त्रियः ॥ करान् छ्यखना । वा । करान् छ्यखनय् । किं त्वं न करोषि ॥ करान् छ्यवना । वा । करान् छ्यवनय् । किं यूयं न कुरुथ ॥

॥ उत्तमैकत्वे पुंस्त्रियोः क्रमात् ॥ १७ ॥

पुरुषाय स्त्रिया कामप्रवेदने वाच्ये सति अकारपरो भवति । स्त्रिये स्त्रिया वाच्ये सति अय्परो भवति ॥ करान् छ्यस । किमहं करोमि ॥ करान् छ्यसय् । किमहं करोमि ॥

॥ बहुत्वे आ अय्पराः ॥ १८ ॥

पुरुषाय वाच्ये आपराः स्त्रिये वाच्ये अय् परा भवन्ति । प्रथमपुरुष-प्रत्यययोरुत्तमानेकत्वछ्यह् प्रत्ययेन सादृश्यात्तयोरपीत्थं विज्ञेयम् ॥ करान् छ्या स्वह् । सा किं नु करोति ॥ करान् छ्या तिम । ताः किं नु कुर्वन्ति ॥ करान् छ्या असि । वयं किं नु कुर्मः ॥ करान् छ्यय् । किं नु वयं कुर्मः ॥ एवमन्यथोरपि ॥

॥ धातोरानागमः ॥ १९ ॥

वर्तमानाया विषये धातोः पर आन् आगमो भवति ॥ करान् छुह् । करोति । साधितमेव ॥

॥ इकारान्ताद्वपूर्वः ॥ २० ॥

इकारान्ताद्धातोरान् आगमो वकारपूर्वो भवति अर्थात् वान् आगमः स्यात् ॥ निवान् छुह् । हरति ॥ दिवान् छुह् । ददाति ॥ यिवान् छुह् । आयाति ॥ नि हरणे । दि दाने । यि आगमने । वर्तमानायां पुंसि छुह् प्रत्ययः । अनेन वान् आगमः ॥ ख्यवान् छुह् । खादति ॥ च्यवान् छुह् । पिबति ॥ ख्यि खादने । चि पाने । छुह् प्रत्ययः । अनेन वान् आगमः । सर्वत्राकारागमो ऽनिदियिवर्जितात् (सू० ८ । २ । ११) इति सूत्रेण धातुस्वरादकारागमः ।

इकारो ऽसवर्णे यो ऽपरलोप (सू० १।१०) इति सूत्रेण इकारस्य यत्वम्। व्यञ्जनं परेण संधेयम् (१ ।३) ॥

॥ आसो लोपो धातोश्च ॥ २१ ॥

आस सत्तायामित्यस्माद्धातोरान् प्रत्ययस्य लोपो भवति । आस धातोश्च लोपः स्यात् ॥ छुह् । अस्ति ॥ छिह् । सन्ति । इत्यादि ॥ आस सत्तायां । वर्तमानायां छुह् प्रत्ययः । धातोरानागमः (सू० १९) । अनेन लोपः आस धातोश्च ॥

॥ वाक्येष्व ऽयं प्रयोगो मुख्यः ॥ २२ ॥

सर्वेषां वाक्यानां लालित्ये अयम् अस्त्यर्थकः छुह् प्रयोगो मुख्यो ऽवधार्यः ॥ बत छुह् सुह् ख्यवान् । भक्तमस्ति सः खादन् ॥ बत सुह् ख्यवान् छुह् । भक्तं स खादति । इति गौणः ॥

॥ वाक्यारम्भपदात्परो मुख्यः ॥ २३ ॥

वाक्यारम्भस्य यदारम्भपदं स्यात्तस्मान्मुख्यः प्रयोगः प्रयोज्यः ॥ तव पत छुह् आसनस् प्यठ् बिहिथ् पूजा करान् । ततः अस्ति आसनोपरि निविश्य पूजां कुर्वन् ॥

॥ वाक्यान्ते गौणः ॥ २४ ॥

गौणो वर्तमानायाः क्रियास्वरूपं वाक्यान्ते प्रयोज्यम् ॥ तव पत आसनस् प्यठ् बिहिथ् पूजा करान् छुह् । तत आसनोपरि निविश्य पूजां करोति ॥ यद्यपि प्रथमोत्तरे वाक्ये एकार्थके स्तः परं तु वाग्लालित्ये प्रथममेव ज्यायः । किं चात्र वाक्ये स्पष्टं प्रतीयते ॥ ईश्वर् छुह् आसान् काशिय अन्दर् । ईश्वरः अस्ति भवन् काश्याम् ॥ एवमतीतादिषु च निश्चीयत इति ॥

॥ क्रियायाः किमादिशब्दस्वरूपेभ्यो वा सन-प्रत्ययः शङ्कायाम् ॥ २५ ॥

कामप्रवेदनस्य शङ्कायामभीप्सितायां क्रियायाः परः किमादिशब्दस्वरूपेभ्यो वा परः सन प्रत्ययो भवति । यत्र वाक्ये सार्वनामिकं ककारादि शब्दस्वरूपं स्यात्तत्रावश्यं तस्मात्पर एव भवति । यत्र तु न भवेत्तत्र क्रियायाः पर एव भवति । ख्यवान् छ्वासन । किं नु खादति ॥ क्यासन ख्यवान् छ्वा । किं नु खादति ॥ बट कैत्यासन आसान् छिह् । किं नु ब्राह्मणाः कतिचन भवन्ति ॥ कर्सना बांगि यिवान् छुह् । कस्मिन्दिनरात्रिभागे आयाति ॥ अत एव ज्ञापकाद्यथा सन प्रत्ययो भवति तथा संप्रश्ने ऽपि किमादिस्वरूपेभ्यः संबोधनमुख्यप्रत्ययाश्च भवन्तीति ॥ कैत्यासां छूख् आंसि । कियन्तो लोका आसन् ॥

॥ तेभ्यस्ताञ्ताञ्तौ स्वाज्ञातायाम् ॥ २६ ॥

तेभ्यः सार्वनामिककारादिस्वरूपेभ्यः परस्ताञ् प्रत्ययस्ताञ्त् प्रत्ययो वा भवति आत्मनो ऽज्ञातायामाशङ्कायां विवक्षितायां सत्याम् ॥ क्याह् ताञ् वंनुन् । वा क्याह् ताञ्त् वंनुन् । किंचिदुक्तम् ॥ एवं । कर् ताञ् आव् । कस्मिंश्चित्काले आगतः ॥ कूतु ताञ् दितुन् । कियन्मितं दत्तम् । इत्यादि ॥ अत्र प्रत्ययञ्ञकारस्य विकल्पेन मकारो भवति । तत्र क्याह् ताम् वंनुन् [। किंचिदुक्तम्] ॥ इत्यादि स्यात् ॥

॥ ड्यठातिशये पूर्वं च ॥ २७ ॥

तेभ्यः सार्वनामिककारादिस्वरूपेभ्यः पूर्वं ड्यठशब्दः प्रयोज्यः तत्तत्स्वरूपस्यातिशयार्थे गम्यमाने ॥ ड्यठ कर् आव् । वा ड्यठ कन आव् । चिरादागतः ॥ ड्यठ क्याह् [। अतिशयः] ॥ ड्यठ कूति [। अनल्पाः] ॥ ड्यठ कनि [। चिरेण] ॥ इत्यादि ॥

॥ आपरो वा ॥ २८ ॥

स सन प्रत्यय आकारः परो यस्मात्तथा वा भवति ॥ क्यासना ख्यवान् छुह् । किं वस्तु नु खादति ॥ कर्सना यियि । कदा नु आगच्छेत् ॥ कूतिसना आसहान् । कतिचन स्युः ॥ कतिसना ओसु । कुत्र नु आसीत् ॥

॥ माशब्द आदावन्ते वा ॥ २९ ॥

आशङ्कायां सत्यां क्रियायाः पूर्वं पश्चाद्वा माशब्दः प्रयोज्यः ॥ करान् मा छुह् [। करोति मा स्वित्] ॥ मा छुह् करान् [। मा स्वित्करोति] ॥ मा करान् छुह् [। मा करोति स्वित्] ॥ कर्योन्मा [। मा कार्षीत्स्वित्] ॥ सुह् मा करि [। करिष्यति मा स्वित्] ॥ ब्रुह् मा कर [। अहं मा स्वित् करिष्यामि] ॥

॥ वाद्यः पाद्यो वा ऽऽनुप्रासिकशब्दः ॥ ३० ॥

यस्य कस्यचिच्छब्दस्यानुकरणशब्दे कर्तव्ये तस्यैव शब्दस्याद्याक्षरं वकारेण पकारेण वा विपर्यस्य आनुप्रासिकशब्द उच्चारणीयः ॥ करान् वरान् छुह् । करोतीत्यादि ॥ द्यार् व्यार् अनिन् । धनादिकमानयतु ॥ बत वत ख्ययिन् । भक्तादि भक्षयतु ॥ अन्वार् वन्वार् [। क्रमप्राप्तिः] ॥ अन्वार् पन्वार् ॥

॥ तयोरेकतराद्ये तदितरः ॥ ३१ ॥

तयोर्वकारपकारयोर्मध्यात् एकतरे शब्दस्य आद्याक्षरे सति तस्मादितरः प्रयोज्यः वकाराद्ये पकारः पकाराद्ये वकार इति ॥ पर् वर् । पठेत्यादि ॥ पैंस वैंस दितिन् । पणाद्यदात् ॥ वाँगन् पाँगन् अन । वृन्ताकाद्यानय ॥

वाज़ पाज़ छिह् । सूदादयः सन्ति ॥ व्युचु शब्दस्य पोचु शब्द आनुप्रासिको बोध्यः । व्युचु पोचु । संग्रह इत्यादि ॥

॥ अन्येनापि क्वचित् ॥ ३२ ॥

स आनुप्रासिकशब्दो ऽन्येन वर्णेन विपर्यस्य क्वचिद्व्यवह्रियते सार्थकशब्देन वा ॥ निकु सुकु । संभारादि ॥ म्यंडु व्यंडु । ग्रासादि ॥ हंलु कंलु । वक्रादि ॥ हंलु वंलु । परिकरादि ॥ हांन्जू गांन्जू । नाविकादि ॥ फंलु फ्यंतु । भूषणादि ॥ ओन्तु वोन्तु । उत्तानादि ॥

॥ तच्छब्दस्यैकत्वेन क्रियासंबन्धे ऽस् ॥ ३३ ॥

कर्ता यां क्रियां तस्यार्थं विदधाति तस्याः क्रियायाः परः अस् प्रत्ययः सर्वत्र स्यात् ॥ करान् छुस् । तस्यार्थं करोति ॥ करान् छिस् । तस्यार्थं कुर्वन्ति ॥ करान् छुसस् । तस्यार्थं करोमि ॥ करान् छिस् । तस्यार्थं कुर्मः ॥ कर करणे । वर्तमानायां प्रथमैकबहुत्वे पुंसि छुह् छिह् प्रत्ययौ धातोरानागम (सू० १९) इति आन् । अनेनान्ते अस् प्रत्ययः । प्रत्ययेषु हलोपः सर्वत्र (सू०४।१३१) इति हकारलोपः । अस् प्रत्ययस्य स्वरादल्लोपः (सू०३९) इत्यकारलोपः । एवमन्यत् ॥

॥ कर्मण्यन् ॥ ३४ ॥

तच्छब्दस्यैकत्वे कर्मणि सति क्रियायाः परः अन् प्रत्ययो भवति सर्वत्र ॥ करान् छुहन् । तं करोषि ॥ ख्यवान् छुहन् । तं खादसि ॥

॥ बहुत्वेनाख् ॥ ३५ ॥

तेषामर्थे यां क्रियां निर्वर्तयेत्तच्छब्दस्य बहुत्वे वा कर्मणि सति क्रियायाः

परः अख् प्रत्ययः स्यात् सर्वासु विभक्तिषु ॥ करान् छुख् । तेषामर्थे करोति ॥ करान् छिख् । तेषामर्थे कुर्वन्ति ॥ करान् छुसख् । तेषामर्थे करोमि ॥ करान् छिख् । तेषां [अर्थे] कुर्मः । साधनं पूर्ववत् ॥

॥ त्वच्छब्दे कर्मणि भूते च ॥ ३६ ॥

अतीतकालिकक्रियायास्त्वच्छब्दे कर्मणि सति क्रियायाः परः अख् प्रत्ययः स्यात् ॥ कर्योनख् । तेन चकृषे ॥ कुरुमख् । मया चकृषे ॥

॥ भविष्यद्वर्तमानोत्तमेप्यथ् ॥ ३७ ॥

त्वच्छब्दे कर्मणि सति भविष्यन्त्या वर्तमानाया उत्तमपुरुषे ऽपि क्रियायाः परः अथ् प्रत्ययः स्यात् ॥ करथ् । त्वां करिष्यामि ॥ करोथ् । त्वां करिष्यामः ॥ करान् छुसथ् । त्वां करोमि ॥ करान् छिथ् । त्वां कुर्मः ॥

॥ प्रत्यये प्रत्ययखकारस्य हः ॥ ३८ ॥

तत्संबन्धादिप्रत्ययेषु परेषु प्रत्ययसंबन्धिनः खकारस्य हकारो भवति ॥ करान् छुहस् । तस्यार्थे करोषि ॥ करान् छुहख् । तेषामर्थे करोषि ॥ कर करणे । वर्तमानायां मध्यमैकत्वे छुख् । आन् आगमः (१९ सूत्रेण) तच्छब्द (सू० ३३-३५) इत्यादिना अस् अख् प्रत्ययौ । अनेन खकारस्य हकारः । व्यञ्जनं परेण संधेयम् (सू० १।३) ॥

॥ स्वरादल्लोपः ॥ ३९ ॥

प्रत्ययस्वरात्परस्य अकारस्य लोपो भवति ॥ करान् छुस् । तस्मै करोति ॥ करान् छिस् । तस्मै कुर्वन्ति ॥ करान् छिवस् । तस्मै कुरुथ ॥ करान् छिवख् ।

तेभ्यः कुरुथ ॥ प्रथमयोर्हकारस्य लोपे कृते अनेन अकारलोपः । शेषं स्पष्टम् ॥

॥ त्वच्छब्देनाय् ॥ ४० ॥

युष्मच्छब्दैकवचननियतेन त्वच्छब्देन सह क्रियासंबन्धे सति क्रियायाः परः अय् प्रत्ययो भवति सर्वासु विभक्तिषु ॥ करान् छुय् । तुभ्यं करोति ॥ करान् छिय् । तुभ्यं कुर्वन्ति ॥ करान् छुसय् । तुभ्यं करोमि ॥ करान् छिय् । तुभ्यं कुर्मः ॥ साधनं पूर्ववत् ॥

॥ युष्मदा ऽवः ॥ ४१ ॥

युष्मच्छब्देन क्रियासंबन्धे सति क्रियायाः परः सर्वत्र अव प्रत्ययो भवति ॥ करान् छुव । वः करोति ॥ करान् छिव । वः कुर्वन्ति ॥ करान् छुसव । वः करोमि ॥ करान् छिव । वः कुर्मः ॥ क्वचित्संबोधनवत्प्रोक्तौ प्रत्ययौ भवत इति ॥

॥ मच्छब्देनाऽम् ॥ ४२ ॥

अस्मच्छब्दैकत्वनियतप्रयोगेण मच्छब्देन सह संबन्धे सति क्रियापरः अम् प्रत्ययः स्यात् ॥ करान् छुम् । मां [वा] मे करोति ॥ करान् छिम् । मां [वा] मे कुर्वन्ति ॥ करान् छुहम् । मे करोमि ॥ करान् छिवम् । मां [वा] मे कुरुथ । साधनमुक्तवत् ॥

॥ कर्मण्यस् भूते ॥ ४३ ॥

मच्छब्दे कर्मणि सति अतीतकाले क्रियायाः परः अस् प्रत्ययः स्यात् ॥ कर्योनस् । तेनाहं चक्रे ॥ कर्योथस् । त्वयाहं चक्रे ॥

॥ बहुत्वे ऽस्मत्प्रयोगसंबन्ध एव च ॥ ४४ ॥

अस्मच्छब्देन क्रियासंबन्धे सति क्रियायाः परः पूर्वं वा अस्मच्छब्दानेकत्वप्रयोग एव प्रयोज्यः ॥ करान् छुह् अस्य । नः करोति ॥ करान् छिह् अस्य । नः कुर्वन्ति ॥ अस्य करान् छुख् । नः करोषि ॥ अस्य करान् छिष । नः कुरुथ ॥ एवं स्त्रीलिङ्गनियतप्रत्ययेषु च त्वच्छब्दादिसंबन्धप्रत्यया अवगन्तव्याः । तेभ्यश्च कामप्रवेदनतदभावादिप्रत्ययाश्च स्वयमेवावधार्याः । विस्तृतिभयान्नोदाहृताः ॥

॥ चरफ्वशफुहमर्चवुचफिचां नित्यं संबन्धप्रत्ययाः ॥ ४५ ॥

चर अन्तःकोपे । फ्वश फुह अमर्षे । मर्च अन्तःकोपे । वुच दग्धीभवने । फिच विस्मरणे । एषां प्रोक्तसंबन्धप्रत्यया नित्यं भवन्ति ॥ चरान् छ्यस् । [। अन्तःकोपो ऽस्य भवति] ॥ फ्वशान् छ्यस् । फुहान् छ्यस् [। असहनमस्यास्ति] ॥ मर्चान् छ्यस् [। अन्तः कोपो ऽस्य भवति] ॥ वुचान् छ्यस् [। अन्तर्दाहो भवत्यस्य] ॥ फिचान् छ्यस् [। विस्मृतिर्भवत्यस्य] ॥ साधनं सुगमम् । एषां धातुपाठे नित्यस्त्रीलिङ्गकथनात्स्त्रीलिङ्गप्रत्यय एव ॥

॥ षष्ठी कर्तरि सर्वत्र ॥ ४६ ॥

एषां धातूनां सर्वासु विभक्तिषु षष्ठी कर्तरि भवति ॥ तामिस् चरान् छ्यह् ॥ एषां सर्वेषां यत्र कर्तरि प्रयुज्यमाने सति तत्र संबन्धिप्रत्ययानामनित्यता बोध्येति ॥

॥ गछो ऽपि योग्यार्थेत्र ॥ ४७ ॥

गछ गतौ सामञ्जस्ये । इत्यस्य योग्यार्थविषये अत्र षष्ठी कर्तरि भवति ॥

[४७ । योग्यार्थ इत्यत्र अभीष्टार्थे ऽपि चरितार्थता ।]

तमिस् गछ्रान् छुह् ज़ि परहा [। तस्याभीष्टमहं योग्यो ऽस्मि पठेयमिति] ॥

॥ प्रथमैकानेकत्वे च ॥ ४८ ॥

तस्यैव धातोरत्र वर्तमानाविभक्तौ नित्यं प्रथमपुरुषस्य एकत्वबहुवचनप्रत्ययावेव भवतः न तु मध्यमपुरुषादयः । किं तु ते संबन्धिप्रत्ययैर्विविच्यन्ते ॥ गछ्रान् छुस् । गछ्रान् छुख् । गछ्रान् छुय् । गछ्रान् छुव । गछ्रान् छुम् । गछ्रान् छुह् ॥

॥ सर्वत्रानः सकर्मकेभ्यः कर्मकर्तरि ॥ ४९ ॥

सर्वत्र सर्वेषु कालेषु सकर्मकेभ्यो धातुभ्यः परः कर्मकर्तरि अन प्रत्ययो भवति ॥

॥ पूर्वे परे वा यिधातुरूपतः ॥ ५० ॥

स अनप्रत्यययुक्तो धातुः पूर्वे वा परे यि आगमने इत्यस्य धातोः स्वस्वकालीनप्रयोगान्तर्वर्ति यद्रूपं स्यात्तस्मात्प्रयोज्यः ततः कर्मकर्तृप्रयोगा भवन्ति ॥ रनन यिवान् छुह् बत । भक्तं पच्यते ॥ बत छुह् रनन यिवान् । भक्तं पच्यते ॥ पानय् छुह् यिवान् करन । स्वयं क्रियते । अर्थात् कृतं भवति ॥ रन पाके पूर्वसूत्रेण (४९) अन प्रत्ययः । यि धातो : यिवान् छुह् इति रूपात्पूर्वं रनन इति प्रयुक्तः । अपरत्र वर्तमानापरस्वरूपे यिवान् इत्यस्मात्पूर्वं प्रयुक्तः । तृतीये तु परः ॥

॥ वा ऽकर्मकेभ्यः ॥ ५१ ॥

अकर्मकेभ्यो धातुभ्यः प्रोक्ता क्रिया वा विकल्पेन भवति । किंच विभक्तिप्रयोगा अपि स्वयं कर्मकर्तृप्रयोगा भवन्ति ॥ ज़ोतान् छुह् । वा । ज़ोतन यिवान् छुह् । दीप्यते ॥ दज़ान् छुह् । वा । दज़न यिवान् छुह् । दह्यते ॥ ज़ोत दीप्तौ । दज़ भस्मीभवने । शेषं पूर्ववत् ॥

॥ बोज़ः कर्मकर्ता चाक्षुषज्ञान एव नित्यम् ॥५२॥

बोज़ निशामने इति धातोः कर्मकर्तृस्वरूपं नित्यं चाक्षुषज्ञान एव भवति न तु श्रवणज्ञाने ॥ बोज़न यिवान् छुह् । स्वयं दृष्टं भवति ॥ बोज़न आव् । दृष्टिमागतः ॥ बोज़न यियि । दृष्टिमागमिष्यति ॥ श्रवणज्ञाने तु । बोज़ान् छुह् । शृणोति । न तु दृश्यते ॥ बोज़नस् अन्दर् यिवान् छुह् । श्रवणमागच्छतीति कर्मकर्तृस्वरूपं सेत्स्यति ॥

॥ गरः काठिन्ये च ॥ ५३ ॥

गर घट्टने इत्यस्य कर्मकर्तृस्वरूपं काठिन्ये भवति चशब्दात्स्वार्थे च ॥ गरन यिवान् छुह् । कठिनीभवति । घटितं च भवति ॥

॥ डेषो ऽनो लोपो द्रैँठादेशश्च ॥ ५४ ॥

डेष प्रेक्षणे इत्यस्मात् अन प्रत्ययस्य लोपो भवति डेषश्च द्रैँद् ओदेशो भवति ॥ द्रैँद् यिवान् छुह् । दृष्टिमायाति ॥ डेषन यिवान् छुह् । इति न साधुशब्दः ॥

॥ नेश्चाञ्चल्ये ऽपि ॥ ५५ ॥

नि हरणे इत्यस्य कर्मकर्ता चाञ्चल्ये भवति अपिशब्दात्स्वार्थे ऽपि ॥ निन यिवान् छुह् । चञ्चलो भवति । वा । हृतो भवति ॥ अत्र स्वरादल्लोप (सू० ३९) इत्यकारलोपः ॥

॥ हेर्बन्धने ऽपि ॥ ५६ ॥

हि ग्रहणादिषु इत्यस्य कर्मकर्ता व्यवहारबन्धे भवति अपिशब्दात्स्वार्थे ऽपि ॥ ह्यन यिवान् छुह् । बद्धो भवति । क्रीतश्च भवति ॥ धातोरकारागमे (८।२।११ सूत्रेण) कृते । अकारादकारलोपः (सू० ३९) ॥

॥ भावशब्देभ्यो हेर्भूतप्रयोगा वर्तमानबोधकाः ॥ ५७ ॥

भावशब्देभ्यः पूर्वे परे वा हि ग्रहणे इत्यस्य धातोर्भूतप्रयोगा वर्तमानकालस्य बोधका भवन्ति ॥ करुन् ह्यतुन् । कर्तुं प्रवृत्तः ॥ ह्यतुख् परुन् । पठितुं प्रवृत्ताः ॥ संप्रतिकाले करोति पठन्ति चेत्यर्थतो ऽवगम्यते ॥

॥ ज़ानो भविष्यन्त्याश्च ॥ ५८ ॥

ज़ान अवबोधने इत्यस्य धातोर्भविष्यन्तीप्रयोगा भावशब्देभ्यः पूर्वे वा परे प्रयुक्ता वर्तमानकालबोधका भवन्ति । चशब्दात्केवलाः प्रयोगाश्चेति ॥ करुन् ज़ानि । करणं जानाति ॥ परुन् ज़ानि । पठनं जानाति ॥ लेखुन् ज़ानन् । लेखनं जानन्ति ॥ ज़ेनुन् ज़ानन् । अर्जनं जानन्ति ॥ चशब्दादन्यतो ऽपि च । स्यठाह् ज़ानि । बहु जानाति ॥ विद्या ज़ानि । विद्यां जानाति ॥ इत्थमेवातीतप्रयोगा भविष्यदर्थे क्वचिद्व्यवह्रियन्ते । यथा । तमिस् ल्यूखुथ् सोनु नमस्कार् । तस्मै नो नमस्कारो लेख्यः ॥ अत्र ल्यूखुथ् इति भूतकालप्रयोगो भविष्यदर्थे ॥

॥ पाथो नित्यम् ॥ ५९ ॥

पाथ सद्भावे इत्यस्य भविष्यन्तीप्रयोगा नित्यं वर्तमानार्थे भवन्ति तस्य वर्तमानप्रयोगदर्शनाभावात् ॥ पाथि । सन्नस्ति ॥ पाथन् । सन्तः सन्ति ॥ पाथख् सन्नसि ॥ पाथिव् । सन्तः स्थ ॥ पाथ । सन्नस्मि ॥ पाथव् । सन्तः स्मः ॥ किं चास्य धातोरतीतप्रयोगादर्शनाच्चापूर्णभूतप्रयोगा अतीते भवन्ति ॥ पाथिहे [। आसीत्] ॥ पाथहान् [। आसन्] ॥ पाथहाख् [। आसीः] ॥ पाथिहीव् [। आस्त] ॥ इत्यादि । तथा पाथिहेहय् । इत्यादयश्च साधवो भवन्ति । तथा चास्य धातोः कृदन्तस्वरूपाणि च न सेत्स्यन्तीति बोध्यम् ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते आख्यातप्रक्रियायां वर्तमानपादः प्रथमः ॥८।१॥

अथाख्यातप्रक्रियायाम् ॥ ८ ॥

भविष्यत्पादः ॥ २ ॥

॥ अनारब्धा क्रिया भविष्यत्कालः ॥ १ ॥

वर्तमानासन्नोत्तरकालादुत्तरः सर्वः कालः भविष्यत्कालसंज्ञो भवति। तत्कालस्य सर्वाः क्रिया अनारब्धा एव भवन्ति ॥

॥ विध्याशीर्भविष्यन्त्यपूर्णभूतार्थभेदाच्चतुर्विधः ॥ २ ॥

स भविष्यत्कालो विधिः, आशीः, भविष्यन्ती, अपूर्णभूतार्था नाम क्रियातिपत्तिः, इति भेदतश्चतुष्प्रकारो भवति। क्रियातिपत्तेरत्रापूर्णभूतार्थकथनादतीतकाले ऽपि भवति ॥

॥ आसन्नदूराभ्यां विधिर्द्विविधः ॥ ३ ॥

वर्तमानकालान्निकटकाल आसन्नविधिः दूरकालो दूरविधिरिति द्विविधो भवति। तत्र वक्तुरुत्तमपुरुषस्य स्वस्मिन्विधिनिषेधाभावाच्चत्वार एव प्रथमपुरुषैकत्वानेकत्वमध्यमैकत्वानेकत्वप्रत्ययाः प्रयुज्यन्ते ॥

॥ मुख्यगौणाभ्यां निकटविधिर्द्विधा ॥ ४ ॥

अवश्यं करणीयाज्ञा मुख्यंनिकटविधिः तदितरो गौणनिकटविधिरिति द्विप्रकारो भवति ॥

॥ निकटविधौ इन् इन् हि इव् प्रत्ययाः ॥ ५ ॥

स्पष्टम् ॥ करिन् । करोतु ॥ करिन् तिम् । कुर्वन्तु ॥ कर् । कुरु ॥ करिव् । कुरुत ॥ हि प्रत्ययस्य इकार उच्चारणार्थः । व्यञ्जनान्ताद्धलोप (सू० ६) इति हकारस्य लोपः ॥

॥ व्यञ्जनान्ताद्धलोपः ॥ ६ ॥

व्यञ्जनान्ताद्धातोर्हिप्रत्ययहकारस्य लोपो भवति ॥ कर् । कुरु ॥ कर करणे मध्यमैकत्वे हि इकार उच्चारणार्थः अनेन हकारलोपः । व्यञ्जनान्तात्किम् । दिह् । देहि ॥ निह् । हर ॥ दि दाने । नि हरणे । हि प्रत्ययः । इकार उच्चारणार्थः ॥

॥ ओदेदुपधाया ऊदीतौ ॥ ७ ॥

धातोरुपधाभूतस्य ओकारस्य एकारस्य च क्रमेण ऊकारईकारौ भवतः ॥ रूजिन् । तिष्ठतु ॥ तूलिन् । तोलयतु ॥ पूठिन् । पुष्यताम् ॥ रोज स्थितौ । तोल तुलने । पोठ स्थूलीभवने । अनेन उपधाया ओकारस्य ऊकारः । नीरिन् । निर्गच्छतु ॥ शींकिव् । शङ्कन्ताम् ॥ पीडिन् । निष्पीड्यताम् ॥ नेर निर्गमने । शेंक शङ्कायाम् । पेड निर्यासे । अनेन उपधाया एकारस्य ईकारः ॥

॥ न हौ ॥ ८ ॥

हि प्रत्यये परे उपधाया ओदेतोरूकारेकारौ न भवतः ॥ रोज् । तिष्ठ ॥ तोल् । तोलय ॥ नेर् । निर्गच्छ ॥ शँक् । शङ्कस्व ॥ साधनं सुगमम् ॥

॥ चरादीनामिन्प्रत्ययसंबन्धप्रत्ययैर्विधिः ॥ ९ ॥

चर अन्तःकोपे इत्यादीनां धातूनां प्रथमपुरुषस्य इन् प्रत्ययेन तत्छब्दादिसंबन्धे विधीयमाने सति सर्वप्रत्ययानां बोधो भवति स एवात्र विधिः ॥ चरिनस् । चरिनख् । चरिनय् । चरिनव ॥ एवं शेषाणामपि ज्ञेयम् ॥

॥ स्वरान्ताद्यागम इकारे ॥ १० ॥

स्वरान्ताद्धातोरिकारे परे यकारागमो भवति ॥ दियिव् । दत्त ॥ नियिव् । हरत ॥ दि दाने । नि हरणे । मध्यमानेकत्वे इव् प्रत्ययः अनेन यकारागमः ॥

॥ सर्वत्राकारागमो निदियिवर्जितात् ॥ ११ ॥

स्वरान्ताद्धातोः सर्वत्र सर्वासु विभक्तिषु अकारागमो भवति । निहरणे । दि दाने । यि आगमने । एतान्वर्जयित्वा ॥ ह्यह् । क्रीणीहि ॥ ख्यह् । खाद ॥ च्यह् । पिव ॥ हि क्रीणनग्रहणधारणेषु । खि खादने । चि पाने । मध्यमैकत्वे हि प्रत्ययः अनेनाकारागमः । इकारो ऽसवर्णे यो ऽपरलोप (सू० १।१०) इति यत्वम् । व्यञ्जनं परेण संधेयम् (सू० १।३) । निदियिवर्जितात्किम् । निह् । हर ॥ दिह् । देहि ॥ यिह् । एहि ॥ साधितचरा एव ॥

॥ येर्व्वलादेशो वा ॥ १२ ॥

यि आगमने इत्यस्य विधौ विषये व्वल आदेशो वा भवति ॥ व्वलिन् । आयातु ॥ व्वल । एहि ॥ व्वलिव् । एत ॥ साधनं पूर्ववत् ॥

॥ व्व इनि यो वा ॥ १३ ॥

व्व उत्पत्तौ इत्यस्य इन्प्रत्यये परे वकारस्य यकारो वा भवति ॥ व्वयिन् । भवतु ॥ पक्षे । व्विन् ॥ एवमाशीर्यन्प्रत्यये ऽपि ज्ञेयः ॥

॥ गौणे प्रत्ययस्वरात्तः ॥ १४ ॥

गौणविधिरपि द्विविध एक उपेक्ष्याज्ञापनं द्वितीय आक्षेपतः कथनम् । तयोर्द्वयोरेव विध्योः प्रत्ययस्वरात्परस्तकारागमो भवति ॥ कॅरितन् । करोतु नाम ॥ कॅरितन् । कुर्वन्तु नाम ॥ कॅरितव् । कुरुत नाम ॥ कर करणे निकट विधौ इन् इन् हि इव् प्रत्ययाः (सू० ५) । अनेन इकारात्परस्तकारः धातुस्वरस्य चाप्रसिद्धता विज्ञेया ॥ खॅरितन् । आरोहयतु नाम ॥ वॅलितन् । अवरोहयतु नाम । साधनं सुगमम् ॥

॥ हौ धातोरेव ॥ १५ ॥

हि प्रत्यये परे धातोरेव तकारागमो भवति ॥ कर्त । कुरु नाम ॥ दित । देहि नाम ॥ कर करणे । दिदाने । हि प्रत्ययः व्यञ्जनान्ताद्धलोपः (सू० ५) । प्रत्ययलक्षणाद् [पा० १।१।६२।] अनेन कर् दि इत्याभ्यां परस्तकारागमः ॥ कर्तन् । तं कुरु ॥ कॅरितोन् । तं कुरुत ॥

॥ व्यञ्जनान्तात्संबन्धप्रत्ययादेरुकारः ॥ १६ ॥

व्यञ्जनान्तं धातुस्वरूपं मध्यमैकत्व एव भवति तस्मात्तच्छब्दादिसंबन्धप्रत्यय-

संबन्धिन आदिस्वरस्य उकारो भवति ॥ करुस् । तस्मै कुरु ॥ करुख् । तेभ्यः कुरु ॥ करुम् । मे कुरु ॥ व्यञ्जनान्तात्किम् । दिस् । तस्मै देहि ॥ निस् । तस्माद्धर ॥ दि दाने । नि हरणे । हि प्रत्ययः । इकार उच्चारणार्थः । ततः दिह् स्वरूपात् अस् प्रत्ययः । प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) इति हलोपः । स्वरादलोप (सू० ८।१।३९) इति अकारलोपः । एवं । कर्तस् । तस्मै कुरु ॥ पर्तस् । तस्मै पठ ॥ अत्र तकारागमात्स्वरान्तत्वे सिद्धे प्रोक्तसूत्रावाप्तिर्न भवति ॥

॥ वकारात्सपूर्व ऊकारः ॥ १७ ॥

वकारात्परः संबन्धप्रत्ययादिस्वरः पूर्ववर्णेन सह ऊकारो भवति ॥ कर्यूस् । कुरुत तस्मै ॥ दिय्यूस् । तस्मै दत्त ॥ करिव् दियिव् इति स्वरूपाभ्यामस् प्रत्ययः अनेन वकारेण सह अकारस्य ऊकारः यत्वम् ॥

॥ तकारादोकारः ॥ १८ ॥

तकारात्परयोस्तयोर्वकारअकारयोरोकारो भवति ॥ कॄतोन् । तं कुरुत नाम ॥ कॄतोस् । तस्य कुरुत नाम ॥ कॄतोख् । तेषां कुरुत नाम ॥ कॄतोम् । मे कुरुत नाम ॥ साधनं पूर्ववत् ॥

॥ मो निषेधार्थो ऽत्रैव ॥ १९ ॥

निषेधार्थको मकारः अत्रैव विभक्तिविशेषे क्रियायाः पूर्वे वा परे प्रयोज्यो नान्यत्र ॥ शेषे विभक्तिसमुदाये माशब्द आशङ्कार्थो भवति विध्याशिषोरेव निषेधार्थको भवतीति ज्ञेयम् ॥ म करिन् । मा करातु ॥ म कर् । मा कुरु ॥ म करिव् । मा कुरुत । साधनं सुगमम् ॥ अत्रैव किम् । करान् लुन । न करोति ॥ कॄन् न । नाकरोत् ॥ कॄजि न । न कुर्यात् ॥ कॄज्यन् न । तं न कुर्यात् ॥ करि न । न करिष्यति ॥

॥ संबुद्धिगौणप्रत्यया मात्परा अपि ॥२०॥

लिङ्गप्रकरणोक्तोत्तमादिसंबोधनप्रत्यया गौणविधिप्रत्ययाश्च मकारात्पराः प्रयोज्याः । अपिशब्दात् गौणप्रत्ययः पूर्ववदप्यत्रापि प्रयोज्यः । अत एव निर्देशान्मकारात्परा अपि प्रयोज्याः ॥ मा कर् । मा कुरु ॥ मवा कर् । मा कुरु ॥ मसा कर् । मा कुरु ॥ एवं स्त्रीसंबोधनप्रत्ययाश्च ॥ मत कॅरितन् । मा करोतु नाम ॥ मत कर्त । मा कुरु नाम ॥ मत कॅरितव् । मा कुरुत नाम ॥ मत वा कर्त । मा कुरु नाम ॥ मतसा कर्त । मा कुरु नाम ॥ मता कर्त । मा कुरु नाम । इत्यादयः ॥

॥ विधितदतिपत्तिभेदाद्दूरविधिर्द्विविधः ॥ २१ ॥

एक आगामिकाले कर्मप्रेरणम् अपरस्तस्य कर्मणः अनिष्पत्तिकथनमिति दूरविधिर्द्विधा भवति ॥

॥ दूरविधौ ज़िप्रत्ययः सर्वेषु ॥ २२ ॥

सर्वेषु वचनेषु ज़ि प्रत्यय एक एव ज्ञेयः स च तच्छब्दादिकर्तृप्रयोगेण भिद्यते ॥

॥ तदतिपत्तौ हेपरः ॥ २३ ॥

हेशब्दः परो यस्मादेवंविधो ज़ि प्रत्ययस्तदतिपत्तौ प्रत्ययो भवेत् । छरादीनां तु युष्मदि हेपर इति किंचाक्षेपादतीतकालोऽपि भवतीति बोध्यम् ॥

॥ व्यञ्जनान्तादिचागमो ज़ौ ॥ २४ ॥

व्यञ्जनान्ताद्धातोर्ज़ि प्रत्यये परे इच् आगमो भवति चकार उच्चारणार्थः ॥ कॅरिज़ि । कुर्यात् ॥ कर करणे दूरविधौ ज़ि प्रत्ययः (सू० २२) । अनेन इच्

चकारलोपः अयमेव प्रयोगः सर्वेषु वचनेषु विज्ञेयः ॥ सुह् कॅरिज़ि । सः कुर्यात् ॥ तिम् कॅरिज़ि । ते कुर्युः ॥ चूह् कॅरिज़ि । त्वं कुर्याः ॥ त्वंहि कॅरिज़ि । यूयं कुर्यात ॥ व्यञ्जनान्तात्किम् । दिज़ि । दद्यात् ॥ ख्यज़ि । खादेत् ॥ तदतिपत्तिप्रयोगाश्च यथा । कॅरिज़िहे ॥ कुर्वीत नाम ॥

॥ नासमोर्लोपो ज़ेः ॥ २५ ॥

अस् अम् इत्येतयोः प्रत्यययोः स्वरादल्लोप (सू० ८।१।३९) इति प्राप्तो लोपो ज़िप्रत्ययात् न भवति ॥ कॅरिज़्यम् । मे कुर्याः ॥ कॅरिज़्यस् । तस्य कुर्याः ॥ असमोः किम् । कॅरिज़िय् । ते कुर्यात् ॥ ज़ेः किम् । कॅरिज़िहेस् । तस्य कुर्वीत नाम ॥ अत्र अस् प्रत्ययस्य स्वरादल्लोप (सू० ८।१।३९) इत्यकारलोपः ॥

॥ आशिषि यन् यन् यख् इव् प्रत्ययाः ॥२६॥

स्पष्टम् । तत्रास्या विभक्तेर्लोके ऽत्यल्पप्रसिद्धतया तत्स्वरूपसाधनसूत्राणि नाभिहितानि । परंतु पूर्णभूते ये ये आदेशा वक्ष्यन्ते ते ऽत्रापि धीमद्भिरवधार्याः । येषां च धातूनां क्रिया लोके प्रचारितास्ति ते उदाहृतिद्वारा व्यक्तीक्रियन्ते ॥ कर्यन् । क्रियात् ॥ लश्यन् । जीव्यात् ॥ रङ्यन् । पच्यात् ॥ ज़ेङ्यन् । जीयात् ॥ आश्यन् । भूयात् ॥ अत्रैव सकारान्तस्य शकारो दृश्यते ॥ नान्तानां तु पूर्णभूतप्रक्रियया (८।३।७३ । सूत्रेण) नकारस्य ञकारः ॥ लश्यनय् । ते जीव्यात् ॥ पोष्यनय् । ते पर्याप्यात् ॥ लस सम्यग्जीवने । पोष पर्याप्ततायाम् शेषं पूर्ववत् ॥ एवं । ब्रूय्यन् । भूयात् ॥ म ब्रूय्यन् । मा भूयात् ॥

॥ छावो यखि यो वा ॥ २७ ॥

छाव उपभोगे । इत्यस्य यख् प्रत्यये परे वकारस्य यकारो भवति वा विकल्पेन ॥ छाय्यख् । निर्विश्याः ॥ पक्षे । छाव्यख् । निर्विश्याः ॥

॥ भविष्यन्ती इ अन् अख् इव् अ अव् प्रत्ययाः ॥ २८ ॥

सुगमम् ॥ करि । करिष्यति ॥ करन् । करिष्यन्ति ॥ करख् । करिष्यसि ॥ करिव् । करिष्यथ ॥ कर । करिष्यामि ॥ करव् । करिष्यामः ॥

॥ स्वरान्तानामुत्तमे मागमः ॥ २९ ॥

स्वरान्तानां धातूनामुत्तमपुरुषे मकारागमो भवति ॥ दिम । दास्यामि ॥ दिमव् । दास्यामः ॥ दि दाने उत्तमपुरुषैकत्वानेकत्वयोः अ अव् प्रत्ययौ अनेन मागमः ॥ उत्तमे किम् । दियि । दास्यति ॥ दिन् । दास्यन्ति ॥ दिख् । दास्यसि ॥ दियिव् । दास्यथ ॥ दि दाने । इ अन् अख् इव् प्रत्ययाः । स्वरान्ताद्यागम इकारे (सू० १०) इत्यनेन इकारागमः । अपरत्र स्वरादल्लोपः (सू० ८।१।३९) इत्यकारलोपः ॥ तच्छब्दादिसंबन्धप्रयोगाश्च यथा ॥ कर्यस् । तस्य करिष्यति [। अस्यां विभक्तौ प्रथमपुरुषकर्तृसंबन्धार्थे स्वरादल्लोप-(सू० ८।१।३९) कार्यमनित्यं ज्ञेयम्] ॥ करनस् । करिष्यन्ति तस्य ॥ करहन् । करिष्यसि तम् ॥ करहस् । करिष्यसि तस्य ॥ कर्यूस् । करिष्यथ तस्य ॥ करस् । करिष्यामि तस्य ॥ करन् । करिष्यामि तम् ॥ करोस् । करिष्यामस्तस्य ॥ करोन् । करिष्यामस्तम् । पूर्वं साधितानि ॥ ऋरादीनां तु विधिवदत्रापि विधिर्ज्ञेयः ॥

॥ अपराः प्रत्ययाः संप्रश्ने ॥ ३० ॥

ते भविष्यन्तीप्रत्यया अपरा अकारः परो येभ्यस्तथा संप्रश्ने प्रत्ययाः स्युः ॥

॥ प्रथमोत्तमैकत्वे दीर्घः ॥ ३१ ॥

तस्य अकारस्य प्रथमैकवचने उत्तमैकवचने च दीर्घो भवति ॥ ते प्रत्ययाश्च यथा । या अन अख इव आ अव भवन्ति । उदाहरणानि । कर्या । किं कुर्यात् ॥ करन । किं कुर्युः ॥ करख । किं कुर्याः ॥ करिव । किं कुर्यात ॥ करा । किं कुर्याम् ॥ करव । किं कुर्याम ॥ साधितचराण्येव ॥

॥ क्रियातिपत्तिः इहे अहान् अहाख् इहीव् अहा अहाव् प्रत्ययाः ॥ ३२ ॥

स्पष्टम् ॥ करिहे । अकरिष्यत् ॥ करहान् । अकरिष्यन् ॥ करहाख् । अकरिष्यः ॥ करिहीव् । अकरिष्यत ॥ करहा । अकरिष्यम् ॥ करहाव् । अकरिष्याम ॥ स्वरान्तधातूनां यथा ॥ च्ययिहे । अपास्यत् ॥ च्यहान् । अपास्यन् ॥ च्यहाख् । अपास्यः ॥ च्ययिहीव् । अपास्यत ॥ च्यमहा । अपास्यम् ॥ च्यमहाव् । अपास्याम ॥ चि पाने स्वरान्ताद्यागम इकारे (सू० १०) इति यकारागमः । सर्वत्राकारागमो निदियिवर्जितात् (सू० ११) इति धातोरकारागमः । स्वरादल्लोप (सू० ८।१।३९) इत्यकारस्य लोपः । स्वरान्तानामुत्तमे मागम (सू० २९) इति मकारागमः । सर्वत्र यत्वम् ॥

॥ कौतुके सर्वे प्रत्यया ह्यपराः ॥ ३३ ॥

कौतुकेन क्रियातिपत्तावभिहितायां सत्यां सर्वे प्रोक्तप्रत्ययास्तच्छब्दादिसंबन्धप्रत्ययाश्च ह्यपरा ह्यशब्दः परो येभ्यस्तथा प्रयोज्याः ॥ करिहे ह्य् ।

[३२ । अहान् अहाख् अहा अहाव् इत्येषु प्रत्ययेषु हा इत्याश्रित आकारो ऽप्रसिद्ध उच्चार्यते ।]

चेदकरिष्यत् ॥ करहान् हय् । चेदकरिष्यन् ॥ करिहेस् हय् । चेत्तस्याकरिष्यत् ॥ करहानस् हय् । चेत्तस्याकरिष्यन् ॥

॥ आक्षेपे ऽपि नयूपराः ॥ ३४ ॥

आक्षेपेण क्रियातिपत्तावभिहितायां सत्यां ते प्रत्यया नयूपरा भवन्ति । अपिशब्दाद्धेतुमद्भावे ऽपि ॥ करिहे नय् । चेन्नाकरिष्यत् । वा । खलु नाकरिष्यत् ॥ करहान् नय् । चेन्नाकरिष्यन् ॥

॥ कर्तुः परौ वा ॥ ३५ ॥

स हय् प्रत्ययः नय् प्रत्ययश्च कर्तुः परौ वा भवतः ॥ सुहय् करिहे । स चेदकरिष्यत् ॥ तिम् हय् करहान् । ते चेदकरिष्यन् ॥ सुनय् करिहे । स चेन्न कुर्यात् ॥ तिम् नय् करहान् । ते चेन्न कुर्युः ॥ सुय् करिहे । इति निश्चयप्रत्ययेन स्वरूपं विवेच्यम् ॥ अत्र प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) इति सुह् शब्दहकारस्य लोपः । शेषं साधनं पूर्ववत् । च्नरादीनां तु प्रोक्तवद्बोध्यम् ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते आख्यात-
प्रक्रियायां भविष्यत्पादो द्वितीयः ॥८।२॥

॥ अथाख्यातप्रक्रियायाम् ॥ ८ ॥

॥ भूतपादः ॥ ३ ॥

॥ समापितक्रियाकालो भूतकालः ॥ १ ॥

स्पष्टम् ॥

॥ भूतसामान्यपूर्णापूर्णभेदाच्चतुर्विधः ॥ २ ॥

सो ऽतीतकालः भूतसामान्यभूतपूर्णभूतअपूर्णभूतभेदैश्चतुष्प्रकारो विज्ञेयः ॥

॥ भावकर्मिणां भूते उन् उख् उथ् उव उम् उ प्रत्ययाः ॥ ३ ॥

भावधातूनां येषां धातुपाठे अतीतप्रयोगा भावे पठिताः । भावप्रयोगस्तु यत्र तृतीया कर्तृस्थाने स्यात् । कर्मिणां धातूनां च येषां धातुपाठे अतीतकालप्रयोगाः कर्मणि अभिहिताः । कर्मप्रयोगस्तु यत्र तृतीया कर्तृस्थाने प्रथमा कर्मस्थाने स्यात् । तेषामुभयेषां धातूनां भूते उन् आदिप्रत्यया बोध्याः । अत्र शब्दशास्त्रे भावकर्मिणां धातूनामतीतकाले कर्तृप्रयोगाभावः । अकर्मकाणां तु कर्मप्रत्ययाभावः । कर्तृप्रयोगस्तु यत्र प्रथमा कर्तृस्थाने स्यादिति ॥ भावे यथा ।

अ॑सुन् । अहस्यत ॥ न॑चुन् । अनृत्यत ॥ च॑सुन् । व्यहस्यत ॥ अस हसने । नच्च नर्तने । च्चस अतिहासे । अनेन उन् ॥ कर्मणि यथा । क॑रुन् । तेन तया वा कृतम् ॥ क॑रुख् । तैस्ताभिर्वा कृतम् ॥ क॑रुथ् । त्वया कृतम् ॥ क॑रुव । युष्माभिः कृतम् ॥ क॑रुम् । मया कृतम् ॥ क॑रु । अस्माभिः कृतम् ॥ कर करणे अनेन उन् आदिप्रत्ययाः ॥

॥ कर्मणि पुंबहुत्वे इदाद्यस्वरस्य ॥ ४ ॥

कर्मिणां धातूनां पुंलिङ्गस्य बहुवचने कर्मणि सति सर्वेषां प्रत्ययानामादिस्वरस्य इकारो भवति ॥ ली॑खिन् । तेन अलिख्यन्त ॥ ली॑खिख् । तैर्लिखिताः पुं० ॥ ली॑खिथ् । त्वया लिखिताः पुं० ॥ ली॑खिव । युष्माभिर्लिखिताः ॥ ली॑खिम् । मया लिखिताः पुं० ॥ ली॑खि । अस्माभिर्लिखिताः ॥ लेख लेखने भावकर्मिणां भूत (सू० ३) इति उन् आदिप्रत्ययाः । अनेनादिस्वरस्य इकारः । पुंस्येकारस्य यूदीतौ (सू० २१) इत्यनेन सूत्रेण एकारस्य ईकारः ॥

॥ स्त्रियां यत् ॥ ५ ॥

सकर्मकाणां धातूनां स्त्रीलिङ्गस्य बहुत्वे कर्मणि सति प्रत्ययादिस्वरस्य यकारो भवति ॥ कर्यन् । तेन ताः कृताः ॥ कर्यख् । तैस्ताः कृताः ॥ लेछ्यन् । तेन ता लिखिताः ॥ रछ्यन् । तेन ता रक्षिताः ॥ कर करणे । लेख लेखने । रछ रक्षायाम् । उन् उख् प्रत्ययौ । अनेन उकारस्य यत्वम् । स्त्रियामीदेतौ सर्वत्र (सू० २३) इति उपधाया एकारः । कवर्गस्यैकत्वे ऽपि (सू० ७१) इत्यनेन लेखः खकारस्य छकारः ॥

॥ इकारान्तादेकत्वे ऽपि ॥ ६ ॥

इकारान्ताद्धातोरेकत्वे कर्मणि च प्रत्ययादिस्वरस्य यकारो भवति ॥

ख्ययन् ॥ तेन सा भुक्ता ॥ च्ययन् । तेन सा पीता ॥ नियन् । तेन सा नीता ॥ खि खादने । चि पाने । नि हरणे । उन् प्रत्ययः अनेनोकारस्य यत्वम् । सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इति सूत्रेण प्रथमयोः अकारागमः ॥

॥ हिद्योरत् ॥ ७ ॥

हि ग्रहणक्रीणनधारणेषु । दि दाने । इत्यनयोः स्त्रीबहुत्वे कर्मणि सति आदिस्वरस्य अकारो भवति । चानुकृष्टं नानुवर्तत इति एकत्वे कर्मणि न ज्ञेयः ॥ ह्यन्न् । तेन ता धृताः ॥ दिन्न् । तेन ता दत्ताः ॥ उन् प्रत्ययः प्रथमस्य सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इत्यकारागमः । हिद्योस्तकारागम (सू० ३२) इति तकारागमः । अनेन प्रत्ययादिस्वरस्य अकारः । तवर्गस्याप्रसिद्ध (सू० ७२) इत्यप्रसिद्धन्नकारादेशः । हिद्योः किम् । ख्ययन् । सा भुक्ता ॥ च्ययन् । सा पीता । नियन् । सा नीता ॥ पूर्वं साधितान्येव ॥

॥ एकत्वे ऊमात्रादेशः ॥ ८ ॥

सकर्मकाणां धातूनां स्त्रीलिङ्गस्यैकत्वे कर्मणि सति प्रत्ययादिस्वरस्य ऊमात्रादेशो भवति ऊमात्रान्तत्वे सिद्धे पूर्वोक्तलिङ्गप्रकरणपरिभाषया * पूर्ववर्णस्वरस्याप्रसिद्धतावधार्या ॥ कर्रून् । सा कृता ॥ मार्रूथ् । त्वया सा हता ॥ खार्रूम् । मया सारोहिता ॥ कर करणे । मार मारणे । खार आरोहणे । उन् उथ् उम् प्रत्ययाः । अनेनादिस्वरस्य ऊमात्रादेशः ॥

॥ चुवमोरवयोर्नित्यम् ॥ ९ ॥

चुव कलहे । मोरव पीडासहने । इत्यनयोरेकत्वे कर्मणि नित्यं प्रत्ययादिस्वरस्य

[* ऊदन्तत्वे सिद्धे पूर्वस्वरस्याख्यातता ज्ञेयेति २।१।७ सूत्रे द्रष्टव्यम् ।]

ऊमात्रादेशः स्यात् । तयोः पुंलिङ्गकर्माभावत्वान्नित्यपदग्रहणम् ॥ चुवून् । तेन युद्धम् ॥ मोरवून् । सोढा ॥ एकत्वे किम् । चुव्यन् । युद्धाः ॥ मोरव्यन् । सोढाः ॥ भावकर्मिणाम् (सू० ३) इति उन् । स्त्रियां यत् (सू० ५) इति उकारस्य यकारः ॥

॥ पुंकर्तृप्रत्ययोकारस्य स्त्रियां च ॥ १० ॥

पुंलिङ्गस्य यः कर्तृप्रत्ययसंबन्धी उकारस्तस्य स्त्रीलिङ्गविषये ऊमात्रादेशः स्यात् ॥ वोतू । प्राप्तः ॥ वोचू । प्राप्ता ॥

॥ इकारस्य यत् ॥ ११ ॥

पुंलिङ्गस्य यः कर्तृसंबन्धी इकारस्तस्य यकारो भवति स्त्रीलिङ्गविषये ॥ थ्कि । श्रान्तास्ते ॥ थच्य । श्रान्तास्ताः ॥

॥ अप्रसिद्धचवर्गादकारः ॥ १२ ॥

अप्रसिद्धचवर्गात्परस्य स्त्रीलिङ्गकर्तृसंबन्धिनो यकारस्य अकारो भवति ॥ वाच । प्राप्तास्ताः ॥ खछ * । आरूढास्ताः ॥ दज । दग्धास्ताः ॥

॥ सकाराच्च ॥ १३ ॥

सकारात्परस्य प्रत्यययकारस्य अकारो भवति ॥ आस । आसन् ताः ॥ बस । निवसितास्ताः ॥ लोस । श्रान्तास्ताः ॥ पक्षे । लोछ ॥

[* खछ इति छकारस्थाने खच इति चकारेणोच्चार्यते ।]

॥ सामान्यभूते ओन् ओख् ओथ् ओव ओम् ओव् प्रत्ययाः पुंसि ॥ १४ ॥

भावकर्मणां धातूनां सामान्यभूते ओन् आदिप्रत्ययाः पुंलिङ्गैकत्वे कर्मणि बोध्याः ॥ कर्योन् । तेनाकारि ॥ कर्योख् । तैरकारि ॥ कर्योथ् । त्वयाकारि ॥ कर्योव । युष्माभिरकारि ॥ कर्योम् । मयाकारि ॥ कर्योव् । अस्माभिरकारि ॥ कर करणे सामान्यभूते आन् आदिप्रत्ययाः । यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) इति यकारागमः ॥

॥ बहुत्वे एकारः ॥ १५ ॥

पुंलिङ्गस्य बहुत्वे कर्मणि सति प्रत्ययादिस्वरस्य एकारो भवति ॥ कर्येन् । तेनाकृषत ॥ कर्येख् । तैरकृषत ॥ कर्येथ् । त्वयाकृषत ॥ कर्येव । युष्माभिरकृषत ॥ कर्येम् । मयाकृषत ॥ कर्येय् । अस्माभिरकृषत ॥ साधनं पूर्ववत् । अनेन प्रत्ययौकारस्य एकारः ॥

॥ स्त्रियामेयादेशः सर्वत्र ॥ १६ ॥

सर्वत्र सामान्यपूर्णभूते एकत्वबहुत्वयोः कर्मणि च प्रत्ययादिस्वरस्य एय आदेशो भवति स्त्रीलिङ्गे एव ॥ कर्येयन् । तेन साकारि ॥ कर्येयन् । तेन ता अकृषत ॥ कर्येयख् । तैः साकारि ॥ कर्येयख् । तैस्ता अकृषत ॥ कर करणे । ओन् ओख् प्रत्ययौ । अनेन ओकारस्य एयादेशः । यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) इति यागमः ॥

॥ अप्रसिद्धचवर्गादायः ॥ १७ ॥

स्त्रीलिङ्गस्य सर्वत्र सामान्यपूर्णभूते एकत्वबहुत्वयोः कर्मणि च अप्रसिद्ध-

चवर्गात्परस्य प्रत्ययादिस्वरस्य आय आदेशो भवति ॥ ह्यच्चायन् । सा प्रत्यग्राहि तेन ॥ दिच्चायन् । सा तेनादायि ॥ हिद्योस्तकारागमः (सू० ३२) हेरकारागमः (८।२।११ सूत्रेण) तवर्गस्याप्रसिद्ध (सू० ७२) इति चत्वम् । अनेन आयादेशः । मच्चीयस् । अस्य नित्यं संबन्धप्रत्ययत्वात् तस्यैवादिस्वरस्य आयादेशः ॥ तत्रालुप्तयकारेभ्यः कर्तृधातुभ्य (४९ सूत्रस्थेभ्यः) आयादेशो विकल्पेन विज्ञातव्यः ॥ ओच्चाय । वा । ओच्चेय । शुद्धीबभूव सा ॥ तेज्जाय । वा । तेज्जेय । तीक्ष्णीबभूव सा ॥ बावज्जाय । वा । बावज्जेय [। रुरुचे सा] । इत्यादि ॥ खोच्चाय । बिभाय सा ॥ पच्चाय । प्रतीयाय ॥ रोच्चाय । रुरुचे सा ॥ वुछ्छाय । उत्तस्थौ सा ॥ वछ्छाय । अवरुरोह सा ॥ खछ्छाय । आरुरोह सा ॥ दज्जाय । देहे सा ॥ रोज्जाय । तस्थौ सा ॥ बुज्जायन् । बभ्रज्ज ताम् ॥ खोच्च भये । पच्च ऋणादिं विश्वासे । रोच्च रोचने । वुथ उत्थाने । वस अवरोहणे । खस आरोहे । दज्ज भस्मीभवने । रोज्ज स्थितौ । बुज्ज भर्जने । ओवावादयः सामान्यपूर्णयोः (सू० ७८) इत्युक्त्या स्त्रियाम् एय प्रत्ययः । तस्य एकारस्य अनेन आयादेशः । खस वसोस्थः सर्वत्र (सू० ६६) इति सकारस्य थकारः । तवर्गस्याप्रसिद्ध (सू० ७२) इति थकारस्य छकारः । बुज्ज भर्जने इत्यस्य उन् प्रत्ययः । शेषं पूर्ववत् ॥

॥ एयश्च पुंसि ॥ १८ ॥

अप्रसिद्धचवर्गात्परस्य एय् प्रत्ययस्य पुंलिङ्गविषये आय आदेशो भवति । यकारो ऽस्वरः ॥ लाछ्छाय् । जिजीवुः ॥ खछ्छाय् । आरुरुहुः ॥ लस सम्यग्जीवने । खस आरोहे । पुंकर्तरि (सू० ३९) इति एय् प्रत्ययः । लसश्च (सू० २९,३३,६७,७२) इति । खसवसोस्थ (६६) इति सकारस्य थकारे कृते अनेन एय प्रत्ययस्य आय् आदेशः । एयः किम् । लाछ्छाय् । जिजीवुः ॥ सामन्यपूर्णयोः आय् (सू० ४०) । शेषमुक्तवत् ॥

॥ इदुदूद्युतानां पूर्ववर्णस्वराप्रसिद्धता ॥ १९ ॥

इकारतन्मात्रायुतानामुकारतन्मात्रायुतानामूकारतन्मात्रायुतानां च वर्णानां तत्पूर्ववर्णसंबन्धिनः स्वरस्य अप्रसिद्धता अवधार्या सा चावर्णस्यैव ॥ वा॑ति । प्राप्ताः ॥ ता॑रिन् । तारिताः ॥ पंकु । गतः ॥ वा॑चू । प्राप्ता ॥ मा॑रुन् । हता ॥ वात प्रापणे । अर्कीमणां भूते कर्तरि एय् (१९ सूत्रेण) । वातस्तात् (सू० ८६) इत्यनेन छिह् आदेशः छकारहकारयोर्लोपः । तार तारणे उन् प्रत्ययः । कर्मणि पुंबहुत्वे इदाद्यस्वरस्य (सू० ४) इत्युकारस्य इकारः । पक गतौ । थकपकोरौवादीनां पुंवर्तमानादेशाश्छहोर्लोपश्च भूते (सू० ७७) इत्यनेन छुह् आदेशः छकारहकारयोर्लोपः । वात प्रापणे ओव् प्रत्ययः । वातस्तात् (सू० ८६) इति छुह् आदेशछहोर्लोपौ । पुंकर्तृप्रत्ययोकारस्य स्त्रियां च (सू० १०) इत्युकारस्य ऊमात्रादेशः । तवर्गस्याप्रसिद्ध (सू० ७२) इति चत्वम् । अनेन पूर्ववर्णस्वरस्याप्रसिद्धता । मार मारणे उन् प्रत्ययः । एकत्वे ऊमात्रादेशः (सू० ७) । अनेनोपधाया अप्रसिद्धता ॥

॥ उद्युतस्योपधाया आत ओत्वम् ॥ २० ॥

उकारयुतस्य वर्णस्य य उपधाभूत आकारस्तस्य ओत्वं भवति ॥ तो॑रुन् । तारितः ॥ वो॑तु । प्राप्तः ॥ तार तारणे उन् । व्यञ्जनं परेण संधेयम् (सू० १।३) रुकारस्य उपधाया आकारस्य ओकारः । वात प्रापणे । अर्कीमणामिति (३९ सूत्रेण) ओव् । वातस्तात् (सू० ८६) इति छुह् आदेशः छहोर्लोपश्च । तकारस्य उकारान्तत्वे सिद्धे अनेन उपधाकारस्य ओकारः ॥ ओसु । आसीत् ॥ आस सत्तायाम् उक्तवत् छुह् आदेशः । अनेन उपधाकारस्य ओकारः । उद्युतस्य किम् । ता॑रिन् । तारितास्ते ॥ पूर्वं साधितम् ॥

॥ पुंस्येकारस्य यूदीतौ कर्मैकत्वानेकत्वे ॥ २१ ॥

पुंलिङ्गस्य एकत्वबहुत्वे कर्मणि सति उपधाभूतस्य एकारस्य क्रमेण यूदीतौ

भवतः भूतविषये । एकत्वे यूकारः बहुत्वे ईकारः ॥ ल्यूखन् । लिखितम् । लीखिन् । लिखिताः ॥ पूर्वं साधितम् । च्यूटुन् । कुट्टितः ॥ च्रीटिन् । कुट्टिताः ॥ च्रेट कुट्टने उन् । कर्मणि पुंबहुत्वे (सू० ४) इत्यादिना उकारस्येकारः । अनेन क्रमादुपधाया यूकार ईकारौ ॥

॥ फेरब्यहमेलां च ॥ २२ ॥

एते धातवः कर्तर्येव नित्यं भवन्ति । एषां धातूनामुपधाया यूकार-ईकारौ भवतः । भूतविषये ॥ फ्यूरु । परिवर्तितः ॥ फीरि । परिवर्तिताः ॥ ब्यूठु । आसितः ॥ बीठि । आसिताः ॥ म्यूलु । संगतः ॥ मीलि । संगताः ॥ फेर भ्रमणविस्त्रीभवन-पश्चात्तापवैलोम्येषु । ब्यह उपवेशने । मेल संगमे । पुंकर्तरि (सू० ३९) इति ओव् एय् प्रत्ययौ । खरतरफरफेरमरमोरां रात् (सू० ९१) इति । ब्यहो हात् (सू० ९७) इति । गलच्रलडलडोलफलफ्वलमेलां लात् (सू० ९३) इति सूत्रैः छुह् छिह् आदेशौ छहोर्लोपश्च । ब्यहः डेषब्यहरोषमषां ठ (सू० ६२) इति हस्य ठः । अनेन सर्वत्र क्रमात् यूदीतौ । प्रोक्तानां धातूनां किम् । मेठ्यौव् । मधुरीबभूव ॥ पेड्यौव् । प्रसृतीबभूव ॥ ब्रेठ्यौव् । मूर्खीबभूव ॥ मेठ मधुरीभवने । पेड निर्यासे । ब्रेठ मूर्खीभवने । पुंकर्तरि (सू० ३९) इति औव् । यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) इति यकारागमः ॥

॥ स्त्रियामीदेतौ सर्वत्र ॥ २३ ॥

सर्वत्र एकत्वबहुत्वे कर्मणि कर्तरि च स्त्रीलिङ्गविषये उपधायाः क्रमात् ईकार-एकारौ भवतः । एकत्वे ईकारः बहुत्वे एकारः भूतविषये ॥ च्रीटून् । कुट्टिता ॥ च्रेच्यन् । कुट्टिताः ॥ च्रेट कुट्टने उन् । एकत्वे ऊमात्रादेशः (सू० ८) । अपरत्र । स्त्रियां यत् (सू० ५) इति उकारस्य यकारः । स्त्रियां भूतानेकत्वक-र्मणि च (७० सूत्रेण) इति टकारस्य चकारः । अनेन क्रमादीदेतौ ॥ फीरू । भ्रान्ता सा ॥ फेर्य । भ्रान्ताः ॥ बीठू । निविष्टा ॥ बेछ्य । निविष्टाः ॥

मीलू । मिलिता ॥ मेज्य । मिलिताः ॥ फेर भ्रमणे । व्यह उपवेशने । मेल संगगे । पुंकर्तरि (सू० ३९) इति ओव् एय् । पूर्ववत् छह् छिह् आदेशः छहोर्लोपः । पुंकर्तृप्रत्ययोकारस्य स्त्रियां च (सू० १०) इति एकत्र ऊमात्रादेशः । अपरत्र इकारस्य यत् (सू० ११) इति यः । व्यहः डेषव्यहरोषमषां ठ (सू० ६२) इति हस्य ठः । सादेशकर्तृभूतानेकत्वे च (सू० ७०) इति ठकारस्य छकारः । लान्तस्य ज (७४) इति लकारस्य जकारः । अनेन सर्वत्र क्रमादीकार-एकारौ ॥

॥ ओकारस्योकारः सादेशपुंकर्तरि च ॥ २४ ॥

सर्वस्मिन्नेकत्वबहुत्वे पुंकर्मणि प्रत्ययादेशयुते सर्वस्मिन्पुंकर्तरि च उपधाभूतस्य ओकारस्य ऊकारो भवति भूतविषये ॥ बूज़ून् । श्रुतः ॥ बूज़िन् । श्रुताः ॥ बूलुन् । भाषितम् ॥ बूलिन् । भाषिताः ॥ बोज़ निशामने । बोल पक्षिशब्दे च । उन् बहुत्वे उकारस्य इत् (४ सूत्रेण) अनेनोपधाया ऊत्वम् ॥ कर्तरि यथा । रूठु । रुष्टः ॥ रूठि । रुष्टाः ॥ रोष रुष्टौ । पुंकर्तरि (सू० ३९) इति ओव् एय् । द्वषपोषमषरोषां षात् (सू० ९५) इति छह् छिह् आदेशौ छहोर्लोपश्च । डेषव्यहरोषमषां ठ (सू० ६२) इति षस्य ठत्वम् । अनेन उपधाया ऊकारः । सादेशकर्तरि किम । पोठ्यौव् । पुष्टं तेन ॥ पोयौव् । पर्याप्तम् ॥ पोठ स्थूलीभवने । पोर पर्याप्त्यनार्द्रत्वयोः पुंकर्तरि (सू० ३९) इति औव् । यागमः (सू० ४६) ॥

॥ स्त्रियामूदोतौ ॥ २५ ॥

सर्वस्मिन्नेकत्वबहुत्वे कर्मणि प्रत्ययादेशयुते एकत्वबहुत्वे स्त्रीकर्तरि च उपधाभूतस्य ओकारस्य ऊकार-ओकारौ भवतः भूतविषये ॥ बूज़ून् । श्रुता तेन ॥ बोज़न् । श्रुतास्तेन ॥ कर्तरि यथा । रूठु । रुष्टा सा ॥ रोछ्य । रुष्टास्ताः ॥ एवमन्येषां बोध्यम् ॥

॥ मरश्च पुंसि ॥ २६ ॥

मर मरणे इत्यस्य धातोः सर्वस्मिन्कर्तरि पुंलिङ्गविषये उपधाया ऊत्वं भवति भूतविषये ॥ मूदु । मृतः ॥ मूदि । मृता; ॥ मर मरणे । पुकर्तरि (सू० ३९) इति ओव् एय् । खरतर (सू० ९१) इत्यादिना छुह् छिह् आदेशछहोर्लोपौ । मरश्च मरणे (सू० ६५) इति रस्य दत्वम् । अनेन उपधाया ऊत्वम् ॥

॥ लसश्च ॥ २७ ॥

लस सम्यग्जीवने इत्यस्य पुंलिङ्गे उपधाया ऊकारो भवति । तत्रैकत्वे ख्यातो बहुत्वे अप्रसिद्ध इति ज्ञेयम् ॥ लूस्तु । जीवितः ॥ लूंस्ति । जीविताः ॥ लूस्तुख् । जीवितस्त्वम् ॥ लूंस्तिव । जीविता यूयम् ॥ लूस्तुस् । जीवितो ऽहम् ॥ लूंस्ति । जीविता वयम् ॥ लस सम्यग्जीवने । पुंकर्तरि (सू० ३९) इति ओव् एय् ओख् एव ओस् एय् प्रत्ययाः । आसखसफस (सू० ९६) इत्यादिना छुह् छिह् छुख् छिव छुस् छिह् क्रमादादेशाः छहोर्लोपश्च । लसश्च पुंभूते (सू० ३३) इति तकारागमः । अनेन उपधाया ऊत्वम् ॥

॥ स्त्रियामेकत्वानेकत्वे ऊदातावप्रसिद्धौ ॥ २८ ॥

लस सम्यग्जीवने इत्यस्य स्त्रीलिङ्गस्य एकवचनबहुवचनयोः क्रमात् उपधाया अप्रसिद्धौ ऊकार-आकारौ भवतः ॥ [अत्रापि पूर्ववद्बहुत्वे एवाप्रसिद्धतास्तीत्यवधेयम् ॥] लूछू । जीविता ॥ लांछ । जीविताः ॥ लूछूख् । जीविता त्वम् ॥ लांछव । जीविता यूयम् ॥ लूछूस् । जीविताहम् ॥ लांछ । वयं जीविताः ॥ लसधातोः ओव् आदयः प्रत्ययाः (३९ सूत्रेण) तेषां छुह् आदय आदेशाः छहोर्लोपश्च (९६ सूत्रेण) । पुंकर्तृप्रत्ययोकारस्य स्त्रियां च (सू० १०) इति उकारस्य ऊमात्रादेशः । इकारस्य यत् (सू० ११) इति यः । लसश्च स्त्रियाम् (सू० ६७) इति सकारस्य थकारः । तवर्गस्याप्रसिद्ध (सू० ७२) इति थकारस्य

छकारः । अप्रसिद्धचवर्गादकार (सू० १२) इति सूत्रेण प्रत्यययकारस्याकारः । अनेन उपधायाः क्रमात् अप्रसिद्धौ ऊकार-आकारौ ॥

॥ सामान्यपूर्णयोरन्तिमः सर्वत्र ॥ २९ ॥

सर्वत्र पुंलिङ्गे स्त्रीलिङ्गे च एकत्वे बहुत्वे च सामान्यभूतपूर्णभूतयोर्विषये अन्तिमः अप्रसिद्धाकारादेश एव उपधाया भवति ॥ पुंलिङ्गे यथा । लाछ्वोव् । अजीवीत् ॥ लाछ्वाय् । अजीविषुः ॥ लाछ्वाव् । जिजीव ॥ लाछ्वाय् । जिजीवुः ॥ स्त्रीलिङ्गे यथा । लाछ्वाय । जिजीव सा ॥ लाछ्वाय । जिजीवुः ॥ साधनं पूर्ववत् ॥

॥ मरो वकारः ॥ ३० ॥

मर मरणे इत्यस्य सर्वत्र पुंलिङ्गे स्त्रीलिङ्गे च एकत्वबहुत्वयोश्च सामान्यभूतपूर्णभूतयोर्विषये उपधाया वकारो भवति ॥ म्वयोव् । अमृत ॥ म्वयाव् । मम्रे ॥ म्वयेय् । अमृषन्त ॥ म्वयाय् । मम्रिरे ॥ स्त्रीलिङ्गे यथा । म्वयेय । अमृत सा ॥ म्वयाय । सा मम्रे ॥ मर मरणे । पुंकर्तरि (सू० ३९) इति ओव् आव् एय् आय् । यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) इति यकारागमः । अनेनोपधाया वत्वम् । मरश्चापुंभूते (सू० ५९) इति रकारलोपः ॥

॥ स्त्रियां भूते ऽपि ॥ ३१ ॥

मर मरणे इत्यस्य स्त्रीलिङ्गविषये भूते ऽपि उपधाया वकारो भवति ॥ म्वय । मृता ॥ मरधातोः ओव् । तस्य छ्यह् आदेशः छहोर्लोपश्च । अनेनोपधाया वत्वम् । मरश्चापुंभूते (सू० ५९) इति रकारलोपः । स्त्रियां किम् । मृद्ध । मृतः ॥ पूर्वं साधितम् ॥

॥ हिद्योस्तकारागमः ॥ ३२ ॥

हि ग्रहणक्रीणनधारणेषु । दि दाने । इत्यनयोर्भूतादिषु सर्वत्र तकारागमो भवति ॥ ह्यतुन् । प्रतिगृहीत: ॥ दितुन् । दत्त: ॥ ह्यत्रोन् । प्रत्यग्रहीत् ॥ दित्रोन् । अदात् ॥ ह्यत्रान् । प्रतिजग्राह ॥ दित्रान् । ददौ ॥ भूते उन् (३ सूत्रेण) । सामान्यभूते ओन् (१४ सूत्रेण)। भूत विशेषे आन् (३५ सूत्रेण)। अनेन तकारागम: । हेरकारागम: (८।२।११ सूत्रेण) । तवर्गस्याप्रसिद्ध (सू० ७२) इति तकारस्य चत्वम् ।

॥ लसश्च पुंभूते ॥ ३३ ॥

लस सम्यग्जीवने इत्यस्य पुंलिङ्गविषये भूते तकारागमो भवति ॥ लूस्तु । जीवित: ॥ लूस्ति । जीविता: ॥ साधितचरम् । पुंलिङ्गे किम् । लूछू । जीविता सा ॥ भूते किम् । लाछाव् । जिजीव ॥ पूर्वं साधितानि ॥

॥ नेरूदीतौ प्रत्ययोकारेकारयोः ॥ ३४ ॥

नि हरणे । अस्माद्धातो: प्रत्ययसंबन्धिनोरुकार-इकारयो: क्रमात् ऊकार-ईकारौ भवत: ॥ न्यून् । हृत: ॥ नीन् । हृता: ॥ नि धातोः उन् । कर्मणि पुम् (सू०४) इत्यादिना अपरत्रोकारस्य इकार: । अनेन ऊकार-ईकारौ क्रमात् । पूर्वत्र यत्वम् । अपरत्र स्वरः सवर्णे दीर्घपरलोपौ (सू० १।५) ॥

॥ पूर्णभूते आन् आख् आथ् आव आम् आव् प्रत्ययाः पुमेकत्वे ॥ ३५ ॥

भावकर्मिणां धातूनां पूर्णभूते पुंलिङ्गस्य एकत्वे कर्मणि सति आन् आदयः प्रत्यया: स्यु: ॥ बोजान् । तेन शुश्रुवे ॥ बोजाख् । तै: शुश्रुवे ॥ बोजाथ् ।

शुश्रुवे त्वया ॥ बोज्ञाव । युष्माभिः शुश्रुवे ॥ बोज्ञाम् । मया शुश्रुवे ॥ बोज्ञाव् । अस्माभिः शुश्रुवे ॥ बोज निशामने । पूर्णभूते आन् आदयः प्रत्ययाः । यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) इति यकारागमः । तस्य अप्रसिद्धचवर्गाल्लोप (सू० ४७) इति लोपः ॥

॥ धातोरे बहुत्वे ॥ ३६ ॥

पूर्णभूते बहुत्वे कर्मणि सति धातोः पर एकारः प्रयोज्यः ॥ करेयेन् । तेन चक्रिरे ॥ करेयेख् । तैश्चक्रिरे ॥ करेयेथ् । त्वया चक्रिरे ॥ करेयेव । युष्माभिश्चक्रिरे ॥ करेयेम् । मया चक्रिरे ॥ करेयेय् । अस्माभिश्चक्रिरे ॥ कर करणे । पूर्णभूते आन् आदयः । बहुत्वे एकार (सू० १५) इत्याकारस्य एकारः । यकारागमः (४६ सूत्रेण) । अनेन धातोः पर एकारः ॥

॥ अप्रसिद्धचवर्गादा ॥ ३७ ॥

अप्रसिद्धचवर्गान्ताद्धातोरप्रसिद्ध आ प्रयोज्यः ॥ बोज्ञायेन । तेन शुश्रुविरे ॥ शक्नायेन् । प्रतिजगृहिरे ॥ साधितचरम् ॥

॥ सामान्यवत्स्त्रीकर्मणि ॥ ३८ ॥

पूर्णभूते स्त्रीलिङ्गस्य एकत्वादिके कर्मणि सति सामान्यभूतवत्स्वरूपाणि भवन्ति । एकत्वबहुत्वयोरेकरूपाणीत्यवधार्यम् ॥ उदाहरणानि सामान्यभूते विशदीकृतानि ॥

॥ पुंकर्तरि ओव् एय् ओख् एव ओस् एय् भूते प्रत्ययाः ॥ ३९ ॥

अतीतकाले कर्तरि नियतानां धातूनां पुंलिङ्गे कर्तरि सति भूते ओव्

आदयः प्रत्ययाः स्युः । ओव् प्रत्ययस्य क्वचित् औव् इति च व्यवह्रियत इति ज्ञेयम् ॥ वुफ्योव् । वा । वुफ्यौव् । उड्डीनः ॥ वुफ्येय् । उड्डीनाः ॥ ईर्योख् । उड्डान्तस्त्वम् ॥ ईर्येव । यूयमुड्डान्ताः ॥ ग्वव्योस् । गुर्वीभूतो ऽहम् ॥ प्रार्येय् । समीक्षिता वयम् ॥ वुफ विहायसा गतौ । ईर ऊर्ध्वभ्रमणे । ग्वव गौरवे । प्रार समीक्षणे । अनेन ओव् आदिप्रत्ययाः । यागमः (४६ सूत्रेण) ॥

॥ सामान्यपूर्णयोः आव् आय् आख् आव आस् आय् प्रत्ययाः ॥ ४० ॥

अतीतकाले कर्तृनियतानां धातूनां पुंलिङ्गे कर्तरि सति सामान्यपूर्णभूतयोर्विषये आव् आदयः प्रत्यया अवधार्याः ॥ सामान्ये यथा । वुफ्याव् । उड्डिव्ये ॥ वुफ्येय् । उड्डिव्यिरे । इत्यादीनि स्वरूपाणि । साधनं पूर्ववत् ॥ पूर्णभूते यथा । म्वकलियाव् । मुमुचे सः ॥ म्वकलियेय् । मुमुचिरे ते ॥ म्वकलियाख् । मुमुचिषे ॥ म्वकलियाव । मुमुचिध्वे ॥ म्वकलियास् । मुमुचे ऽहम् ॥ म्वकलियाय् । मुमुचिमहे ॥ म्वकल मुक्तौ । सामान्यपूर्णयोः आव् आदयः प्रत्ययाः । यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) इति यागमः । व्यञ्जनान्तानां पूर्णे यात्पूर्व इजनादेशप्रत्ययानाम् (सू० ५०) इति इच् आगमः । चकारः स्वरार्थः ॥

॥ संबन्धिप्रत्ययेषु वयोर्लोपः ॥ ४१ ॥

सर्वत्र पुंलिङ्गकर्तृभूतसामान्यपूर्णभूतयोर्विषये संबन्धिप्रत्ययेषु परेषु प्रत्ययसंबन्धिनोर्वकारयकारयोर्लोपो भवति । स च सस्वरस्य न विज्ञेयः किंतु व्यञ्जनयोर्वयोरेव ॥ कुमल्योस् । कोमल्यभूत्तस्य ॥ कुमल्येस् । कोमल्यभूवंस्तस्य ॥ कुमल कोमलीभवने । पुंकर्तरि (सू० ३९) इति ओव्-एय् प्रत्ययौ । तच्छब्द (सू० ८ । १ । ३३) इत्यादिना अस् प्रत्ययः । यागमः । अनेन वयोर्लोपः ॥ आस् । तमागतः ॥ आस् । तमागताः ॥ आहस् । तमागतस्त्वम् ॥ आसस् । तमागतो ऽहम् ॥ आस् । तमागता वयम् ॥ व्यञ्जनान्तयोः किम् । कुमल्येवस् । कोमल्यभूत तस्य ॥ आवस् । तमागता यूयम् ॥

॥ तयोः पूर्वाकार ओदप्रसिद्धत्वे ॥ ४२ ॥

तयोर्वकारयकारयोः पूर्वो य आकारः स क्रमेण ओकारमप्रसिद्धतां चाप्नोति वकारात्पूर्व ओकारं यकारात्पूर्वः अप्रसिद्धतामिति [॥ अयं विधिस्त्वच्छब्द-संबन्धविहिताय् प्रत्ययसद्भाव एव बोध्यः] ॥ ओय्। आगतस्ते ॥ आय्॥ आगतास्ते ॥ द्रोय् निर्गतस्ते ॥ द्राय्। निर्गतास्ते ॥ च्रोय्। प्रविष्टस्ते ॥ च्राय्। प्रविष्टास्ते ॥

॥ ओदतौ वत्त्वाप्रसिद्धत्वे ॥ ४३ ॥

तयोर्वकारयकारयोः पूर्वौ ओकार–अकारौ क्रमेण वकारमप्रसिद्धतां च प्राप्नुतः ॥ ग्वय्। गतस्ते ॥ गय्। गतास्ते ॥ प्व्वय्। पतितस्ते ॥ प्वय्। पतितास्ते ॥

॥ स्त्रियाम् एय एय एयख् एव एयस् एय प्रत्ययाः ॥ ४४ ॥

स्त्रीलिङ्गे कर्तरि सति भूतादिषु प्रोक्ताः प्रत्यया विज्ञेयाः । तत्र सामान्यपूर्णयोरेकरूपत्वमिति च ध्येयम् ॥ भूते यथा । व्यठ्येय । स्थूलाभूत्सा ॥ लार्येयख् । त्वं स्पृष्टा ॥ नव्येव । नव्या अभूत ॥ बड्येयस् । अवर्धि ॥ बाँबर्येय । चञ्चलीभूता वयम् ॥ व्यठ स्थूलीभवने । लार स्पर्शानुगमनपेशलीकरणेषु । नव अतिशयीभवने नूत्नतायां च । बड गतिवृद्ध्योः । बाँबर त्वरायाम् । अनेन एयादयः प्रत्ययाः । यागमः (सू० ४६) । लारः स्पर्शानुगमनयोरेव कर्तृप्रत्ययत्वम् पेशलीकरणे तु कर्मप्रत्ययत्वमित्यनुसंधेयम् ॥ सामान्यपूर्णभूतयोर्यथा । व्यठियेय । स्थूलीबभूव ॥ लारियेयख् । पस्पर्शिथ ॥ नवियेव । नूत्ना बभूव यूयम् ॥ बडियेयस् । वव्रृधे ऽहम् ॥ बाँबरियेय । चञ्चलीबभूविम ॥ पूर्ववत् धातुप्रत्ययाः । यागमः (सू० ४६) । व्यञ्जनान्तानां पूर्णे यात्पूर्व इजनादेशप्रत्ययानाम् (सू० ५०) इति इच् आगमः । चकारः स्वरार्थः ॥

॥ त्यंबो नित्यम् ॥ ४५ ॥

त्यंब इक्चाञ्चल्ये इत्यस्य नित्यं स्त्रीलिङ्गप्रत्यया भवन्ति ॥ त्यंब्येयस् । चञ्चल्यभूत्तस्य ॥ त्यंबियेयस् । चञ्चलीबभूव तस्य ॥ साधनं सुगमम् ॥

॥ यागमः सर्वेषु सामान्यपूर्णेषु च ॥ ४६ ॥

सर्वेषु कर्तृकर्मधातूनां सामान्यभूतेषु पूर्णभूतेषु च यकारागमो भवति च-शब्दात्प्रोक्तानादेशकर्तृधातूनां भूते ऽपि भवति ॥ व्रतल्योव् । उदमज्जत् ॥ व्रतल्याव् । उदमज्जत् ॥ व्रतलियाव् । उन्ममज्ज ॥ तत्योव् । अतप्यत ॥ तत्याव् । अतप्यत ॥ ततियाव् । तेपे ॥ दर्योव् । अध्रोवत् ॥ दर्याव् । अध्रुवीत् ॥ दरियाव् । दुध्रोव ॥ नम्योव् । अनमत् ॥ नम्याव् । अनामीत् ॥ नमियाव् । ननाम ॥ व्रतल ऊर्ध्वीभवने । तत तप्तीभवने । दर स्थैर्याविस्मृतिवर्षनिरोधेषु । नम नम्रीभवने । पुंकर्तरि (सू० ३९) इति औव् । सामान्यपूर्णयोः आव् (सू० ४०) । अनेन सर्वत्र यकारागमः । व्यञ्जनान्तानां पूर्णे यात्पूर्व इजनादेशप्रत्ययानाम् (सू० ५०) इति इच् ॥ सादेशकर्तृधातुसामान्यपूर्णयोर्यथा ॥ च्रज्योव् । पलायांचकार ॥ च्रज्याव् । पलायामास ॥ तर्योव् । अतारीत् ॥ तर्याव् । ततार ॥ म्वयोव् । अमृत ॥ म्वयाव् । मम्रे ॥ च्रल चलने । तर तरणे । मर मरणे । ओव् आव् प्रत्ययौ । अनेन यागमः । लान्तस्य ज (सू० ७४) इत्यादिना लकारस्य जकारः । मरो वकार (सू० ३०) इति मर उपधाया वत्वम् । मरश्चापुंभूते (सू० ५९) इति रकारलोपः ॥ कर्मधातुसामान्यपूर्णयोर्यथा । कर्योन् । अकार्षीत् ॥ कर्यान् । चकार ॥ वव्योन् । अवाप्सीत् ॥ वव्यान् । उवाप ॥ कर करणे । वव वापने । ओन्-आन् प्रत्ययौ । अनेन यकारागमः ॥ सादेशकर्तृधातुकर्मधातुसामान्यपूर्णयोः किम् । च्रलु । पलायितः ॥ च्रलि । पला-यिताः ॥ कर्रुन् । कृतम् ॥ करिन् । कृताः ॥

॥ अप्रसिद्धचवर्गाल्लोपः ॥ ४७ ॥

अप्रसिद्धचवर्गात्परस्य यकारस्य लोपो भवति ॥ कचान् । सूत्रयामास ॥ अचान् । प्रतिजग्राह ॥ दिचान् । ददौ ॥ मछान् । मर्दयामास ॥ इछान् । इयेष ॥ गिन्जान् । चिक्रीड ॥ ग्रजान् । गर्जयामास ॥ वजान् । रुरोद ॥ षञ्जान् । उवाच ॥ कत सूत्रवेष्टने । हि प्रतिग्रहणक्रीणनधारणेषु । दि दाने । मथ मर्दने । इछ इच्छायाम् । गिन्द क्रीडायाम् । ग्रज गर्जने । वद रोदने । वन भाषणे । पूर्णभूते (३५ सूत्रेण) आन् । तवर्गस्याप्रसिद्ध (सू० ७२-७३) इति तथदनानां च छ ज झ आदेशाः । हेरकारागमः (८।२।११ सूत्रेण) । यागमः (४६ सूत्रेण) । अनेन लोपः ॥ वाचू । प्राप्ता ॥ वाच । प्राप्ताः ॥ पूर्वं साधितम् । अनेन इकारस्य यत् (सू० ११) इत्यादेशप्राप्तस्य यकारस्य लोपः । अप्रसिद्धा-त्किम् । चच्यान् । चिच्छेद ॥ चट छेदने । पूर्णभूते (३५ सू०) आन् । यागमः । सामान्यपूर्णयोष्टवर्गस्य चवर्ग (सू० ६९) इति टकारस्य चत्वम् ॥

॥ पिगछोर्भूते ॥ ४८ ॥

पि पतने । गछ गतौ इत्यनयोर्भूतविषये यकारस्य लोपो भवति ॥ प्यौव् । पतितः ॥ गौव् । गतः ॥ धातोः पुंकर्तरि (सू० ३९) औव् प्रत्ययः । पेर-कारागमः (८।२।११) । गतौ गछो ऽन्त्यस्यैव (सू० ५८) इति छलोपः । यागमः । अनेन लोपः । उभयत्र ओकारे औ (सू० १।९) इत्यकारस्य औ परलोपश्च । पूर्वस्य इकारो ऽसवर्णे यो ऽपरलोप (सू० १।१०) इति यत्वम् । प्यय । पतिता ॥ गय । गता ॥ धात्वोः एय प्रत्ययौ । यागमः । अनेन लोपः । पेरकारागमः । गछः छलोपः । पिगछोः स्त्रियामत्प्रत्ययस्वरस्य (सू० ६०) इति एकारस्य अकारः । तस्य स्वरादलोपः (सू० ८।१।३९) । यत्वम् ॥

[॥ सकाराच्च बहुलम् ॥ ४८ क ॥

सकारात्परस्य यकारस्य विभाषया लोपो भवति ॥ फसौव् । वा । फस्यौव् । बद्धीभूतः ॥ फस बद्धीभवने । पुंकर्तरि औव् प्रत्ययः । यागमः । अनेन विकल्पेन लोपः । एवं ठास, दस, बास, मुस, स्सानां ज्ञेयम् ॥ बाहुलकत्वात्क्वचिन्नित्यम् । असौन् । अहासीत् ॥ असान् । जहास ॥ इत्यादि ॥ आवसादीनां निषेधः ॥ आवस्यौव् । विशीर्णः ॥ आवस विशरणे औव् प्रत्ययः । यकारागमः । तस्य बहुलग्रहणाल्लोपाभावः ॥ आवसादयस्तु । आवस ड्वस चस त्रस रस र्स लिस विस व्वलस व्वस इत्यादयः ॥]

॥ न क्च् ग्र्च् च्व्च् छ्व्च् तेज् पज् रोच् व्यच् ब्रज् बावज् ल्यच् श्रोच्ाम् ॥ ४९ ॥

क्च आर्द्रीभवने । ग्र्च पात्रस्थजलादिचेष्टायाय् । च्व्च वृत्तिसंकोचे । छ्व्च निःसारीभवने । तेज तीक्ष्णीभवने । पज युक्तीभवने । रोच रोचने । व्यच संभवे । ब्रज दीप्तौ । बावज रोचने । ल्यच निर्बलीभवने । श्रोच शुद्धौ । एभ्यः परस्य यकारस्य लोपो न भवति ॥ क्च्यौव् । आर्द्रीबभूव ॥ ग्र्च्यौव् । अचेष्टत ॥ च्व्च्यौव् । समकोचीत ॥ छ्व्च्यौव् । निःसारीबभूव ॥ तेज्यौव् । तितेजे ॥ पज्यौव् [। युयुजे] ॥ रोच्यौव् । अरोचिष्ट ॥ व्यच्यौव् । अव्याचीत् ॥ ब्रज्यौव् । अभ्राजिष्ट ॥ बावज्यौव् । अरोचिष्ट ॥ ल्यच्यौव् । निर्बलीबभूव ॥ श्रोच्यौव् । शुद्धोभूत् ॥ धातुभ्यः । पुंकर्तरि (सू० ३९) औव् प्रत्ययः । यागमः (सू० ४६) । तस्य पूर्वोक्तसूत्रेण लोपे प्राप्ते अनेन निषेधः ॥ [अछ् त्रच् बुच्चां च ॥ अछ्यौव् । दुर्बलोभूत् ॥ त्रच्यौव् । अभैषीत् ॥ बुच्यौव् । दग्धोभूत् ॥]

व्यञ्जनान्तानां पूर्णे यात्पूर्व इजनादेशप्रत्ययानाम् ॥५०॥

अनादेशप्रत्ययानां येषां धातूनां भूते प्रत्ययानामादेशो न स्यात् तेषां

व्यञ्जनान्तानां पूर्णभूतविषये यकारागमात्प्राक् इच् आगमो भवति चकारः स्वरार्थः ॥ ज़ेठियाव् । दीर्घीबभूव ॥ तम्बलियाव् । चचाल ॥ वडियाव् । वट्टधे। पूर्वं साधितानि ॥ अनादेशेभ्यः किम् ॥ म्वयाव् । मम्ले ॥ मेज्याव् । युयुजे ॥ प्रिय्याव्। पिप्रिये ॥ मर मरणे। मेल संगमे। प्रिय प्रीणने । भूतपूर्णे (३५ सूत्रेण) आव् । यागमः (सू० ४६)। मरो वकार (सू० ३०) इति वत्वम् । मरश्चापुंभूते (सू० ५९) इति रकारलोपः । लान्तस्य ज (सू० ७४) इत्यादिना लकारस्य जकारः । व्यञ्जनान्तेभ्यः किम् । प्ययाव् । पपात ॥ पि पतने आव् । यागमः । सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इत्यकारागमः । पूर्णभूते किम् । ज़ेठ्यौव् । दीर्घीभूतः ॥ साधितचरम् ॥

॥ न गछो ऽप्रसिद्धचवर्गाच्च ॥ ५१ ॥

गछ गतौ इत्यस्मात्तथा अप्रसिद्धचवर्गाद्यात्पूर्वं इच् आगमो न भवति ॥ गयाव् । जगाम ॥ गछ गतौ । पूर्णभूते आव् । यागमः । गतौ गछो ऽन्त्यस्यैव (सू० ५८) इति छकारलोपः । खोज्ञाय । विभाय सा ॥ पज्ञाय । प्रतीयाय सा ॥ खछाय । आरुरोह सा ॥ रोज्ञाय । अवतस्थौ सा ॥

॥ अचप्रसोराकारः ॥ ५२ ॥

अच प्रवेशे । प्रसः कृतादेशस्य च यात्पूर्वं आकारागमो भवति ॥ च्चायाव् । विवेश ॥ प्यायाव् । सुषुवे ॥ अच प्रवेशे । प्रस प्रसवे । पूर्णभूते आव् । यागमः । अच आदेर्लोप (सू० ५७) इति अकारलोपः । प्रसः पिच्च (सू० ५५) इति पि आदेशः । अनेन यात्पूर्वं आकारागमः ॥

॥ येरात्प्रत्ययादिस्वरस्य च ॥ ५३ ॥

यि आगमने इत्यस्य आकारादेशो भवति प्रत्ययादिस्वरस्य च भूते एव आकारो भवति ॥ आव् । आगतः ॥ यि धातोः ओव् प्रत्ययः । अनेन द्वयोरेवा-

कारः। स्वरः सवर्णे दीर्घपरलोपौ (सू० १।१)। भूत एव किम्। आयोव्। आगमत्सः ॥ आयाव्। आजगाम ॥ धातोः ओव्-आव् प्रत्ययौ। यागमः। अनेन केवलधातोरेव आकारादेशः ॥

॥ जेरन्त्यस्वरस्य पूर्ववच्च ॥ ५४ ॥

ज़ि जनने इति धातोरिकारस्याकारो भवति पूर्ववत्प्रत्ययादिस्वरस्य भूत एव आकारो भवति ॥ ज़ाव्। जातः ॥ ज़ि धातोः ओव्। अनेन धातुप्रत्ययस्वरयोराकारौ। भूत एव किम्। ज़ायोव्। अजनिष्ट सः ॥ ज़ायाव्। जज्ञे सः ॥ अत्र केवलं धातुस्वरस्यैव न प्रत्ययादिस्वरस्य ॥

॥ प्रसः पिश्च ॥ ५५ ॥

प्रस प्रसवे इत्यस्य पि आदेशो भवति प्रत्ययादिस्वरस्य पूर्ववदाकारो भवति ॥ प्याव्। प्रसूतः ॥ प्रस धातोः ओव् प्रत्ययः। अनेन धातोः पि आदेशः प्रत्ययादिस्वरस्य चाकारः। यत्वम्। भूत एव किम्। प्यायोव्। प्रासूयत सः ॥ प्यायाव्। प्रसुषुवे सः ॥ प्यायेय। प्रासूयत सा ॥ अत्र केवलं पि आदेशः ॥

॥ नेरो द्रा च ॥ ५६ ॥

नेर निर्गमने इत्यस्य द्रा आदेशो भवति पूर्ववत्प्रत्ययादिस्वरस्य चाकारो भवति ॥ द्राव्। निर्गतः ॥ द्राय। निर्गता ॥ धातोः ओव्-एय प्रत्ययौ। अनेन धातोर्द्रा आदेशः प्रत्ययस्वरयोराकारः। भूत एव किम्। द्रायोव्। निरगमत् ॥ द्रायाव्। निर्जगाम ॥ द्रायेय्। निर्जग्मुः ॥ अत्र केवलं द्रा आदेशः ॥

॥ अच् आदेर्लोपश्च ॥ ५७ ॥

अच् प्रवेशे इत्यस्य धातोराद्यक्षरस्य लोपो भवति चशब्दात्पूर्ववत्प्रत्यया-

दिस्वरस्याकारो भवति ॥ ज्ञाव् । प्रविष्टः ॥ ज्ञाय । प्रविष्टा ॥ साधनं पूर्ववत् ॥ भूत एव किम् । ज्ञायोव् । अविक्षत् ॥ ज्ञायाव् । विवेश ॥ ज्ञायेय । सा विवेश ॥ अनेन केवलम ऽकारलोपः । अत्र प्रसोराकार (सू०५२) इति यात्पूर्व आकारागमः ॥

॥ गतौ गछो ऽन्त्यस्यैव ॥ ५८ ॥

गछ गतौ युक्तीभवने च । इत्यस्य धातोर्गतौ विषये अन्त्याक्षरस्यैव लोपो भवति न प्रत्ययादिस्वरस्याकारः । गौव् । गतः ॥ गय । गता ॥ साधितचरम् । गतौ किम् । गंछु । गंछि ॥

॥ मरश्चापुंभूते ॥ ५९ ॥

मर मरणे । इत्यस्य धातोः पुंलिङ्गभूतं वर्जयित्वा शेषे सर्वत्रातीते अन्त्याक्षरस्य लोपो भवति ॥ म्वयोव् । अमृत ॥ म्वयाव् । मम्रे सः ॥ म्वय । मृता ॥ म्वयेय । मम्रे सा ॥ साधितचरम् । अपुंभूते किम् । मूदु । मृतः ॥ मर धातोः ओव् प्रत्ययः । तस्य (९१ सूत्रेण) छुह् आदेशः छहोर्लोपश्च । मरश्च पुंसि (सू० २६) इत्युपधाया ऊत्वम् । मरश्च मरणे (सू० ६५) इति रकारस्य दत्वम् ॥

॥ पिगछोः स्त्रियामत्प्रत्ययस्वरस्य ॥ ६० ॥

पि पतने । गछ गतौ । इत्यनयोर्भूते प्रत्ययादिस्वरस्य अकारो भवति ॥ प्यय । पतिता ॥ प्यय । पतिताः ॥ प्ययख् । पतिता त्वम् ॥ प्ययव । पतिता यूयम् ॥ प्ययस् । पतिताहम् ॥ प्यय । पतिता वयम् ॥ गय । गता ॥ गय । गताः ॥ गयख् । गता त्वम् ॥ गयव । गता यूयम् ॥ गयस् । गताहम् ॥ गय । गता वयम् ॥ धातोः पराः एय् आदिप्रत्ययाः । यागमः । तस्य पिगछोर्भूत (सू० ४८) इति लोपः । अनेन प्रत्ययस्वरस्य अकारः । एव प्रत्ययस्य (६१ सूत्रेण) यः । पेरकारागमः (८।२।११ सूत्रेण) । यत्वम् ॥

॥ मध्यमानेकत्वे यत् ॥ ६१ ॥

यत् यकारो भवतीति स्पष्टम् । उदाहरणं पूर्वसूत्रे साधितमेव ॥ प्ययव । पतिता यूयम् स्त्री० ॥ गयव । गता यूयम् स्त्री० ॥

॥ डेषव्यहरोषमषां ठः सर्वत्र ॥ ६२ ॥

डेष प्रेक्षणे । व्यह उपवेशने । रोष रुष्टौ । मष विस्मृतौ । एषां धातूनां सर्वत्र पुंलिङ्गे स्त्रीलिङ्गे एकानेकत्वे च सर्वेषु भूतेषु चान्त्याक्षरस्य ठकारो भवति ॥ व्यूठुन् । दृष्टः ॥ डीठिन् । दृष्टाः ॥ डीठून् । दृष्टा ॥ डेछ्यन् । दृष्टास्ताः ॥ धातोः पर उन् प्रत्ययः । कर्मणि पुंबहुत्वे (सू० ४) इति उकारस्य इकारः । पुंस्येकारस्य यूदीताव् (सू० २१) इत्युपधायाः क्रमात् यू-ईकारौ । स्त्रीलिङ्गे तु । एकत्वे ऊमात्रादेशः (सू०८) । स्त्रियां यत् (सू०५) इति । बहुत्वे यकारः(सू०५) । स्त्रियामीदेतौ सर्वत्र (सू० २३) इत्युपधाया ईकार-एकारौ । अनेन सर्वत्र अन्त्यस्य ठकारः । स्त्रियां भूतानेकत्वकर्मणि च (७० सूत्रेण) इति ठस्य छः । एवं । डेछ्योन् । अद्राक्षीत् ॥ डेछ्यान् । ददृशे ॥ स्त्रीलिङ्गे यथा ॥ डेछ्येयन् । ददृशे सा ॥ व्यूठु । उपविष्टः ॥ रुठु । रुष्टः ॥ मठु । विस्मृतः ॥ धातूनां परः ओव् प्रत्ययः । तस्य छुह् आदेशः छहोर्लोपश्च । व्यहः फेरव्यहमेलां च (सू० २२) इत्यनेन यूकारः । रोष ओकारस्योकारः सादेशपुंकर्तरि च (सू० २४) इत्युपधाया ऊकारः । अनेन सर्वत्र ठकारः । मषः इदुदूद्युतानां पूर्ववर्णस्वराप्रसिद्धता (सू० १९) । एवं वेछ्याव् । समास्त सः ॥ रोछ्याव् । रुरोष सः । मछ्याव् । विसस्त्रे सः ॥ साधनं पूर्ववत् ॥

॥ कूचङ्कचोस्तः ॥ ६३ ॥

कूच आर्द्रीभवने । हूच विस्त्रीभवने । इत्यनयोरन्त्याक्षरस्य तकारो भवति

सर्वत्र ॥ क्रु । अतिम्यत् ॥ क्ति । अतिम्यन् ॥ कृ॒ष्योव् । अतिमीत् ॥ कृ॒ष्याव् ॥ तितेम ॥ ह॑तु ॥ अकुथ्यत् ॥ ह॑ति । अकुथ्यन् ॥ ह॒ष्ठोव् । अकोथीत् ॥ ह॒ष्ठा॑य् । चुकुथुः ॥ धात्वोः परौ औव्–एय् प्रत्ययौ । प्रथमयोः छुह् छिह् आदेशौ छहोर्लोपश्च । अनेन ष्कारस्य तकारादेशः । स च तवर्गस्याप्रसिद्ध (सू० ७२) इति निर्देशादप्रसिद्धो ज्ञेयः । अपरयोश्चस्य तकारे कृते तवर्गस्याप्रसिद्ध (सू० ७२) इत्यनेन तकारस्य चकारः । एयश्च पुंसि (सू० १८) इत्यनेन एकारस्य आय आदेशः ॥

॥ दज़रोज़व्वपज़ां दः ॥ ६४ ॥

दज़ भस्मीभवने । रोज़ स्थितौ । व्वपज़ उत्पत्तौ । इत्येषां धातूनामन्त्यस्य दकारो भवति ॥ द॑दु । दग्धः ॥ द॑दि । दग्धाः ॥ रू॒दु । अवस्थितः ॥ रू॒दि । अवस्थिताः ॥ व्व॑पदु । उत्पन्नः ॥ व्व॑पदि । उत्पन्नाः ॥ धातुभ्यः ओव्-एय् प्रत्ययौ । तयोः छुह् छिह् आदेशौ ॥ रोज़ः ओकारस्योकारः सादेशपुंकर्तरि च (सू० २४) इत्युपधाया ओकारस्य ऊकारः । अनेनान्त्यस्य दत्वम् ॥

॥ मरश्च मरणे ऽस्त्रियाम् ॥ ६५ ॥

मर मरणसंधापनयोरित्यस्य मरणार्थे अन्त्याक्षरस्य दकारो भवति अस्त्रियाम् ॥ मू॒दु । मृतः ॥ मू॒दि । मृताः ॥ मरश्च पुंसि (सू० २६) इत्युपधाया ऊत्वम् । अनेन रकारस्य दकारः । अस्त्रियां किम् । म्वय । मृता ॥ धातोः ओव् प्रत्ययः । तस्य । मरः स्त्रियां स्त्रीप्रत्ययादेशा (सू० ९२) इति सूत्रेण छ्यह् आदेशः छहोर्लोपश्च । स्त्रियां भूते ऽपि (सू० ३१) इत्युपधाया वत्वम् । मरश्चापुंभूते (सू० ५९) इति रकारस्य लोपः । मरणार्थे किम् । म॑रुन । संधापितः ॥ म॑रून् । संधापिता ॥ सुगममेव ॥

॥ खसवसोस्थः सर्वत्र ॥ ६६ ॥

खस आरोहणे । वस अवतरणे । इत्यनयोः सर्वत्र पुंलिङ्गे स्त्रीलिङ्गे च अन्त्यस्य थकारो भवति ॥ खथु । आरूढः ॥ वथु । अवतीर्णः ॥ खछू । आरूढा ॥ वछू । अवतीर्णा ॥ साधनं पूर्ववत् । स्त्रियामन्त्यस्य थकारे कृते तवर्गस्याप्रसिद्ध (सू० ७२) इत्यादिना छकारः ॥

॥ लसश्च स्त्रियाम् ॥ ६७ ॥

लस सम्यग्जीवने इत्यस्य स्त्रीलिङ्गविषये अन्त्यस्य थकारो भवति ॥ लोसधातोरपि वेष्यते ॥ लछू । जीविता ॥ लछ । जीविताः ॥ धातोः ओव् एय् प्रत्ययौ तयोरादेशौ । पुंस्तृप्रत्ययोकारस्य स्त्रियां च (सू० १०) इत्युकारस्य ऊमात्रादेशः । इकारस्य यत् (५ सूत्रेण) । अनेन सकारस्य थकारः । तस्य तवर्गस्याप्रसिद्ध (सू० ७२) इति छः । अप्रसिद्ध (सू० १२) इत्यादिना प्रत्यययकारस्य अकारः । स्त्रियामेकत्वानेकत्वे ऊदालावप्रसिद्धाव् (सू० २८) इति धातूपधाया अप्रसिद्धौ ऊकार–आकारौ ॥ स्त्रियां किम् । लूस्तु । जीवितः ॥ प्रत्ययादेशे कृते । लसश्च पुंभूते (सू० ३३) इति तकारागमः । लसश्च (सू०२७) इत्युपधाया ऊत्वम् ॥

॥ अनादेशकर्तृधातुभूतादौ नो आदेशाः ॥६८॥

येषां धातूनां कर्तरि प्रत्ययस्यादेशो न भवति तेषां भूतसामान्यभूतपूर्णभूतेषु वक्ष्यमाणा आदेशाः नो भवन्ति ॥ क्रुथ्योव् । कृशोभवत् ॥ क्रुथ्याव् । कृशोभूत् ॥ क्रुटियाव् । कृशीबभूव ॥ जेठ्योव् । दीर्घीबभूव ॥ जेठ्याव् । दीर्घीबभूव ॥ जेठियाव् । दीर्घीबभूव ॥ बुड्यौव् । वृद्धीबभूव ॥ बुड्याव् । वृद्धीबभूव ॥ बुडियाव् । वृद्धीबभूव ॥ कान्योव् । काणीबभूव ॥ कान्याव् । काणीबभूव ॥ कानियाव् । काणीबभूव ॥ ठीक्यौव् । अतिष्ठत् ॥ ठीक्याव् । अस्थात् ॥ ठीकियाव् । तस्थौ ॥ स्वग्योव् ।

सुमूल्यीबभूव ॥ स्वग्याव् । सुमूल्यीबभूव ॥ स्वगियाव् । सुमूल्यीबभूव ॥ तत्योव् । अतप्यत ॥ तत्याव् । अतापि ॥ ततियाव् । तेपे ॥ तन्योव् । अकृष्यत ॥ तन्याव् । तन्वीबभूव ॥ तनियाव् । तन्वीबभूव ॥ क्रट कार्श्ये । जेठ आयतीभवने । बुढ स्थविरीभवने । कान काणीभवने । ठीक स्थितौ । स्वग मूल्याल्पतायाम् । तत तप्तीभवने । तन विरलीभवने ॥ ओव् आव् आव् प्रत्ययाः । यागमः । तृतीये । व्यञ्जनान्तानां पूर्णे यात्पूर्व इजनादेशप्रत्ययानाम् (सू० ५०) इति इच् । चकारः स्वरार्थः । एवं स्त्रीलिङ्गेष्वपि बोध्यम् ॥

॥ सामान्यपूर्णयोष्टवर्गस्य चवर्गः ॥ ६९ ॥

अनादेशव्यतिरिक्तानां शिष्टानां कर्तृभावकर्मधातूनां सर्वेषां सामान्यभूते पूर्णभूते च टवर्गस्य क्रमेण चवर्गादेशो भवति ॥ क्नेच्योन् । अकुट्टयत् ॥ क्नेच्यान् । कुट्टयामास ॥ डेछ्योन् । अदृश्यत ॥ डेछ्यान् । ददृशे ॥ गंज्योन् । अबान्त्सीत् ॥ गंज्यान् । बबन्ध ॥ रञ्जोन् । अपाक्षीत् ॥ रञ्जान् । पपाच ॥ क्नेट कुट्टने । डेष प्रेक्षणे । गंड ग्रन्थे । रन पाके । ओन्-आन् प्रत्ययौ । डेषव्यहरोषमषां ठः सर्वत्र (सू० ६२) इति षकारस्य ठकारः । यागमः (सू० ४६) । अनेन ट ठ डानां च छ जा आदेशाः [। रनस्तु । नान्तस्य ञ (सू० ७३) इत्यनेन नकारस्य ञत्वम् । अप्रसिद्धचवर्गाल्लोप (सू० ४७) इति यकारस्य लोपः] । कर्तृधातूनां यथा । फच्याव् । उच्छिद्यते स्म सः ॥ रोछ्याव् । रुरोष ॥ बुज्याव् । निममज्ज ॥ छ्यञ्जाव् । छिद्यते स्म ॥ फट काष्ठभेदाङ्कुरोद्भेदयोर्जलनिमज्जनादिषु । रोष रुष्टौ । बुड निमज्जने । छ्यन छेदे । आव् प्रत्ययः । रोषः डेषव्यहरोषमषां ठः सर्वत्र (सू० ६२) इति ठकारः । यागमः । अनेन ट ठ डानां च छ जा आदेशाः [। छ्यन इत्यस्य नकारस्य नान्त (सू० ७३) इति ञत्वम् । अप्रसिद्ध (सू० ४७) इत्यनेन यलोपः । शेषं पूर्ववत्] ॥ एवं भावधातूनामपि बोध्यम् ॥

॥ सादेशभूतकर्तृकर्मिणोरनेकत्वे च स्त्रियाम्॥७०॥

भूते प्रत्ययादेशयुतानां कर्तृधातूनां भूते कर्मिधातूनां स्त्रीलिङ्गे कर्तरि कर्मणि सति बहुत्वविषये टवर्गस्य चवर्गादेशो भवति सर्वत्र सामान्यभूते पूर्णभूते च ॥ स्त्रीकर्तरि यथा । फ़ंटू । मग्ना सा ॥ फच्य । मग्नास्ताः ॥ मंटू । विस्मृता सा ॥ मछ्य । विस्मृतास्ताः ॥ बुंडू । निमग्ना सा ॥ बुज्य । निमग्नास्ताः ॥ छ्यंञ् । छिन्ना सा ॥ छ्यञ्न । छिन्नास्ताः ॥ फट काष्ठभेदादिषु । मष विस्मृतौ । बुड निमज्जने । छ्यन्न छेदे । ओव्-एय् प्रत्ययौ तयोः छुह् छिह् आदेशौ छहोर्लोपश्च । पुंप्रत्ययोकार (सू० १०-११) इत्यादिना ऊमात्रादेशः इकारस्य च यः । मषः ठकारः । अनेन टादीनां बहुत्वे चाद्या आदेशाः [। नस्य (सू० ७३) ञः] । स्त्रीकर्मणि च यथा । च्रेच्यन् । कुट्टितास्ताः ॥ डेछ्यन् । दृष्टास्ताः ॥ गंज्यन् । बद्धास्ताः ॥ रञ्ञन् । पच्यन्ते स्म ताः ॥ च्रेच्येयन् । कुट्टयामास स ताम् ॥ डेछ्येयन् । ददृशे सा तेन ॥ गंज्येयन् । बबन्धे सा तेन ॥ रञ्ञेयन् । पेचे सा तेन ॥ अत्र सामान्यपूर्णभूतस्वरूपेषु पूर्वसूत्रेणादेशे सिद्धे ऽपि भूतस्वरूपार्थमेव योगारम्भः । धातोः उन् । स्त्रियां यत् (सू० ५) इति उकारस्य यकारः । डेषः ठः (सू० ६२) । अनेन क्रमात् टवर्गस्य चवर्गादेशः [। नस्य (७३ सूत्रेण) ञः] । बहुवचने किम् । च्रीटून् । कुट्टिता सा तेन ॥ डीठून् । दृष्टा सा तेन ॥ गंडून् । बद्धा सा तेन ॥ रंञ्जून् । पक्वा सा तेन ॥ साधितचरम् ॥

॥ कवर्गस्यैकत्वे ऽपि ॥ ७१ ॥

प्रत्ययादेशयुतानां स्त्रीलिङ्गे कर्तरि सति कर्मिधातूनां कर्मणि सति एकत्वबहुत्वयोः कवर्गस्य चवर्गादेशो भवति सर्वत्र सामान्यपूर्णयोरपि ॥ थंचू । श्रान्ता सा ॥ थच्य । श्रान्तास्ताः ॥ हंछू । श्रुष्का सा ॥ हछ्य । श्रुष्कास्ताः ॥ लंजू । लग्ना ॥ लज्य । लग्नाः ॥ थक श्रमे । हख शोषे । लग संगे पीडायां सामञ्जस्ये च । ओव्-एय् प्रत्यययोः छुह् छिह् आदेशौ । पुंप्रत्ययोकार (सू० १०।११) इत्यादिना ऊमात्रा-यकारौ । अनेन कादीनां चादयः ॥ कर्मिणां यथा । छंचून् ।

अवकीर्णा तेन ॥ छच्यन् । अवकीर्णास्तेन ॥ लीछून् । लिखिता तेन ॥ लेछ्यन् । लिखितास्तेन ॥ दंजून् । आहता तेन ॥ दज्यन् । आहतास्तेन ॥ छक कीर्णने । लेख लेखने । दग घातने । उन् प्रत्ययः । उकारस्य एकत्वे ऊमात्रादेशः (सू० ८)। बहुत्वे यकारः (सू० ५)। स्त्रियामीदेतौ सर्वत्र (सू० २३) इत्युपधाया ईकार-एकारौ। अनेन कखगानां चछजा आदेशाः ॥ सर्वेषाम् सामान्यपूर्णयोर्यथा । थच्योव् । थच्याव् । शश्राम ॥ हृछ्योव् । हृछ्याव् । चस्कन्द ॥ लज्योव् । लज्याव् । ललाग ॥ छच्योन् । छच्यान् । अवाकिरत् तं सः ॥ लेछ्योन् । लेछ्यान् । लिलेख तं सः ॥ दज्योन् । दज्यान् । आजघान तं सः ॥

॥ तवर्गस्याप्रसिद्धः सर्वत्र सामान्यादौ ॥ ७२ ॥

तवर्गान्तानां धातूनां सर्वत्र सामान्यभूते पूर्णभूते च सादेशस्त्रीकर्त्रेकत्वबहुत्वयोश्च स्त्रीकर्मैकत्वबहुत्वयोश्च अप्रसिद्धः चवर्गो भवति ॥ कंचून् । सूत्रिता सा तेन ॥ कचन् । सूत्रितास्तास्तेन ॥ कचांयन् । सूत्रयामास तां सः ॥ मंछून् । लिप्ता सा तेन ॥ मछन् । लिप्तास्तास्तेन ॥ मछांयन् । लिलेप तां सः ॥ लंजून् । प्रेषिता सा तेन ॥ लजन् । प्रेषितास्तास्तेन ॥ लजांयन् । प्रेषयामास तां सः ॥ कत सूत्रवेष्टने । मथ उपदेहे । लद वस्तुप्रेषणे गृहादिनिर्माणे च। उन्-ओन् प्रत्ययौ। उकारस्य एकत्वे ऊमात्रादेशः (सू० ८)। बहुत्वे यकारः (सू० ५) । अनेन तथदानां चछजा आदेशाः । अप्रसिद्धचवर्गादकार (सू० १२) इति यकारस्य अकारः । ओनः अप्रसिद्धचवर्गादांय (सू० १७) इति ओकारस्य आंय आदेशः ॥ सादेशस्त्रीकर्तरि यथा । वांचू । प्राप्ता ॥ वाच । प्राप्तास्ताः ॥ वृंछू । उत्थिता ॥ वृछ । उत्थितास्ताः ॥ दंजू । दग्धा ॥ दज । दग्धास्ताः ॥ वात प्रापणे । वृथ उत्थाने । दज भस्मीभवने । धातोः ओव्-एय् प्रत्ययौ तयोः छुह् छिह् आदेशौ । दजरोजवृपजां द (सू० ६४) इति जकारस्य दः । पुंप्रत्ययोकार (सू० १०-११) इत्यादिना क्रमात् ऊकारयकारौ। अनेन तथदानां चछजा आदेशाः । अप्रसिद्धचवर्गादकार (सू० १२) इति यकारस्य अकारः ॥

॥ नान्तस्य ञः ॥ ७३ ॥

नकारान्तस्य धातोः सर्वत्र सामान्यभूते पूर्णभूते च सादेशस्त्रीकर्त्रेकत्वबहुत्वयोश्च स्त्रीकर्मैकत्वबहुत्वयोश्च ञकारो भवति ॥ रञ्जोन् । अपाक्षीत् ॥ रञ्जान् । पपाच ॥ छ्यञ् । छिन्ना ॥ छ्यञ्ज । छिन्नास्ताः ॥ रंञ्जून् । पक्का सा ॥ रञ्जन् । पक्कास्ताः ॥ साधनं पूर्ववत् ॥

॥ लान्तस्य जः ॥ ७४ ॥

लकारान्तस्य धातोः सर्वत्र सामान्यभूते पूर्णभूते च सादेशस्त्रीकर्त्रेकत्वबहुत्वयोश्च स्त्रीकर्मैकत्वबहुत्वयोश्च जकारो भवति ॥ पांजून् । पालिता सा ॥ पाज्यन् । पालितास्ताः ॥ पाज्येयन् । पालयामास ॥ वांजून् । अवतारिता ॥ वाज्येयन् । अवतारयामास ताम् ॥ पाल रक्षणे । वाल अवतारणे । अनेन लकारस्य जकारः । शेषं साधनं पूर्ववत् ॥ सादेशस्त्रीकर्तरि यथा ॥ च्रंजू । पलायिता ॥ च्रज्य । पलायिताः ॥ फ्रंजू । फुल्ला ॥ फ्रज्य । फुल्लाः ॥ फंजू । जीर्णा सा ॥ फज्य । जीर्णास्ताः ॥ एवं सर्वेषाम् ॥

॥ पिहमुहसहग्हच्हां शः ॥ ७५ ॥

पिह संचूर्णने । मुह मोहने । सह सहने । ग्ह घर्षणे । च्ह चूषे । एषां सर्वत्र सामान्यभूतादावन्त्यस्य शकारो भवति ॥ पिशून् । पिष्टा सा ॥ पिश्यन् । पिष्टास्ताः ॥ पिश्येयन् । पिपेष ताम् ॥ मुशून् । मुषिता सा ॥ मुश्यन् । मुषितास्ताः ॥ मुश्येयन् । मुमोष ताम् ॥ संशून् । सोढा सा ॥ सश्यन् । सोढास्ताः ॥ सश्येयन् । सेहे ताम् ॥ ग्शून् । घृष्टा सा ॥ ग्श्यन् । घृष्टास्ताः ॥ ग्श्येयन् । जघर्ष ताम् ॥ च्शून् । चूषिता सा ॥ च्श्यन् । चूषितास्ताः ॥ च्श्येयन् । चुचूष ताम् ॥ साधनं पूर्ववत् । एषां धातूनां सादेशकर्तृप्रयोगाभावात्तदुदाहरणाभाव इति बोध्यम् ॥

॥ हहरस्तु मध्यान्त्यवर्णविनिमये वा ॥ ७६ ॥

[हहर विवाहकर्मणि इत्यस्य धातोर्मध्यमान्तिमवर्णयोर्हकाररेफयोर्विकल्पेन विनिमये कृते सति अन्त्यभूतस्य] हकारस्य शकारादेशो भवति ॥ हर्शून् । विवाहिता ॥ हहरून् । विवाहिता ॥

॥ थकपकोरोवादीनां पुंवर्तमानादेशाश्छहोर्लोपश्च भूते ॥ ७७ ॥

थक श्रमे । पक गतौ । अनयोः ओव् एय् ओख् एव ओम् एय् इति पुंकर्तृप्रत्ययानां भूतविषये क्रमेण पुंकर्तृसंबन्धिवर्तमानायाः छुह् छिह् छुख् छिव छुम् छिह् इत्येते आदेशा भवन्ति छकारहकारयोश्च लोपो भवति ॥ ततः स्त्रीकर्तरि सति पुंकर्तृप्रत्ययोकार (सू० १०) इत्यादिसूत्रैः स्त्रीसंबन्धिस्वरूपाणि साध्यानि ॥ थ॑कु । श्रान्तः ॥ थ॑कि । श्रान्ताः ॥ प॑कु । चलितः ॥ प॑कि । चलिताः ॥ प॑कुख् । चलितस्त्वम् ॥ प॑किव । चलिता यूयम् ॥ प॑कुम् । चलितो ऽहम् ॥ प॑कि । चलिता वयम् ॥ धात्वोः पुंकर्तरि (सू० ३९) इति ओव् एय् ओख् एव ओम् एय् प्रत्ययाः । तेषामनेन छुह् आदयो वर्तमाना [विभक्तिप्रत्यया] देशाः छकारहकारयोश्च लोपः । एषामेव स्त्रीलिङ्गक्रियास्वरूपसिद्ध्यै पुंकर्तृप्रत्ययोकारस्य स्त्रियां च (सू० १०) इति सूत्रेण उकारस्य ऊपात्रादेशः । इकारस्य यत् (सू० ११) इति इकारस्य यकारः । कवर्गस्यैकत्वे ऽपि (सू० ७१) इति ककारस्य चत्वम् । प॑चू इत्यादीनि संपद्यन्ते ॥ प॑चू । चलिता सा ॥ पच्य । चलितास्ताः ॥ प॑चूख् । चलिता त्वम् स्त्री० ॥ पच्यव । चलिता यूयम् स्त्री० ॥ प॑चूम् । चलिताहम् स्त्री० ॥ पच्य । चलिता वयम् स्त्रियः ॥ इति स्त्रीकर्तृस्वरूपाणि भवन्ति । एवमग्रे सर्वत्रावधार्यम् ॥

॥ ओवावादयः सामान्यपूर्णयोः ॥ ७८ ॥

येषां धातूनां भूतविषये वर्तमानप्रत्ययादेशो भवति तेषां सामान्यभूते ओव् आदयः पूर्णभूते आवादयः प्रत्ययाः अवगन्तव्याः ॥ पच्योव् । अचालीत् ॥ पच्याव् । चचाल ॥ पकगतौ । ओव् आव् प्रत्ययौ । यागमः । कवर्गस्यैकत्वे ऽपि (सू० ७१) इति ककारस्य चकारः । एवं सर्वेषां ज्ञेयम् ॥

॥ समखङ्खखोः खात् ॥ ७९ ॥

खान्तेषु धातुषु । समख समक्षीभवने । ङख शोषे इत्यनयोर्भूतविषये ओव् आदीनां प्रत्ययानां वर्तमानप्रत्ययादेशा भवन्ति छकारङकारयोश्च लोपः । ओव् आदयो निरादेशाः सामान्यभूते । आव् आदयश्च पूर्णभूते प्रत्यया विज्ञेयाः ॥ सम॑खु । समक्षीभूतः ॥ सम॑खि । समक्षीभूतास्ते ॥ ङ॑खु । शुष्कः ॥ ङ॑खि । शुष्कास्ते ॥ साधनं पूर्ववत् । स्त्रीलिङ्गे तु । सम॑छू । समक्षीभूता सा ॥ समछ्य । समक्षीभूतास्ताः ॥ ङ॑छू । शुष्का सा ॥ ङछ्य । शुष्कास्ताः । इत्यादयो ज्ञेयाः ॥ समछ्यौव् । समक्षीबभूव सः ॥ समछ्याव् । समक्षीबभूव सः । इति सामान्य-पूर्णभूतयोर्बोध्यम् ॥

॥ तगश्वंगलगां गात् ॥ ८० ॥

गकारान्तेषु धातुषु । तग तज्ज्ञतायाम् । श्वंग शयने । लग संगे पीडायां सामञ्जस्ये च । इत्येषां भूतविषये ओव् आदीनां प्रत्ययानां वर्तमानप्रत्ययादेशा भवन्ति छकारङकारयोश्च लोपः । ओवावादयश्च सामान्यपूर्णयोर्वेद्याः ॥ त॑गु [। सुज्ञातम्] ॥ त॑गि [। सुज्ञातानि] ॥ ल॑गु । लग्नः ॥ ल॑गि । लग्नाः ॥ श्व॑गु । सुप्तः ॥ श्व॑गि । सुप्ताः । साधनं पूर्ववत् ॥ स्त्रीलिङ्गे तु । त॑जू [। सुज्ञाता] ॥ तज्य [। सुज्ञाताः] ॥ ल॑जू । लग्ना ॥ लज्य । लग्नाः ॥ श्व॑जू । सुप्ता ॥ श्वज्य । सुप्ताः ॥ इत्यादयो वेद्याः ॥ तज्योव् [। सुज्ञातमभूत्] ॥ तज्याव् । [। सुज्ञातं बभूव] ॥

लज्योव् । अलागीत् ॥ लज्याव् । ललाग ॥ श्वंज्योव् । अस्वाप्सीत् सः ॥ श्वंज्याव् । सुष्वाप सः ॥ इत्यादयः सामान्यपूर्णयोर्विज्ञातव्याः ॥

॥ कूचखोचपचरोचव्यचद्रुचां चात् ॥ ८१ ॥

अप्रसिद्धचकारान्तानां मध्यात् । कूच आर्द्रीभवने । खोच भये । पच क्रणादिविश्वासे । रोच रोचने । व्यच संभवे । द्रुच विस्रीभवने । एषां धातूनां भूतविषये ओवादीनां प्रत्ययानां वर्तमानादेशाः स्युः छकारहकारयोश्च लोपः । ओवावादयश्च सामान्यपूर्णयोर्बोद्धव्याः ॥ कूतु । तिमितः सः ॥ कूति । तिमितास्ते ॥ खूचु । भीतः ॥ खूचि । भीताः ॥ पचु । विस्रब्धम् तेन ॥ पचि । विस्रब्धं तैः ॥ रूचु । रोचितः ॥ रूचि । रोचिताः ॥ व्यचु । व्यचितः ॥ व्यचि । व्यचिताः ॥ द्रुतु । कुथितः ॥ द्रुति । कुथिताः ॥ कूचद्रुचोस्त (सू० ६३) इति द्वयोस्तकारः । खोचरोचोः ओकारस्योकारः सादेशपुंकर्तरि च (सू० २४) इत्युपधाया ऊकारः । शेषं साधनं पूर्ववत् ॥ स्त्रीलिङ्गे तु । कूचू । तिमिता सा ॥ कूच । तिमितास्ताः ॥ खूचू । भीता सा ॥ खोच । भीतास्ताः ॥ रूचू । रोचिता सा ॥ रोच । रोचितास्ताः ॥ व्यचू । व्यचिता सा ॥ व्यच । व्यचितास्ताः ॥ द्रुचू । अकुथ्यत्सा ॥ द्रुच । अकुथ्यन् ताः ॥ बहुवचनेषु इकारस्य यत्वे कृते तस्य अप्रसिद्धचवर्गादकारः (सू० १२) । खोचरोचोः स्त्रियामूदोतावू (सू० २५) इत्युपधाया ऊकार-ओकारौ । द्रुचः पुंलिङ्गसंबन्धिनि तकारे कृते तस्य तवर्गस्याप्रसिद्धः सर्वत्र सामान्यादावू (सू० ७२) इति चत्वम् । कूचयोव् । तितेम सः ॥ खोचोव् । अभैत्सीत् सः ॥ रोचयोव् । रुरुचे ॥ व्यचयोव् । विव्याच ॥ द्रुचोव् । अकोथीत् ॥ इत्यादयः सामान्यभूतादौ निर्धार्याः । अत्र कूचरोचव्यचां न कूचग्रुच (४९) इत्यादिसूत्रेण यकारलोपनिषेधः । शेषं पूर्ववत् ॥

॥ गछो योग्यार्थे ॥ ८२ ॥

गछ गतौ युक्तीभवने चेत्यस्य योग्येच्छाया अर्थे भूते ओव् आदीनां प्रत्ययानां वर्तमानप्रत्ययादेशाः स्युः छकारहकारयोश्च लोपः ॥ गंछु । गंछि । गंछुख् । गंछिख । गंछुस् । गंछि । इति । अस्य सामान्यपूर्णयोः प्रयोगादर्शनात्केवलं भूतप्रयोगा एव साधवः ॥

॥ व्वपज़दज़रोज़ां ज़ात् ॥ ८३ ॥

व्वपज़ उत्पत्तौ । दज़ भस्मीभवने । रोज़ स्थितौ । इत्येषां ज़कारान्तेषु धातुषु भूतविषये ओव् आदीनां प्रत्ययानां वर्तमानादेशाः स्युः छहोर्लोपश्च । ओवावादयश्च सामान्यपूर्णयोर्बोध्याः ॥ व्वपंदु । उत्पन्नः ॥ व्वपंदि । उत्पन्नाः ॥ दंदु । दग्धः ॥ दंदि । दग्धाः ॥ रूदु । स्थितः ॥ रूदि । स्थिताः ॥ अत्र दज़रोज़व्वपज़ां द (सू० ६४) इति ज़कारस्य दकारः । शेषं पूर्ववत् । स्त्रीलिङ्गकर्तरि तु । दंज़ू । दग्धा ॥ दज़ । दग्धाः ॥ रूज़ू । अवस्थिता ॥ रोज़ । अवस्थिताः ॥ व्वपंज़ू । उत्पन्ना ॥ व्वपज़ । उत्पन्नाः ॥ अत्रापि पुलिङ्गस्वरूपेषु ज़कारस्य दकारे कृते तवर्गस्याप्रसिद्ध (७२) इत्यादिसूत्रेण दस्य ज़ः । रोज़ः स्त्रियामूदोताव् (सू० २५) इत्युपधाया एकत्र ऊकारः ॥ व्वपज़ोव् । उदपद्यत सः ॥ व्वपज़ाव् । उत्पेदे सः ॥ दज़ोव् । अदह्यत ॥ दज़ाव् । देहे ॥ रोज़ोव् । अस्थात् सः ॥ रोज़ाव् । तस्थौ सः ॥ इत्यादीनि सामान्यभूतयोः स्वरूपाणि वेदितव्यानि ॥

फटफुटरोटां टात् ॥ ८४ ॥

टकारान्तेषु धातुषु । फट काष्ठभेदाङ्कुरोद्भेदयोर्जलनिमज्जनादिषु च । फुट भङ्गे । रोट अवष्टम्भे । एषां धातूनां भूतविषये ओव् आदीनां प्रत्ययानां वर्तमानप्रत्ययादेशा भवन्ति पूर्ववच्छहोश्च लोपः । सामान्यपूर्णभूतयोः ओवा-

वादयो मन्तव्याः ॥ फ॑टु । उद्भिन्नः ॥ फ॑टि । उद्भिन्नाः ॥ फुटु । भग्नः ॥ फुटि । भग्नाः ॥ रुटु । स्तम्भितः ॥ रुटि । स्तम्भिताः ॥ साधनं सुगमम् ॥ स्त्रीकर्तरि तु । फ॑टू । उद्भिन्ना ॥ फच्य । उद्भिन्नाः ॥ फुटू । भग्ना ॥ फुच्य । भग्नाः ॥ रुटू । स्तम्भिता ॥ रोच्य । स्तम्भिताः ॥ अत्र सादेशकर्तृकर्मिणोरनेकत्वे च स्त्रियाम् (सू० ७०) इति सूत्रेण बहुषु टस्य चत्वम् । रोटः स्त्रियामूदोताव् (सू० २५) इति एकत्वे ऊकारः । शेषं पूर्ववद्विधेयम् । फच्योव् । उद्भिद्यते स्म सः ॥ फच्याव् । उद्भिद्यते स्म सः ॥ फुच्योव् । भज्यते स्म सः ॥ फुच्याव् । भज्यते स्म सः ॥ रोच्योव् वा रोट्योव् । अवाष्टम्भिष्ट ॥ रोच्याव् वा रोट्याव् [। अवतस्तम्भे] ॥ रोटो ऽत्र विकल्पेन वर्तमानादेशा बोध्याः । आदेशाभावे अनादेशकर्तृधातुभूतादौ नो आदेशा (६८) इति सूत्रेण चकारादेशनिषेधः । तत्र रोटियाव् इति पूर्णभूतस्वरूपं वेद्यम् ॥

॥ बुडो डात् ॥ ८५ ॥

डकारान्तेषु धातुषु । बुड निमज्जने इत्यस्य भूतविषये ओव् आदीनां छुह् आदिप्रत्ययादेशाः स्युः । लोपसामान्यपूर्णभूतप्रत्ययादयश्च पूर्ववज्ज्ञेयाः ॥ बुडु । निमग्नः ॥ बुडि । निमग्नाः ॥ साधनं सुगमम् । स्त्रीकर्तरि यथा । बुडू । निमग्ना ॥ बुज्य । निमग्नाः ॥ बहुत्वे सादेशभूतकर्तृकर्मिणोर् (सू० ७०) इत्यादिना डस्य जः ॥ बुज्योव् । न्यमज्जीत् ॥ बुज्याव् । निममज्ज ॥ इति सामान्यपूर्णस्वरूपे ॥

॥ वातस्तात् ॥ ८६ ॥

तकारान्तेषु । वात प्रापणे इत्यस्य भूतविषये वर्तमानप्रत्ययादेशाः स्युः छहोर्लोपश्च । सामान्यपूर्णप्रयोगाश्च पूर्ववत् ॥ वोतु । प्राप्तः ॥ वा॑ति । प्राप्ताः ॥ अत्र उद्युतस्योपधाया आत ओत्वम् (सू० २०) इत्युपधाकारस्य ओकारः । अपरत्र इदुदुद्युतानां पूर्ववर्णस्वरामिसिद्धता (सू० १९) इति । स्त्रीकर्तरि यथा ।

वांचू । प्राप्ता ॥ वाच । प्राप्ताः ॥ तवर्गस्याप्रसिद्ध (सू० ७२) इत्यादिना चत्वम् । बहुत्वे अप्रसिद्धचवर्गादकार (सू० १२) इति यकारस्याकारः ॥ वाचोव् । प्राप्सीत् ॥ वाचाव् । प्राप ॥ इति सामान्यपूर्णयोः प्रयोगौ ॥

॥ व्वथस्थात् ॥ ८७ ॥

थकारान्तेषु । व्वथ उत्थाने इत्यस्य भूतविषये वर्तमानादेशादयः स्युः ॥ व्वथु । उत्थितः ॥ व्वथि । उत्थिताः । सुगमम् ॥ स्त्रीकर्तरि यथा । व्वछू । उत्थिता ॥ व्वछ । उत्थितास्ताः ॥ अत्र तवर्गस्याप्रसिद्ध (सू० ७२) इति थस्य छत्वम् । यकारस्य अकारः ॥ व्वछोव् । उदस्थात् सः ॥ व्वछाव् । उत्तस्थौ सः ॥ इति सामान्यपूर्णयोर्भवतः ॥

॥ छ्यनसपनोर्नात् ॥ ८८ ॥

नकारान्तेषु । छ्यन छेदे । सपन संपन्ने । इत्यनयोर्भूतविषये वर्तमानप्रत्ययादेशाद्या भवन्ति । तत्र सपन सहचरयोः सपद संपन्ने । सपज संपन्ने । इत्यनयोश्चेत्थं वर्तमानादेशादयो बुद्धिमतोह्याः ॥ सपनु । संपन्नः ॥ सपनि । संपन्नाः ॥ स्त्रीलिङ्गे । सपन्ञ् । संपन्ना ॥ सपञ्ञ । संपन्नास्ताः ॥ साधनं पूर्ववत् ॥ सपञ्ञोव् । समपादि ॥ सपञ्ञाव् । संपेदे । इति च विज्ञेयम् ॥

॥ वुपश्रपोः पात् ॥ ८९ ॥

वुप अन्तर्दाहे । श्रप जीर्णने । इत्यनयोः पकारान्तेषु धातुषु भूतविषये वर्तमानप्रत्ययादेशाः स्युः छहोर्लोपश्च ॥ वुपु [। अन्तर्दग्धः] ॥ वुपि [। अन्तर्दग्धाः] ॥ श्रपु [। जीर्णः] ॥ श्रपि [। जीर्णाः] ॥ वुप्यौव् [। अन्तर्दग्धोभूत्] ॥ वुप्याव् [। अन्तर्दग्धो बभूव] ॥ साधनं सुगमम् ॥ विकल्पेन पूर्णभूते । वुपियाव् [। अन्तर्दग्धो बभूव] ॥ श्रपियाव् [। जीर्णो बभूव] ॥ इति स्वरूपे भवतः ॥

॥ प्रयलयवयां यात् ॥ ९० ॥

यकारान्तेषु धातुषु । प्रय प्रीणने । लय अर्घणे । वय पथ्यीभवने । इत्येषां धातूनां भूतविषये वर्तमानप्रत्ययादेशाः पूर्ववत्स्युः ॥ प्रयु [। प्रीणितः] ॥ प्रयि [। प्रीणिताः] ॥ लयु [। अर्घितम्] ॥ लयि [। अर्घितानि] ॥ वयु [। पथ्यीभूतम्] ॥ वयि [। पथ्यीभूतानि] ॥ साधनं पूर्ववत् । प्रय्योव् । प्रय्याव् । लय्योव् । लय्याव् । वय्योव् । वय्याव् । इति सामान्यपूर्णस्वरूपाणि भवन्ति ॥

॥ खरतरफरफेरमरसोरां रात् ॥ ९१ ॥

रकारान्तेषु धातुषु । खर अप्रीतौ । तर तरणे । फर स्तेये । फेर भ्रमणविस्त्रीभवनपश्चात्तापवैलोम्येषु । मर मरणसंधापनयोः । सोर अवसाने । इत्येषां भूतविषये पूर्ववत् वर्तमानादेशादयः स्युः । तत्र मरः संधापनार्थे कर्मप्रयोगाः कर्तृप्रयोगाश्च भवन्ति । मरणार्थे तु केवलं कर्तृप्रयोगा एवेति निर्णेयम् ॥ खरु । [। अप्रीणितः] ॥ खरि [। अप्रीणिताः] ॥ तरु । तीर्णः ॥ तरि । तीर्णाः ॥ फरु । चोरितं तेन ॥ फरि । चोरितं तैः ॥ फ्यूरु । परिवर्तितः ॥ फीरि । परिवर्तिताः ॥ मूरु । मृतः ॥ मूरि । मृताः ॥ सूरु । अवसितः ॥ सूरि । अवसिताः ॥ पूर्वं सर्वाणि साधितान्येव । मरः संधापनार्थे तु । मरु । संधापितः ॥ मरि । संधापिताः ॥ इत्यादयो भवन्ति । मरुन् । संधापितस्तेन सः ॥ मरिन् । संधापितास्ते तेन ॥ इत्यादीनि कर्मस्वरूपाणि स्युः । स्त्रीकर्तृस्वरूपाणि च पूर्ववत्साध्यानि ॥

॥ मरः स्त्रियां स्त्रीप्रत्ययादेशाः ॥ ९२ ॥

प्रोक्तानां धातूनां मध्यात् । मर मरणे इत्यस्य स्त्रीकर्तरि सति ओव् आदीनां प्रत्ययानां वर्तमानसंबन्धिस्त्रीप्रत्ययादेशाः स्युः । न तु पुंकर्तृप्रत्ययोकार (सू० १०) इत्यादिना सिद्धिः ॥ म्वय । मृता सा ॥ म्वय । मृताः ॥ म्वयस्व् ।

मृता त्वम् ॥ म्वयव । मृता यूयम् ॥ म्वयस् । मृता अहम् ॥ म्वय । मृता वयम् ॥ मर मरणे ओव् आदीनां क्रमात् छ्यह् छ्यह् छ्यख् छ्यव छ्यस् छ्यह् इति आदेशेषु कृतेषु छहोर्लोपः । स्त्रियां भूते ऽपि (सू० ३१) इति उपधाया वत्वम् । मरश्चापुंभूते (सू० ५९) इति रकारलोपः । संधापनार्थे तु । मंरू । संधापिता ॥ मर्य । संधापिताः । इत्यादयो भवन्ति ॥

॥ गलचलडलडोलफलफ्वलमेलां लात् ॥ ९३ ॥

लकारान्तेषु धातुषु । गल नाशे । चल चलने । डल उल्लङ्घने । डोल अपरिचयने । फल वस्त्रादिजीर्णने साफल्ये च । फ्वल विकसने । मेल संगमे । इत्येषां धातूनां वर्तमानप्रत्ययादेशाः स्युः भूतविषये ॥ गंलू । नष्टः ॥ गंलि । नष्टास्ते ॥ चंलू । पलायितः ॥ चंलि । पलायिताः ॥ डंलू । उल्लङ्घितः ॥ डंलि । उल्लङ्घिताः ॥ डूलू । अपरिचितः ॥ डूलि । अपरिचितं तैः ॥ फंलू । जीर्णः ॥ फंलि । जीर्णाः ॥ फ्वंलू । विकसितः ॥ फ्वंलि । विकसितास्ते ॥ म्यूलू । संगतः सः ॥ मीलि । संगतास्ते ॥ डोलः ओकारस्योकारः सादेशपुंकर्तरि च (सू० २४) इत्युपधाया ऊकारः । मेलः फेरव्यहमेलां च (सू० २२) इत्युपधाया एकत्वे यूकारः बहुत्वे ईकारः । शेषं सुकरम् । स्त्रीकर्तरि यथा । गंजू । नष्टा ॥ गज्य । नष्टाः ॥ चंजू । पलायिता सा ॥ चज्य । पलायितास्ताः ॥ डंजू । उल्लङ्घिता ॥ डज्य । उल्लङ्घिताः ॥ डूजू । अपरिचिता ॥ डोज्य । अपरिचितास्ताः ॥ फंजू । जीर्णा ॥ फज्य । जीर्णास्ताः ॥ फ्वंजू । विकसिता ॥ फ्वज्य । विकसितास्ताः ॥ मीजू । संगता ॥ मेज्य । संगतास्ताः ॥ अत्र डोलः स्त्रियामूदोतावू (सू० २५) इत्युपधाया ऊकार-ओकारौ । मेलः स्त्रियामीदेतौ सर्वत्र (सू० २३) इति एकत्वे ईकारः । एवं । चज्योव् । पलायामास ॥ चज्याव् । प्रदुद्राव ॥ इत्यादि स्वरूपाणि साध्यानि ॥

॥ ब्ववरावोर्वात् ॥ ९४ ॥

वकारान्तेषु धातुषु ब्वव उत्पत्तौ । राव नष्टीभवने । इत्यनयोर्भूतविषये प्रोक्तवत् वर्तमानादेशाः स्युः ॥ ब्वु । उद्भूतः ॥ ब्वि । उद्भूतास्ते ॥ रोवु । नष्टः सः ॥ रोवि । नष्टास्ते ॥ एकत्र उद्युतस्योपधाया आत ओत्वम् (सू० २०) इति । अन्यत्र इदुदूद्युतानां पूर्ववर्णस्वराप्रसिद्धता (सू० १९) इति ॥ स्त्रीकर्तरि यथा । रोवू । नष्टा सा ॥ राव्य । नष्टास्ताः ॥ ब्वू । उत्पन्ना ॥ ब्व्य । उत्पन्नास्ताः ॥ राव्योव् । व्यनशत् सः ॥ राव्याव् । ननाश ॥ इत्यादयश्च सामान्यादिषु विचार्याः ॥

॥ द्वषपोषमषरोषां षात् ॥ ९५ ॥

षकारान्तेषु धातुषु । द्वष च्यवने । पोष पर्याप्ततायाम् । मष विस्मृतौ । रोष रुष्टौ । इत्येषां भूतकालविषये वर्तमानादेशाः प्रोक्तवद्भवन्ति ॥ द्वेषु । श्चोतितः ॥ द्वेषि । श्चोतिताः ॥ पूषु । पर्याप्तः ॥ पूषि । पर्याप्ताः ॥ मेठु । विस्मृतः सः ॥ मेठि । विस्मृतास्ते ॥ रुठु । रुष्टः सः ॥ रुठि । रुष्टास्ते ॥ पोषरोषोः ओकारस्योकारः सादेशपुंकर्तरि च (सू० २४) इति उपधाया ऊकारः । मषरोषोः डेषव्यहरोषमषां ठः सर्वत्र (सू० ६२) इति ठकारः ॥ स्त्रीकर्तरि यथा । द्वेषू । श्चोतिता सा ॥ द्वेष्य । श्चोतितास्ताः ॥ पूषू । पर्याप्ता सा ॥ पोष्य । पर्याप्तास्ताः ॥ मेठू । विस्मृता सा ॥ मेठ्य । विस्मृतास्ताः ॥ रुठू । रुष्टा सा ॥ रोठ्य । रुष्टास्ताः ॥ पोषरोषोः स्त्रियामूदोतावू (सू० २५) इति । मषरोषोः ठकारे कृते । सादेशभूतकर्तृकर्मिणोरनेकत्वे च स्त्रियाम् (सू० ७०) इति ठस्य छः । द्वेष्योव् । द्वेष्याव् । चुश्चोत ॥ पोष्योव् । पोष्याव् । पर्याप ॥ मेठ्योव् । व्यस्मारि ॥ मेठ्याव् । विसस्म्रे ॥ रोठ्योव् । अरोषीत् ॥ रोठ्याव् । रुरोष ॥ इति सामान्यपूर्णयोः साध्यानि ॥

॥ आसखसफसबसलसलोसवसां सात् ॥ ९६ ॥

सकारान्तेषु धातुषु । आस सत्तायाम् । खस आरोहे । फस बद्धीभवने । बस निवासे । लस सम्यग्जीवने । लोस श्रमे । वस अवरोहणे । इत्येषां भूतकालविषये वर्तमानादेशाः प्रोक्तवत्स्युः ॥ ओसु । आसीत् सः ॥ आंसि । आसन् ते ॥ खंथु । आरूढः सः ॥ खंथि । आरूढास्ते ॥ फंसु । बद्धीबभूव सः ॥ फंसि । बद्धीबभूवुस्ते ॥ बंसु । निवसितः सः ॥ बंसि । निवसितास्ते ॥ लूस्तु । जीवितः सः ॥ लूंस्ति । जीवितास्ते ॥ लूसु । श्रान्तः सः ॥ लूसि । श्रान्तास्ते ॥ वंथु । अवरूढः सः ॥ वंथि । अवरूढास्ते ॥ प्रथमस्य उद्युतस्योपधाया आत ओत्वम् (सू० २०) इति । खसवसोस्थः सर्वत्र (सू० ६६) इत्यनयोः सकारस्य थकारः । लसः लसश्च पुंभूते (सू० ३३) इति तकारागमः । लसश्च (सू० २७) इत्युपधाया ऊत्वम् एकत्वे ख्यातः बहुत्वे अप्रसिद्धः । लोसः ओकारस्योकारः सादेशपुंकर्तरि च (सू० २४) इत्युपधाया ऊकारः । स च लसधातुवत्प्रसिद्धाप्रसिद्धो निर्णेयः ॥ स्त्रीकर्तरि यथा । आंसू । आसीत् सा ॥ आस । आसन् ताः ॥ खंछू । आरूढा सा ॥ खछ । आरूढास्ताः ॥ फंसू । बद्धीबभूव सा ॥ फस । बद्धीबभूवुस्ताः ॥ बंसू । निवसिता सा ॥ बस । निवसितास्ताः ॥ लूछू । जीविता सा ॥ लांछू । जीवितास्ताः ॥ लूसू वा लूछू । श्रान्ता सा ॥ लोस वा लोछू । श्रान्तास्ताः ॥ वंछू । अवतीर्णा सा ॥ वछ । अवतीर्णास्ताः ॥ आस एकत्व इदुदूद्युतानाम् (सू० १९) इति आकारस्य अप्रसिद्धता । बहुत्वे सकाराच्च (सू० १३) इति यकारस्याकारः । खसवसोस्थकारे कृते । तवर्गस्याप्रसिद्ध (सू० ७२) इति छकारः थकारस्य चाकारः । लसः स्त्रियामेकत्वानेकत्वे ऊदातावप्रसिद्धाव् (सू० २८) इति ऊकार आंकारौ । लोसः स्त्रियामूदोताव् (सू० २५) इति ऊकारओकारौ। विकल्पेन थकारछकारौ। शेषं पूर्ववत्। आस धातोः सामान्यपूर्णभूतप्रयोगाः साधुशाब्दवन्नोच्चार्यन्ते अतो नोदाहृताः ॥ खछोव् । खछाव् । आरुरोह ॥ फसोव् । फसाव् । बबन्धे ॥ बसोव् । बसाव् । उवास ॥ लांछोव् ।

लाछ्राव् । जिजीव ॥ लोसोव् । लोसाव् । शश्राम ॥ वछ्रोव् । वछ्राव् । अव-रुरोह ॥ इत्यादयः सामान्यपूर्णयोः प्रयोगा वेदितव्याः । लसधातोः । लसोव् । लसाव् । जिजीव । इति विकल्पेन स्वरूपाणि सेत्स्यन्ते परंतु [अ]साधुश-ब्दतया नादीयन्ते । फसवसलोसां यागमस्य प्रत्ययाद्यवयवत्वे सिद्धे । सकाराच्च (सू० १३) इति निर्देशतः [सकाराच्च बहुलम् (सू० ४८ क) इति सूत्रेण] तस्य लोपः । यद्वा खसवसोस्थ (सू० ६६) इति ज्ञापकात् सकारस्थकारपरिणतो भवति थकारस्य तवर्गस्याप्रसिद्ध (सू० ७२) इत्यनेन छकारपरिणामः सिद्ध एव अतः सकारात्परस्यापि यकारस्य अप्रसिद्धत्तवर्गाल्लोप (सू० ४७) इति लोप-विधिः ॥

॥ व्यहो हात् ॥ ९७ ॥

हकारान्तेषु धातुषु व्यह उपवेशने इत्यस्य भूतविषये वर्तमानादेशाः स्युः ॥ व्यूठ् । उपविष्टः ॥ बीठि । उपविष्टाः ॥ डेषव्यहरोषमषां ठः सर्वत्र (सू० ६२) इति ठकारः । फेरव्यहमेलां च (सू० २२) इति उपधाया एकत्वे यूकारः बहुत्वे ईकारः । स्त्रीकर्तरि । बीठू । उपविष्टा ॥ बेछ्य । उपविष्टाः ॥ अन्त्यस्य ठकारे कृते । सादेशभूतकर्तृकर्मिणोरनेकत्वे च स्त्रियाम् (सू० ७०) इति छकारः । स्त्रियामीदेताव् (सू० २३) इत्युपधाया ईकार-एकारौ । शेषं पूर्ववत् । बेछ्योव् । उपाविशत् ॥ बेछ्याव् । उपाविवेश ॥ इत्यादयः सामान्यपूर्णयोर्विवेच्याः ॥ क्रियातिपत्त्यपरपर्यायापूर्णभूतस्योभयोर्भविष्यदतीतयोरन्तर्गतत्वात्तन्निरूपणं द्वि-तीये भविष्यत्पादे यथासंभवं विरचितमिति चतुष्प्रकारो ऽतीतकालः ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते आख्यातप्रक्रियायां भूतपादस्तृतीयः ॥८।३ ॥

अथाख्यातप्रक्रियायाम् ॥ ८ ॥

हेतुपादः ॥ ४ ॥

॥ स्वाकर्तृत्वावसरे परक्रियाकर्तृत्वारोपो हेतुः॥१॥

निखिलस्य वस्तुजातस्य कर्तृत्वं भवत्येव अतो यस्य कस्यचिद्वस्तुन आत्मनः कर्तृत्वाकाले क्रियाकरणे प्रवर्तमानस्य तदितरस्य वस्तुनः कर्तृत्वे य आरोपः स हेतुरवधार्यः । यथा लोभः कुरुते पापमित्यत्र लोभस्य स्वकर्तृत्वं। लोभः कारयति पापमित्यत्र लोभव्यतिरिक्तस्य पापक्रियाप्रवर्तमानस्य जीवस्य कर्तृत्वे लोभस्य कर्तृत्वारोपः । अस्यामवस्थायां लोभः स्वयं करणक्रियां न विदधाति किंतु जीवस्य पापक्रियाया हेतुः संपन्नः क्रियायाश्च कर्तेत्यभिधीयत इति ॥

॥ हेतौ धातोराव् ॥ २ ॥

क्रियाया अर्थे हेतोः कर्तृतया अभिधेये सति धातोः पर आव् भवति स च धातुवद्भवति। यथा केवलो धातुर्विभक्तिसमुदायेषु परिणतो भवति तथा आव् प्रत्ययविशिष्टो ऽपि भवतीत्यर्थः ॥ करनावान् छुह् । कारयति ॥ परनावान् छुह् । पाठयति ॥ रननावान् छुह् । पाचयति ॥ साधनमुत्तरसूत्रे ॥

॥ आव्य ऽनागमः ॥ ३ ॥

धातोः आवि आव्हेतौ परे अन् आगमो भवति ॥ करनावान् छुह् । कारयति ॥ परनावान् छुह् । पाठयति ॥ रननावान् छुह् । पाचयति ॥ कर करणे । पर पठने । रन पाके । हेतौ धातोराव् (सू० २) इति आव् । अनेन अन् आगमः । करनाव् । परनाव् । रननाव् इति सिद्धे वर्तमानायां छुह् प्रत्ययः (८।१।११ सूत्रेण) । धातोरानागमः (सू० ८।१।१९) ॥

॥ वुफो नो लः सूचनायाम् ॥ ४ ॥

वुफ विहायसा गतावित्यस्य मनुष्यादिसूचनाया अर्थे अनागमसंबन्धिनो नकारस्य लकारो भवति ॥ वुफलावान् छुह् । सूचयति ॥ सूचनायां किम् । वुफनावान् छुह् । उड्डाययते ॥

॥ वुज़कांम्पप्रसां वा ॥ ५ ॥

वुज़ जागरणे । कांम्प कम्पने । प्रस प्रसवे । एषां धातूनां आवि परे विकल्पेन अन् आगमो भवति [१४-१५ सूत्राभ्याम् आव आदेर्ह्रस्वः] ॥ वुज़वान् छुस् । जागरयति तम् ॥ कांम्पवान् छुस् । कम्पयति तम् ॥ प्रसवान् छुस् । प्रसावयति ॥ पक्षे । वुज़नावान् छुस् । जागरयति ॥ कांम्पनावान् छुस् । कम्पयति ॥ प्रसनावान् छुस् । प्रसावयति ॥

॥ येरनादेशो ऽनि ॥ ६ ॥

यि आगमने इत्यस्य आवसंबन्धिनि अनि परे अन् आदेशो भवति ॥ अननावान् छुह् । आनाययति ॥

॥ सादेशानादेशभूतेभ्यस्त्र्यक्षरधातुभ्यो ऽनो लोपः ॥ ७ ॥

येषां कर्तृधातूनां भूतकालविषये प्रत्ययानामादेशः कृतो न भवति येषां च कृतो भवति ते त्र्यक्षराश्चेत्स्युस्तेभ्य आवि परे अन् आगमस्य लोपो भवति ॥ वृवरावान् छुह् । समापयति ॥ काञ्चरावान् छुह् । पिङ्गलीकरोति ॥ कुमलावान् छुह् । कोमलीकरोति ॥ चोँखरावान् छुह् । संकोचयति ॥ छाँछनावान् छुह् । लघ्वीकरोति ॥ मन्दछावान् छुह् । हेपयति ॥ वृज़लावान् छुह् । उज्ज्वलीकरोति ॥ वृवर समाप्तौ । काञ्चर पिङ्गलीभवने । कुमल कोमलीभवने । चोँखर संकोचने । छाँछन लघ्वीभवने । मन्दछ मन्दाक्षे । वृज़ल रक्तीभवने । हेतौ धातोराव् (सू० २) इत्याव् । आव्यनागमः (सू० ३) । अनेन लोपः । सादेशानां यथा । समखावान् छुह् । समक्षीकरोति ॥ वृपज़ावान् छुह् । उत्पादयति ॥ सादेशानादेशभूतेभ्यः किम् । कमवनावान् छुह् । अर्जयति ॥ कतरनावान् छुह् । कृन्तयति ॥ कपटनावान् छुह् । शकलीकरोति ॥ त्र्यक्षरेभ्यः किम् । बुडनावान् छुह् । स्थविरीकरोति ॥ खल्रावान् छुह् । विस्तारयति ॥ बज़्रावान् छुह् । भावयति ॥ थकनावान् छुह् । श्रामयति ॥

॥ वुष्णश्च ॥ ८ ॥

वुष्ण उष्णीभवने इत्यस्य आवि परे अनागमस्य लोपो भवति ॥ वुष्णावान् छुह् । उष्णीकरोति ॥

॥ पिद्योरिलोपश्च ॥ ९ ॥

पि पतने । दि दाने । इत्यनयोः आवि परे अनागमस्य लोपो भवति धातोरिकारस्य च लोपः ॥ पावान् छुस् । पातयति तम् ॥ दावान् छुह् । दापयति ॥

॥ इकारान्ताद्वा ॥ १० ॥

इकारान्ताद्धातोर्विकल्पेन अनागमस्य लोपो भवति ॥ न्यावान् छुह् । नाययति ॥ ख्यावान् छुह् । खादयति ॥ च्यावान् छुह् । पाययति ॥ ह्यावान् छुह् । हारयति ॥

॥ अनः पूर्वमाव् वा ॥ ११ ॥

इकारान्ताद्धातोः अनागमात्पूर्वं विकल्पेन आव् प्रयोज्यः [पक्षे अनागमलोपश्च] ॥ ख्यावनावान् छुह् वा ख्यावान् छुह् । खादयति ॥ च्यावनावान् छुह् वा च्यावान् छुह् । पाययति ॥

॥ निद्योरावादिलोपः ॥ १२ ॥

नि हरणे । दि दाने । इत्याभ्यां परस्य आव आदिलोपो भवति ॥ निवनावान् छुह् । हारयति ॥ दिवनावान् छुह् । दापयति ॥ [अन्लोप] पक्षे । न्यावान् छुह् । हारयति ॥ दावान् छुह् । दापयति ॥

॥ हेर्ह्रस्वः ॥ १३ ॥

हि प्रतिग्रहणादिषु । इत्यस्मादाव आदेर्ह्रस्वो भवति ॥ ह्यवनावान् छुह् । प्रतिग्राहयति ॥ [अन्लोप]पक्षे । ह्यावान् छुह् । प्रतिग्राहयति ॥

॥ वुज़्बुडलारपिलकाम्परन्ज़्भ्य आवो ह्रस्वः ॥ १४ ॥

वुज़ जागरणे । बुड निमज्जने [। लार स्पर्शानुगमनस्निग्धीकरणेषु] । पिल पर्याप्तौ । काम्प कम्पने । रन्ज प्रीतौ रागे च । एभ्यः परस्य [विकल्पेन]

अनो लोपे कृते आव् प्रत्ययस्य ह्रस्वो भवति ॥ वुज़वान् छुह् । जागरयति ॥ वुडवान् छुह् । निमज्जयति ॥ [लारवान् छुह् । स्पर्शयति ॥] पिलवान् छुह् । प्रापयति ॥ कांम्पवान् छुह् । कम्पयति ॥ रन्ज़वान् छुह् । रन्ज़यति ॥ [* अन आगमस्य लोपाभावपक्षे तु ।] वुज़नावान् छुह् । जागरयति ॥ वुडनावान् छुह् । निमज्जयति ॥ [लारनावान् छुह् । स्पर्शयति ॥] पिलनावान् छुह् । पर्यापयति ॥ कांम्पनावान् छुह् । कम्पयति ॥ रन्ज़नावान् छुह् । रन्ज़यति ॥

॥ प्रसः पीनादेशश्च वा ॥ १५ ॥

प्रस प्रसवे इत्यस्मात्परस्य आव् प्रत्ययस्य ह्रस्वो भवति विकल्पेन पीन आदेशः [अनो लोप] श्च स्यात् ॥ प्रसवान् छुह् । प्रसावयति ॥ पक्षे । पीनवान् छुह् । प्रसावयति ॥ प्रसनावान् छुह् इति तृतीयं स्वरूपमुक्तचरमेव [सू० ५] ॥

॥ फट उपधादीर्घश्च ॥ १६ ॥

फट काष्ठभेदादिषु इत्यस्मात्परस्य आव् प्रत्ययस्य ह्रस्वो भवति धातोरुपधायाश्च दीर्घः स्यात् ॥ फाटवान् छुह् । निमज्जयति ॥ [अनो लोपाभाव] पक्षे । फाटनावान् छुह् । उद्भेदयति ॥

॥ न कृचादिभ्यो ऽनो लोपादि ॥ १७ ॥

कृच्च धातुर्धातुपाठे सिद्ध एव पठितः कृच्च आर्द्रीभवने । ग्वह दीप्तौ । ग्रक चाञ्चल्यपाकातिशययोः । ज्ञोत दीप्तौ । दृक धावने । तेल विस्फोटादिदंशे । तोष तोषे । दोर गतिचातुर्ये । नांम्प दीप्तौ । नील हरितीभवने । पिस पाकेन

[* अस्मिन्स्थाने मूलपुस्तके एभ्यः परस्य किमिति पाठो ऽसंगतार्थो ऽभूत् ।]

बहिर्निःसरणे । पेड निर्यासे । पोर पर्याप्त्यनार्द्रत्वयोः । प्रार समीक्षणे । फव प्रशस्तीभवने । फर स्तेये । फल वस्त्रजीर्णने । फुह फुश अन्तःकोपे । फेर भ्रमणादिषु । फोर स्फुरणे । बाद प्रबलीभवने । बास भासने । बुड स्थविरीभवने । ब्रज़ दीप्तौ । याप व्याप्तौ । रम्ब शोभायाम् । रस सरसीभवने । रोच़ रोचने । रोट अवष्टम्भे । रूड रूढीभवने । रूण जीर्णने । ल्यड पराजयीभवने । लोर वैकल्ये इत्यादयः [कूत्रादयः] ॥ एषामनो लोपादि न भवति आदिशब्दात् ह्रस्वविकल्पादि च न भवति ॥ कूचनावान् छुह् । आर्द्रीकरोति ॥ ग्वहनावान् छुह् । दीपयति ॥ ग्रकनावान् छुह् । पाचयति ॥ ज़ोतनावान् छुह् । दीपयति ॥ ट्कनावान् छुह् । धावयति ॥ इत्यादि ॥ [अत्रानो लोपादिविधेरप्राप्तावपि वक्ष्यमाण (सू० २०) शिष्टेत्यादिसूत्रविध्याश्रयपरिशिष्टधातुपर्युदासज्ञापनार्थमयं योगारम्भः ॥]

॥ मरः संधापने ॥ १८ ॥

मर मरणसंधापनयोरित्यस्य संधापनार्थे अनो लोपादि न भवति ॥ मरनावान् छुह् । संधापयति ॥ संधापनार्थे किम् । मारान् छुह् । मारयति ॥ यद्यपि मार मारणे इत्यादयः केचिद्धातवो धातुपाठे सिद्धा एव पठिताः परंत्वत्र पाठकानां भ्रमनिरसनाय तेषां कारितक्रिया विशदीकृता ॥

॥ व्यठो वा ॥ १९ ॥

व्यठ तिक्तीभवने इत्यस्य विकल्पेन अनो लोपादि न भवति ॥ व्यठनावान् छुह् । तिक्तीकरोति ॥ पक्षे । व्यदरावान् छुह् । तिक्तीकरोति ॥

॥ शिष्टेभ्य आवि रागमो ऽनादेशेषु ॥ २० ॥

अनादेशभूतप्रत्ययेषु मध्याच्छिष्टेभ्यो धातुभ्य आव् प्रत्यये परे रकारागमो

भवति ॥ कल्रावान् छुह् । मूकीकरोति ॥ खल्रावान् छुह् वा खज्रावान् छुह् । विस्तारयति ॥ ग्वब्रावान् छुह् । गुर्वीकरोति ॥ चुक्रावान् छुह् । अम्लीकरोति ॥ चुक्रावान् छुह्[1] । कोपयति ॥ पूठ्रावान् छुह् । स्थूलीकरोति ॥ व्यठ्रावान् छुह् । स्थूलयति ॥ तीज्रावान् छुह् । उत्तेजयति ॥ ठीक्रावान् छुह् । स्थापयति ॥ इत्यादयः स्वयमेव साधनीयाः ॥

॥ चलछ्यन्नथकफसफुटफुल्लमषरावङ्खङ्कचश्रपेभ्यो वा ॥ २१ ॥

सादेशभूतप्रत्ययधातुषु प्रोक्तेभ्यो धातुभ्यः आव् प्रत्यये परे रकारागमो विकल्पेन स्यात् ॥ चल्रावान् छुह् । प्रद्रावयति ॥ चलनावान् छुह् । विद्रावयति ॥ छ्यञ्रावान् छुह् । छेदयति ॥ छ्यन्नावान् छुह् । छेदयति ॥ थक्रावान् छुह् वा थकनावान् छुह् । श्रमयति ॥ फस्रावान् छुह् वा फसनावान् छुह् । निबद्धयति ॥ फुट्रावान् छुह् वा फुटनावान् छुह् । भनक्ति ॥ एवमितरेषामपि ज्ञेयम् ॥

छपचेनमानां भूतकर्मधातुषु ॥ २२ ॥

भूतकाले ये धातवः कर्मप्रयोगिणो भवन्ति तेषु मध्यात् । छप दृष्टिकालयोः क्षेपे । चेन चेतने । मान स्वीकरणे । इत्येतेभ्य आव् प्रत्यये रकारागमो वा भवति ॥ छप्रावान् छुह् । क्षेपयति ॥ चीञ्रावान् छुह् । संज्ञापयति ॥ मांञ्रावान् छुह् । स्वीकारयति ॥ पक्षे । छपनावान् छुह् । चेननावान् छुह् । माननावान् छुह् ॥ प्रथमो वकारविशिष्टो ऽपि दृश्यते ॥ छ्वप्रावान् छुह् । इति ॥

[१ चुक धातुर्धातुपाठे वकारोपधः पठ्यते चुक्रावान् छुह् इत्येतत्प्रयोगनिष्पत्त्या अत्रोक्कारोपधो ज्ञेयः ॥]

॥ छकः स्वार्थे ॥ २३ ॥

छक कीर्णने इत्यस्य आव् प्रत्यये परे रकारागमो भवति स्वार्थे एव ॥ छकान् छुह् । अवकिरति ॥ छ॑क्रावान् छुह् । अवकिरति ॥ छ॑क्रान् छुह् । अवकिरति ॥ हेतौ तु । छकनावान् छुह् वा छ॑क्रनावान् छुह् । इति स्वरूपे स्तः ॥

॥ रादावो लोपो वा ॥ २४ ॥

रकारात्परस्य आव्प्रत्ययस्य विकल्पेन लोपो भवति ॥ चुक्रान् छुह् । कोपयति ॥ छ्र्यट्रान् छुह् । उच्छिष्टीकरोति ॥ छ्र्यव्रान् छुह् । शमयति ॥ छ्वट्रान् छुह् । संक्षेपयति ॥ पूट्रान् छुह् । स्थूलयति । इत्यादि ॥ पक्षे । चुक्रावान् छुह् । कोपयति ॥ छ्र्यट्रावान् छुह् । उच्छिष्टीकरोति ॥ छ्र्यव्रावान् छुह् । शमयति ॥ छ्वट्रावान् छुह् । शमयति ॥ पूट्रावान् छुह् । स्थूलयति ॥

॥ तवर्गस्याप्रसिद्धचवर्गो रे ॥ २५ ॥

तवर्गान्तस्य धातोः रे रप्रत्यये परे अप्रसिद्धचवर्गादेशो भवति ॥ छ॑च्रावान् छुह् । श्वेतयति ॥ त॑च्रावान् छुह् । तापयति ॥ स्व॑च्रावान् छुह् । शमयति ॥ श्व॑ज्रावान् छुह् । शोधयति ॥ थ॑ज्रावान् छुह् । उन्नतीकरोति ॥ ब॑ज्रावान् छुह् । भावयति ॥ त॑ज्रावान् छुह् । कर्शयति ॥ क्य॑ज्रावान् छुह् । क्लेदयति । इत्यादयो विज्ञेयाः ॥ छत श्वैत्ये । तत तप्तीभवने । स्वत शमने । श्वद शोधने । थद उन्नतीभवने । बन भवने । तन विरलीभवने । क्यन्न क्लेदने । हेतौ (२ सूत्रेण) आव् । शिष्टेभ्य आवि रागमो ऽनादेशेषु (सू० २०) इति रकारागमः । अनेन क्रमात्तवर्ग्याणामप्रसिद्धचवर्ग्यादेशः ॥

॥ ज़ेरन्त्यस्यौव् ॥ २६ ॥

ज़ि जनने इत्यस्य रकारे परे अन्त्यस्वरस्य ओव् आदेशो भवति ॥ ज़ोव्रान् छुह् । जनयति ॥ पक्षे ज़ोव्रावान् छुह् । जनयति ॥

॥ भूतोक्तस्त्र्येकत्ववदुपधादेशादयश्च ॥ २७ ॥

धातूनां रकारे परे उपधादेशादयः भूतोक्तस्त्रीलिङ्गैकत्ववत् भवन्ति। ये भूतकाले स्त्रीलिङ्गैकवचनसंबन्धिन उपधाया आदेशादयो भवन्ति ते हेतुसंबन्धिनि रकारे ऽपि भवन्तीत्यर्थः ॥ मांझ्रावान् छुह् । मानयति ॥ कांझ्रावान् छुह् । काणीकरोति ॥ ब्रीठ्रावान् छुह् । मूढीकरोति ॥ मीठ्रावान् छुह् । मधुरीकरोति ॥ पूठ्रावान् छुह् । स्थूलयति ॥ लूक्रावान् छुह् । क्षुद्रीकरोति ॥ मान स्वीकरणे । कान काणीभवने । ब्रेठ मूर्खीभवने । मेठ मधुरीभवने । पोठ स्थूलीभवने। लोक क्षुद्रीभवने । हेतौ धातोराव् (सू० २) इति आव् प्रत्ययः। छपक्षेनमानां भूतकर्मधातुषु (सू० २२) इति रकारागमः । शिष्टानां पञ्चानां शिष्टेभ्य आवि रागमो ऽनादेशेषु (सू० २०) इति रकारागमः । तवर्गस्याप्रसिद्धत्रवर्गो रे (सू० २५) इति नकारस्य झकारः । एकत्वे ऊमात्रादेशः (सू० ८।३।८) इति सूत्रवृत्तिसिद्धा उपधाया आकारस्याप्रसिद्धता । स्त्रियामीदेतौ सर्वत्र (सू० ८।३।२३) इति एकारस्य ईकारः । स्त्रियामूदोताव् (सू० ८।३।२५) इति ओकारस्य ऊकारः । मांझ्राव् इत्यादिसिद्धौ वर्तमानायां छुह् (सू० ८।१।११)। धातोरानागमः (सू० ८।१।१९) ॥

॥ तरमरडललगां हेतुप्रत्ययागमलोपोपधादीर्घौ ॥२८॥

तर तरणे । मर मरणसंधापनयोः । डल उल्लङ्घने । लग संगे पडियां संगतीभवने च । एषां धातूनां हेतोः कारितस्य संबन्धिनोः प्रत्ययागमयोर्लोप उपधायाश्च दीर्घो भवति ॥ मरः मरणार्थ एव । लगः संग एव ॥ तारान् छुह् । तारयति ॥ मारान् छुह् । मारयति ॥ डालान् छुह् । उल्लङ्घयति ॥ लागान् छुह् । संगमयति ॥ मरणार्थे किम् । मरनावान् छुह् । संधापयति ॥ संगे किम् । लगनावान् छुह् । साधनं पूर्ववत् ॥

॥ खसवसोरन्त्यस्य रश्च ॥ २९ ॥

खस आरोहे । वस अवरोहणे । अनयोर्हेतुप्रत्ययागमलोपौ भवतः अन्त्याक्षरस्य च रकारो भवति ॥ खारान् छुह् । आरोपयति ॥ वारान् छुह् । अवतारयति ॥

॥ श्वङ्गः सावादेशो वा ॥ ३० ॥

श्वङ्ग शयने इत्यस्य हेतुप्रत्ययागमलोपौ सावादेशश्च विकल्पेन भवति ॥ सावान् छुह् । शाययति ॥ पक्षे । श्वङ्गनावान् छुह् ॥

॥ दज़ो ज़ालः ॥ ३१ ॥

दज़ भस्मीभवने इत्यस्य हेतुप्रत्ययागमलोपौ ज़ाल आदेशश्च भवति ॥ ज़ालान् छुह् । दाहयति ॥ दज़नावान् छुह् इति न साधुशब्दः ॥

॥ डेषो हावो वा ॥ ३२ ॥

डेष प्रेक्षणे इत्यस्य धातोर्हेतुप्रत्ययागमलोपौ हावादेशश्च भवति ॥ हावान् छुह् । दर्शयति ॥ पक्षे । डेषनावान् छुह् । इति गौणः ॥

॥ गछ़ः पकः ॥ ३३ ॥

गछ़ गतौ इत्यस्य हेतुप्रत्ययागमलोपौ पकादेशश्च भवति ॥ पकनावान् छुह् । गमयति ॥ गछ़नावान् छुह् इति न साधुशब्दः । किं तु गंगाय गछ़नावान् छुस् । गङ्गां गमयति । इत्येवंविधे स्थाने यत्र स्वसाहचर्यं न स्यात्तत्रापर एव मुख्यः । यत्र तु स्वसाहचर्यं स्यात् यथा गोवून् पकनावान् छुह् । गा गमयति ॥ इत्येवंविधे स्थाने प्रथम एव मुख्य इति निर्णेयम् ॥

॥ वृथस्तुलः ॥ ३४ ॥

वृथ उत्थाने । इत्यस्य हेतुप्रत्ययागमलोपौ तुलादेशश्च भवति ॥ तुलान् छुह् । उत्थापयति ॥ वृथनावान् छुह् । इति गौणः । अत्रापि स्वहस्तेन वस्तुन उत्थापने आद्यो मुख्यः । प्रेरणादिना सजीवस्योत्थापने ऽपरो मुख्यः ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
आख्यातप्रक्रियायां हेतुपादश्चतुर्थः ॥८।४॥
समाप्ता चैषा आख्यातप्रक्रिया ॥८॥

अथ कृदन्तप्रक्रियायाम् ॥ ९ ॥

कृत्क्रियादिपादः ॥ १ ॥

॥ चादृते ऽनेककालक्रियायुगपदुक्तावप्रधाना कृत्क्रिया ॥ १ ॥

चशब्दं तदपरपर्यायमपिशब्दं च विना द्वयोः कालयोस्त्रयाणां वा वर्तमानातीतभविष्यद्रूपाणां कालानां क्रिययोः क्रियाणां वा युगपदुक्तौ एककालं भाषणे सति कृदन्तसंबन्धिनी क्रिया अप्रधाना आख्यातक्रिया कृदन्तमुख्यक्रिया वा एकैव प्रधाना ऽवधार्या । यथा द्वयोर्वर्तमानक्रिययोर्युगपदुक्तावेका मुख्या अपरा अप्रधाना। अतीतवर्तमानयोर्युगपदुक्तौ तयोरन्यतरा मुख्या। अतीतमुख्यतायां वर्तमानः अप्रधानः । वर्तमानमुख्यतायामतीतो ऽप्रधान इति । एवं वर्तमानभविष्यन्तौ ३ अतीतातीतौ ४ अतीतभविष्यन्तौ ५ भविष्यद्भविष्यन्तौ ६ वर्तमानभविष्यदतीताः ७ अतीतभविष्यद्वर्तमानाः ८ अतीतवर्तमानभविष्यन्तः ९ वर्तमानातीतातीताः १० वर्तमानभविष्यद्भविष्यन्तः ११ अतीतभविष्यद्भविष्यन्तः १२ अतीतवर्तमानवर्तमानाः १३ अतीतभविष्यदतीताः १४ भविष्यद्वर्तमानवर्तमानाः १५ इति पञ्चदश स्वरूपाणि भवन्ति । तत्र द्वयोः क्रिययोर्वर्तमानद्वयसत्त्वे भविष्यद्वर्तमानसत्त्वे वा परस्परमुख्यगौणकल्पनया न कोप्यर्थस्य विनिमयः स्यात् । केवलं मुख्यक्रियागौणक्रियानिर्देश इति। क्रियाद्वये वर्तमानातीतकालयोः सत्त्वे मुख्य-

गौणकल्पनयार्थविपर्यास इति। एवं क्रियात्रितयसमुदाये वर्तमानत्रयसत्त्वे मुख्यगौणकल्पनयार्थविलोमता न संभवति । वर्तमानैकसत्त्वे तु भविष्यदप्रधानक्रियया संबन्धे सति मुख्यगौणकल्पनयार्थविनिमयः । प्रधानक्रियया तु नार्थविपर्यय इति। अत्रातीतादिकालाः क्रियाकालापेक्षया निर्णेयाः न तु वर्तमानकालापेक्षयेति॥ क्रमादुदाहरणानि ॥ ख्यवान् गछ्रान् छुह्। खादन् गच्छति॥ ख्यथ् क्यथ् गछ्रान् छुह् । भुक्त्वा गच्छति ॥ ख्यवान् गछि । खादन् गमिष्यति ॥ ख्यथ् गयाव् । भुक्त्वा जगाम ॥ ख्यथ् गछि । भुक्त्वा गमिष्यति ॥ परनस् कितु गछि । पठितुं गमिष्यति ॥ ख्यवान् ख्यवान् परनस् कितु गयोव् । खादन्पठितुं जगाम ॥ पॉरिथ् ज़ेननस् कितु गछ्रान् छुह् । पठित्वा जेतुं व्रजति ॥ ह्यथ् क्यथ् दवान् पकि । धृत्वा धावन्गमिष्यति॥ दिथ् क्यथ् दकान् गौव् । दत्त्वा धावञ्जगाम ॥ ज़ेननस् कितु दवान् गछि । जेतुं धावन्गमिष्यति ॥ दिथ् क्यथ् ख्यनस् कितु गछि । दत्त्वा भोक्तुं गमिष्यति ॥ च्यथ् क्यथ् असान् यिवान् छुह् । पीत्वा हसन्नायाति ॥ श्रान् कॅरिथ् परनस् कितु गयोव् । स्नात्वा पठितुं ययौ॥ नच्रान् बसनस् कितु गछ्रानू छुह् । नृत्यन्निवसितुं याति ॥

॥ वर्तमाने धातुभ्य आन् ॥ २ ॥

मुख्यक्रियाया वर्तमानकाले चशब्दं विना अपरक्रियायां वाच्यायां सत्यां धातुभ्य आन् प्रत्ययो भवति स चाव्ययः ॥ करान् । कुर्वन् ॥ बोज़ान् । शृण्वन् ॥ परान् । पठन् ॥ इत्यादि । कर करणे । बोज़ निशामने । पर पठने। अनेन आन् प्रत्ययः ॥

॥ वपूर्वः स्वरान्तात् ॥ ३ ॥

स्वरान्ताद्धातोरान् प्रत्ययः वकारपूर्वो भवति क्रियावर्तमाने गम्यमाने सति ॥ दिवान् । ददन् ॥ ख्यवान् । खादन् ॥ च्यवान् । पिबन् ॥ दि दाने । खि खादने । चि पाने । अनेन वान् प्रत्ययः । चिख्योः सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इत्यकारागमः ॥

॥ आभीक्ष्ण्ये द्विश्च पदम् ॥ ४ ॥

आभीक्ष्ण्ये असकृत्कर्मणि गम्यमाने पदं द्विर्द्विवारं प्रयोज्यम् ॥ दिवान् दिवान् गौव् । ददद्ददृतः ॥ च्यवान् च्यवान् आव् । पिबन्पिबन्नागतः ॥ परान् परान् करुन् । पठन्पठन्नकरोत् ॥

॥ अतीते इथ् ॥ ५ ॥

मुख्यक्रियाकाले चशब्दं विना तदितरातीतक्रियायां गम्यमानायां धातोः इथ् प्रत्ययः स्यात् ॥ करिथ् । कृत्वा ॥ परिथ् । पठित्वा ॥ दारिथ् । धृत्वा ॥ साधनं सुगमम् ॥

॥ इथः क्यथ् वा ॥ ६ ॥

इथ् प्रत्ययात्परो विकल्पेन क्यथ् प्रत्ययो भवति ॥ करिथ् क्यथ् । कृत्वा ॥ परिथ् क्यथ् । पठित्वा ॥ दारिथ् क्यथ् । धृत्वा ॥ पक्षे । करिथ् । कृत्वा ॥ परिथ् । पठित्वा ॥ दारिथ् । धृत्वा ॥ इति पूर्वं साधितानि ॥

॥ स्वरान्तादिथो ऽत् ॥ ७ ॥

स्वरान्ताद्धातोः इथः इकारस्य अत् अकारो भवति ॥ ह्यथ् क्यथ् । धृत्वा ॥ ख्यथ् क्यथ् । खादित्वा ॥

॥ निदियिभ्य इलोपः ॥ ८ ॥

नि हरणे । दि दाने । यि आगमने । एभ्य इकारलोपो भवति ॥ निथ् । हृत्वा ॥ दिथ् । दत्त्वा ॥ यिथ् । आगत्य ॥

॥ वुडो ज इथि मोक्षे ॥ ९ ॥

वुड उड्डयने इत्यस्य इथ् प्रत्यये परे डकारस्य जकारो भवति मोक्षे गम्यमाने ॥ वुजिथ् गौव् । मोक्षं गत इत्यर्थः ॥

॥ मंषूरावो रलोपः स्वरविनिमयश्च मरणकर्मणि ॥ १० ॥

मंषूराव विस्मारणे इत्यस्य धातोर्मरणपदे कर्मणि सति इथ् प्रत्यये परे रकारस्य लोपो भवति पूर्वापरस्वरविनिमयश्च स्यात्। पूर्वस्य दीर्घो द्वितीयस्य ह्रस्वो भवतीत्यर्थः ॥ मरुन् माषविथ् । मरणं विस्मारयित्वेत्यर्थः ॥

॥ इ प्रत्यय आभीक्ष्ण्ये द्विश्च पदम् ॥ ११ ॥

अतीते काले आभीक्ष्ण्ये गम्यमाने धातोः इ प्रत्ययो भवति पदं च द्विर्भवति ॥ कंरि कंरि । कारं कारम् ॥ बूज़ि बूज़ि । श्रावं श्रावम् ॥ लूनि लूनि । लावं लावम् ॥

॥ स्वरान्ताद्वा ॥ १२ ॥

स्वरान्ताद्धातोः अतीतकाले आभीक्ष्ण्ये गम्यमाने विकल्पेन इ प्रत्ययो भवति। पदं च द्विर्भवति ॥ दि दि। दायं दायम् ॥ यि यि। एत्यैत्य ॥ ख्य ख्य । भुक्त्वा भुक्त्वा ॥ प्रथमयोः निदियिभ्य इलोपः (सू० ८) । तृतीयस्य स्वरान्तादिथो ऽत् (सू० ७) इति इकारस्य अकारः । इकारो ऽसवर्णे यो ऽपरलोपः (सू० १।१०) । पक्षे दिथ् दिथ् । दायं दायम् ॥ यिथ् यिथ् । एत्यैत्य ॥ ख्यथ् ख्यथ् । भुक्त्वा भुक्त्वा ॥ च्यथ् च्यथ् । पायं पायम् ॥ साधनं पूर्ववत् ॥

॥ आदुपधाया अप्रसिद्धता ॥ १३ ॥

अतीतक्रियायां धातोरुपधाभूतस्याकारस्याप्रसिद्धता भवति ॥ कारिथ् । क्वथित्वा ॥ मारिथ् क्वथ् । हत्वा ॥ तारिथ् । तारयित्वा ॥ एवं । कारि कारि । क्वाथं क्वाथम् ॥ मारि मारि । मारं मारम् ॥ तारि तारि । तारं तारम् ॥ साधनं सुगमम् ॥

॥ एत ईत् ॥ १४ ॥

अतीतक्रियायां धातोरुपधाभूतस्य एकारस्य ईकारो भवति ॥ क्षीदि क्षीदि । कुट्टं कुट्टम् ॥ बीहि बीहि । आसमासम् ॥ लीखि लीखि । लेखं लेखम् ॥ क्षेट कुट्टने । ब्यह उपवेशने । लेख लेखने । इ प्रत्यय आभीक्ष्ण्ये द्विश्च पदम् (सू० ११) इति इ प्रत्ययः ॥ [ब्यह धातुरस्य विधेरनाश्रयः । किंच बिहि बिहि इति ह्रस्वेकारेणैव पाठः शुद्धो ऽस्ति ॥]

॥ ऊदोकारस्य ॥ १५ ॥

अतीतक्रियायां धातोरुपधाभूतस्य ओकारस्य ऊकारो भवति ॥ खूचि खूचि । भायं भायम् ॥ बूजि बूजि । श्रावं श्रावम् ॥ तूलि तूलि । तोलयं तोलयम् ॥ एवं । खूचिथ् । भीत्वा ॥ बूजिथ् । श्रुत्वा ॥ तूलिथ् । तोलयित्वा ॥ साधनं सुगमम् ॥

॥ आनादयो ऽव्ययम् ॥ १६ ॥

आन् इथ् इथ्-क्वथ् इ इति चत्वारः प्रत्यया अव्ययमव्ययसंज्ञा भवन्ति ॥

॥ भविष्यति कितु पदम् ॥ १७ ॥

प्रधानक्रियाया भविष्यत्काले इतरस्यामप्रधानायां क्रियायां गम्यमानायां

धातोः कितु इति पदं भवति । पदग्रहणात् कितु इत्यस्य पुंस्त्रीत्वमेकत्वानेकत्वं च भवतीति विज्ञेयम् ॥ परनस् कितु । पठितुं सः ॥ रननस् कितु । पक्तुं सः ॥ परनस् किचू । पठितुं सा ॥ रननस् किचू । पक्तुं सा ॥ परनस् किति । पठितुं ते ॥ रननस् किच । पक्तुं ताः ॥ पर पठने । रन पाके । अनेन कितु । किताधनस् (सू० २०) इति अनस् आगमः । द्वितीययोः सर्वेषामुकारान्तानामूकारादेश (सू० ६।४) इति सूत्रेण ऊमात्रादेशः । तवर्गान्तानामप्रसिद्ध (सू० ६।११) इति तकारस्य चकारः । तृतीययोरेकस्य उवर्णान्तानामिकारः (सू० २ । १ । ३०) इति उकारस्य इकारः । अपरस्य ऊमात्रादेशे तकारादेशे च कृते । बहुत्वे ऽकारागम (सू० २ । १ । ११) इत्यकारागमः । उवर्णान्तानामिकार (सू० २ । १ । ३०) इति ऊकारस्य इकारः । इकारो ऽसवर्णे यो ऽपरलोप (सू० १ । १०) इति यत्वम् । तस्य अप्रसिद्धचवर्गाल्लोप (सू० ८ । ३ । ४७) । चेटनस् कितु । कुट्टयितुं सः ॥ चेटस् कितु (सू० ९ । २।१२) कुट्टनाय सः ॥ ग्रजनस् कितु । गर्जितुं सः ॥ ग्रजि कितु (सू० ९।२।६५) गर्जनाय सः ॥ इति चतुर्थीस्वरूपाणि च तेषां धातूनां दृश्यन्ते येषां भावा अनेकधा भवन्ति । येषां तु पुंस्त्रीभेदाद्द्विविध एव स्यान्न तत्र चतुर्थीप्रयोगेन सिद्धिः । किंतु वक्ष्यमाणव्यञ्जनान्तेभ्यो धातुभावशब्देभ्यश्चतुर्थीप्रोक्तप्रत्ययेषु कृतेषु व्यञ्जनान्तस्योकारोपधाया अत् (सू० २ । १ । ३२) इत्यादिना चतुर्थीस्वरूपं सेत्स्यतीति ॥

॥ अनि च ॥ १८ ॥

प्रधानक्रियाया भविष्यत्काले इतरस्यामप्रधानायां क्रियायां गम्यमानायां धातोः परः अनि प्रत्ययो भवति ॥ परनि गछान् ग्रुह् । पठितुं व्रजति ॥ रननि गौव् । पक्तुं गतः ॥ रुयनि गछि । अत्तुं यास्यति ॥

॥ समखः शुक्प्रष्टव्ये नित्यम् ॥ १९ ॥

समख समक्षीभवने इत्यस्य धातोः शोके प्रष्टव्ये सति नित्यमनि प्रत्ययो भवति ॥ समखनि गौव् । शोकपृच्छायै गत इत्यर्थः ॥ अन्यत्र । समखन-पुछ्य रूढ । समक्षीभवनाय स्थितः ॥

॥ कितावनस् ॥ २० ॥

धातोः कितु प्रत्यये परे अनस् आगमो भवति ॥ करनस् कितु । कर्तुं सः । साधनं सुगमम् ॥

॥ निदियिभ्यो ऽकारलोपः ॥ २१ ॥

नि हरणे । दि दाने । यि आगमने । एभ्यः परस्य अकारस्य लोपो भवति ॥ निनस् कितु । हर्तुं सः ॥ दिनस् कितु । दातुं सः ॥ यिनस् कितु । आगन्तुम् ॥

॥ उनु वा ॥ २२ ॥

धातोः कितु प्रत्यये उनु (सू० ९ । २ । ३) आगमो विकल्पेन भवति ॥ करुनु कितु । कर्तुं सः ॥

॥ उन्वन्तं लिङ्गवत् ॥ २३ ॥

अत्र वक्ष्यमाणे भावविकल्पस्वरूपे च उनु (सू० ९ । २ । ३) अन्ते यस्य तत्पदं लिङ्गवद्भवति । यथा कितु प्रत्ययस्य पुंस्त्रीत्वमेकत्वानेकत्वं च संभवति तथैव तस्मात्पूर्वस्य उनु विशिष्टस्य धातोरपि भवति ॥ रनुनु कितु । पक्तुं सः ॥ रनुनि किति । पक्तुं ते ॥ करञ् किचू । कर्तुं सा ॥ करञ किच । कर्तुं ताः ॥ साधनमुक्तवत् ॥

॥ स्वरान्तेभ्यो ऽनिदियिभ्य आदेरत् ॥ २४ ॥

नि हरणे । दि दाने । यि आगमने एतान्वर्जयित्वा स्वरान्तेभ्यो धातुभ्यः उनु प्रत्ययस्यादेरुकारस्य अकारो भवति ॥ ख्यनु कितु । खादितुं सः ॥ च्यनु कितु । पातुं सः ॥ प्यनु कितु । पतितुं सः ॥ ह्यनु कितु । वोढुं सः ॥ अनिदियिभ्यः किम् । दिनु कितु । दातुं सः ॥ निनु कितु । हर्तुं सः ॥ यिनु कितु । आयातुं सः ॥ साधनं पूर्ववत् ॥

॥ कर्तरि वुनु ॥ २५ ॥

धातोः कर्तर्यर्थे वुनु प्रत्ययो भवति ॥ करवुनु । कर्ता ॥ परवुनु । पाठकः ॥

॥ वुनावकारागमः ॥ २६ ॥

धातोः वुनु प्रत्यये परे अकारागमो भवति ॥ व्यठवुनु । स्थूलीभवन् ॥ पोठवुनु । पोष्टा । सुगमम् ॥

॥ स्वरान्तेभ्यो वपूर्वः ॥ २७ ॥

स्वरान्तेभ्यो धातुभ्यो वपूर्वः अकारागमः वकारागमो भवति ॥ निववुनु । हारकः ॥ दिववुनु । दायकः ॥ यिववुनु । आगन्ता ॥ एवं । ख्यववुनु । खादकः ॥ च्यववुनु । पायकः ॥ ह्यववुनु । क्रायकः ॥ अत्र वकारागमे कृते सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इति धातोरेव अकारागमः ॥

॥ वोलुग्राक् पदौ च ॥ २८ ॥

धातोः कर्तर्यर्थे वोलु प्रत्ययः ग्राक् प्रत्ययश्च भवति उदाहरणमुत्तरसूत्रे ॥

॥ तयोरनागमः ॥ २९ ॥

तयोर्वोलु ग्राक् प्रत्यययोः परयोर्धातोः अन् आगमो भवति ॥ करन्-वोलु । कर्ता ॥ परन्-वोलु । पठिता ॥ एवं । करन्-ग्राख् । कर्ता ॥ परन्-ग्राख् । पाठकः ॥ पदसंज्ञाव्यपदेशाद्वक्ष्यमाणपुंस्त्रीभावपदात्परौ प्रयुक्तौ सन्तौ प्रोक्त-समासवत्सिद्धिरवधार्या ॥ तद्यथा । ज्ञानुन् भावपदात् अग्रे वोलुपदं । व्यञ्ज-नान्तस्योकारोपधाया अत् (सू० २।१।३२) इति उपधाया उकारस्य अकारः ॥ एवं । ज्ञांञ्जू-वोलु । अत्र ज्ञान् (सू० ९।२।७१) भावपदात् अग्रे वोलु पदम् । तवर्गान्तानामप्रसिद्ध (सू० ६।११) इति नकारस्य ञकारः । कृतादेशानामू-मात्रा आगम (सू० २।१।१६) इति ऊमात्रा आगमः ॥ ज्ञानन्-वोलु । ज्ञाता ॥ ज्ञांञ्जू-वोलु । ज्ञाता ॥ इति सिद्धम् । यस्यैव धातोः स्वार्थे पुंस्त्रीरूपे भावपदे स्यातां तस्यैव स्वरूपद्वयं संगच्छत इत्यवधार्यम् ॥ [यस्यैवेत्यत्रायमर्थः यस्य धातोः स्वार्थे निजार्थे कर्तुः स्वस्यैवात्मन आन्तरधर्मद्योतके न तु केनचिद्बाह्येन कर्मादिना संयुज्यमानार्थके पुंस्त्रीरूपे पुंसि स्त्रियां च न तु द्वयोरन्यतरस्मिन्नेव निष्पद्यमानप्रयोगे भावपदे वक्ष्यमाणभावप्रत्ययान्तरूपे स्यातां तस्यैवेति। यथात्र ज्ञानुन् ज्ञान् इत्युभे पुंस्त्रीरूपे भावपदे कर्तृसंबन्धिज्ञानरूपस्यान्तरधर्मस्य वाचके स्त इति बोध्यम् । करादीनां (सू० ९।२।२।) स्वबाह्यकर्मसंयोगात् चरादीनां (सू० ९।२।२४) नित्यस्त्रीभावात् छ्वकादीनां (सू० ९।२।९) स्त्रीभावप्रत्ययान्त-भावाभावात् डलादीनां (सू० ९।२।२७) बाह्यधर्मसंयोगभावात्पदसंज्ञाव्यपदेशा-दित्यादिना सूचितविधेरप्रसक्ततोद्येति ॥]

॥ स्वरान्तात्सस्वरः ॥ ३० ॥

सः अन् आगमः स्वरान्ताद्धातोः सस्वरः स्वरान्तो भवति ॥ ख्यन-वोलु । खादिता ॥ च्यन-वोलु । पाता ॥ एवं । ख्यन-ग्राख् । भक्षकः ॥ च्यन-ग्राख् पायकः ॥

॥ न्यादीनामल्लोपः ॥ ३१ ॥

नि हरणप्रापणयोः । दि दाने । यि आगमने । इत्येषाम् अन् आगमस्य अकारलोपो भवति ॥ निन-वोलु । नेता ॥ दिन-वोलु । दाता ॥ यिन-वोलु । आगन्ता ॥ एवं । निन-ग्राख् । नायकः ॥ दिन-ग्राख् । दायकः ॥ यिन-ग्राख् । आगन्ता ॥

॥ दिदावोर्नल्लौ व्यभिचारिण्याम् ॥ ३२ ॥

दि दाने । दाव दापने । इत्यनयोर्व्यभिचारिण्यां स्त्रियां क्रमेण नल् अल् प्रत्ययौ भवतः ॥ दिनल् । व्यभिचारिणी ॥ दावल् । व्यभिचारिणी ॥

॥ कर्मोपपदे पुंस्य ऽश्लीले ॥ ३३ ॥

तयोर्दिदावोः कर्मण्युपपदे सति पुंसः अश्लीले नल् अलौ भवतः ॥ माज्य-दिनल् । मातृगामी ॥ ब्यञ्ज-दिनल् । स्वसृगामी ॥ कोरि-दिनल् । कन्यागामी ॥ एवं । माज्य-दावल् । ब्यञ्ज-दावल् । कोरि-दावल् ॥

॥ नलो लो वा ॥ ३४ ॥

नल् प्रत्ययस्यादेर्विकल्पेन लकारो भवति ॥ माज्य-दिलल् ॥

॥ क्वचिल्लोपः ॥ ३५ ॥

नल् प्रत्ययस्यादेः क्वचिल्लोपो भवति ॥ माज्य-दिल् । मातृगामी ॥

॥ प्रधानातीते ड्ः ॥ ३६ ॥

धातोः प्रधाने क्रियारूपे अतीते गम्यमाने ड् प्रत्ययो भवति ॥ कर्ह् । कृतम् ॥ पर्ह् । पठितम् ॥ खर्ह् । खातम् ॥

॥ चिख्योरौवादेशः ॥ ३७ ॥

चि पाने । खि खादने । इत्यनयोः ङ् प्रत्ययस्य औव् आदेशो भवति ॥ च्यौव् । पीतम् ॥ ख्यौव् । भुक्तम् ॥

॥ नेरूव् ॥ ३८ ॥

नि हरणे इत्यस्मात् ङ् प्रत्ययस्य ऊव् आदेशो भवति ॥ न्यूव् । नीतम् ॥ तत्र युष्मच्छब्दकर्तारे आख्यातोक्तभूतक्रियैव (सू० ८।३।३४) मुख्या स्पष्टा च प्रोक्ता तु गौणेति बोध्यम् ॥

॥ कर्तृधातूनामाख्यातभूतक्रियैव नित्यम् ॥३९॥

येषां धातूनामतीतकाले कर्तृप्रयोगा एव भवन्ति तेषामाख्यातोक्तभूतकालक्रियैव नित्यं भवति कर्मप्रयोगाभावात् ॥ च्लु । पलायितः ॥ च्लि । पलायिताः ॥ व्यथ्यौव् । पुष्टः ॥ व्यथ्येय् । पुष्टाः ॥ आख्यातप्रक्रियायां साधितानि ॥

॥ भूतपदान्मतु पदं कर्मणि ॥ ४० ॥

कर्मणि धातुक्रियाविशिष्टे पदार्थे अभिधेये सति कर्मधातोः कृदुक्तभूतक्रियापदात् कर्तृधातोश्चाख्यातोक्तभूतपदात् मतु पदं भवति । मतु पदे तु मुतु इति उकारविशिष्टं च व्यवह्रियते । भूतपदग्रहणेन यथा मतु पदस्य प्रथमादिविभक्तिपरिणामो भवति एकत्वानेकत्वपुंस्त्रीपरिणामश्च भवति तथा तत्तद्भूतक्रियापदस्यापि भवति । मतु विशिष्टं पदं त्वेकमेव भवति न तु द्वितयम् ॥ कर्तृ-मतु । कृतम् ॥ कर्तृ-मचू । कृता ॥ गर्तृ-मतु । घट्टितम् ॥ गर्तृ-मचू । घट्टिता ॥ कॄरि-मति । कृतानि ॥ कर्य-मच । कृताः ॥ गॄरि-मति । घट्टितानि ॥ गर्य-मच । घट्टिताः ॥ कर करणे । गर घट्टने । प्रधानातीते ङः (सू० ३६) । कर्तृ पदात् गर्तृ पदाच्चानेन मतु पदम् । पुंबहुत्वे पूर्वोत्तरपदयोरन्त्यस्वरस्य इकारः । स्त्रीलिङ्गे ऊमात्रादेशः । तका-

रस्य च ऋत्वम्। एवं सर्वत्र विभक्तिगणे विज्ञेयम्॥ कर्तृधातूनां यथा। व्यठ्यो-र्मतु। स्थूलीभूतः॥ खूचु-र्मतु। भीतः॥ व्यठ स्थूलीभवने औव् यागमः (८।३।४६ सूत्रेण) व्यठ्योव् पदात् र्मतु पदम्। संबन्धिप्रत्ययेषु वयोर्लोप (सू० ८।३।४१) इति वकारस्य लोपः। एवं। खोच्र भये ओव् तस्य छह् आदेशः छहोर्लोपश्च। ओ-कारस्योकारः सादेशपुंकर्तरि च (सू० ८।३।२४) इत्युपधाया ऊकारः। खूचु पदात् र्मतु पदम्॥ ननु कर्तृधातूनां वकारस्य लोपे ओदन्तावशेषणादोदन्तस्य च लिङ्ग-प्रयोगादर्शनात्कथं पूर्वपदस्य लिङ्गपरिणामः क्रियते। अत्रोच्यते यथा उकारान्तस्य प्रथमाबहुत्वादिषु एकमात्र एव इकारादेशः क्रियते तथैव द्विमात्रस्य संध्यक्षरस्य ओकारस्यापि द्विमात्रसंध्यक्षरस्य एकारस्यादेशो भवतीति बोध्यम्। तेन व्य-ठ्ये-र्मति। स्थूलीभूताः॥ यद्वा। व्यठ्येय् इति बहुवचनभूतक्रियाया र्मतु पदे कृते प्रोक्तसूत्रेण यकारलोपात्सेत्स्यतीति॥ एकाक्षरावशिष्टानां तु पदसंज्ञानिवृत्तिः॥ तेन। आर्मतु। आगतः॥ आर्मति। आगताः॥ च्रार्मतु। प्रविष्टः॥ च्रार्मति। प्रविष्टाः॥ द्रार्मतु। निर्गतः॥ द्रार्मति। निर्गताः॥ प्यार्मतु। प्रसूतः॥ प्यार्मति। प्रसूताः॥ ज़ार्मतु। जातः॥ ज़ार्मति। जाताः॥ मूदु इति क्रियापदस्य र्मतौ अन्त्यव्यञ्जनादेर्विकल्पेन लोप इष्यते॥ मूदु-र्मतु। मृतः॥ पक्षे। मूर्मतु। मृतः॥ स्त्रीलिङ्गे तु नित्यमिष्यते॥ मूर्मच्रू। मृता॥ मूमच्र। मृताः॥

॥ हेः पूर्वं भावपदं चारब्धे ॥ ४१ ॥

हि ग्रहणादिषु इत्यस्य धातोः कृदुक्तभूतपदात्परं र्मतु पदं भवति। धातोः पूर्वं च भावपदं (सू० ९।२।३) प्रयोज्यम् आरब्धे कर्मणि अभिधेये सति॥ ग्यवुनु ह्यतु र्मतु। गीयमानम्॥ करुनु ह्यतु र्मतु। क्रियमाणम्॥

॥ गछो ऽतीतानागतो धातुभावतस्तव्यार्थे ॥४२॥

अत्र शब्दशास्त्रे तव्यार्थकः शब्दः अतीतकाले भविष्यत्काले च भवतीति बोध्यम्। गछ सामञ्जस्ये इत्यस्य प्रधानभूतकालस्वरूपं प्रधानभविष्यत्कालस्वरूपं

च धातोर्भावशब्दाद्वक्ष्यमाणरीत्या पूर्वे परे वा प्रयुज्येते क्रमेण भूततव्यार्थभविष्यत्तव्यार्थके भवतः ॥ च्य गंछु गछुनु । त्वया गन्तव्यं भूते ॥ त्वद्य गंछु गछुनु । युष्माभिर्गन्तव्यम् ॥ अनागते यथा ॥ तंतु गछि गछुनु । तत्र गन्तव्यम् ॥ साधनं सुगमम् ॥

॥ विधिनिषेधयोर्लगः ॥ ४३ ॥

लग संगे पीडायां च इत्यस्य स्वरूपं धातोर्भावशब्दात्प्रयोज्यम् विधौ निषेधे च गम्यमाने । तत्र अतीतक्रियाया विधिनिषेधयोर्निषेधादनागतस्वरूपमेव ज्यायः न भूतस्वरूपं। किंत्वपूर्णभूतस्वरूपं युज्यते ॥ तंतु लगि गछुनु । तत्र गन्तव्यम् ॥ तंतु लगि न गछुनु । तत्र न गन्तव्यम् ॥ तंतु लगिहे गछुनु [। तत्र गन्तव्यं योग्यमभविष्यत्] ॥

॥ भाव्यार्थे पज्श्च ॥ ४४ ॥

पज युक्तीभवने इत्यस्यातीतापूर्णभूतस्वरूपं धातुभावतः प्रयोज्यं चशब्दाद्भूतप्रयोगाश्च भाव्ये सामञ्जस्ये गम्यमाने ॥ तंतु पज़ि गछुनु । तत्र गमनेन भाव्यम् ॥ तंतु पज़िहे गछुनु । [तत्र गन्तव्यं योग्यमभविष्यत् ॥] एवमन्यत् ॥

॥ षष्ठी तृतीया वैषां कर्तरि ॥ ४५ ॥

एषां प्रोक्तानां गछादीनां कर्तरि षष्ठी तृतीया वा स्यात् ॥ च्य गंछु करुन् । त्वया कर्तव्यं भूते ॥ वा । च्योनु गंछु करुन् । ते कर्तव्यं भूते ॥ च्य पज़ि रनुन् । त्वया पक्तव्यम् ॥ च्योनु पज़ि रनुन् । तव पक्तव्यम् ॥ च्य लगि दपुन् । त्वया वाच्यम् ॥ च्योनु लगि न दपुन् । तव न वक्तव्यम् ॥

॥ एभ्य एव संबन्धप्रत्ययाश्च ॥ ४६ ॥

एभ्यो गछ्छादिभ्यः स्वरूपेभ्यस्तत्संबन्धादिप्रत्ययाश्च भवन्ति न तु धातुभावतः ॥ गंछुस् करुन् । तस्मै कर्तव्यं भूते ॥ गंछुय् करुन् । तुभ्यं कर्तव्यम् भूते ॥ एवं । लग्यस् करुन् । कर्तव्यं तस्य ॥ लगिय् करुन् । कर्तव्यं तव ॥ लग्यम् करुन् । कर्तव्यं मम ॥ एवं । पज़्यस् परुन् । पाठेन तस्य भाव्यम् ॥ पज़्यम् परुन् । पाठेन मम भाव्यम् ॥

॥ एकपदे भावतः परा वा ॥ ४७ ॥

एकस्मिन्नेव क्रियारूपे पदे वक्तव्ये सति गछ्छादीनां प्रयोगा भावतः परा वा प्रयोज्याः ॥ गंछु गछुन् वा गछुन् गंछु [। गन्तव्यम्] ॥ लगि परुन् वा परुन् लगि [। पठितव्यम्] ॥ पज़ि रुयंनु वा रुयंनु पाज़ि । अत्तव्यम् ॥

॥ अनेकपदेषु वाक्यारम्भपदात् ॥ ४८ ॥

एकाधिकपदैर्वाक्ये वक्तव्ये सति वाक्यस्य आरम्भपदादग्रे ते गछ्छादीनां प्रयोगाः स्युः ॥ अद गंछु तंतु गछुनु । ततस्तत्र गन्तव्यम् ॥ एवं । अद लगि तति बिहुनु । ततस्तत्रासितव्यम् ॥ एवम् । अद पज़ि तति दपुनु । ततस्तत्र वक्तव्यम् ॥ एवमन्यत् ॥

॥ गछो गतागतप्रयोगा उदन्तभावतः कामार्थे ॥ ४९ ॥

इच्छार्थे गम्यमाने सति गछ गतौ सामञ्जस्ये च इत्यस्य अतीतानागतकालिकाः सर्वे प्रयोगा उकारान्तभावतः प्रयोज्याः । ते तु कर्तर्येव ज्ञेयाः । भावस्योकारान्तत्वं च धातुवत् एकत्वानेकत्वपरिणामार्थमिति ॥ तत्रानागते यथा ।

सुह् गछि गछुनु [। स गच्छतु] ॥ तिम् गछन् गछ़ुनि [। ते गच्छन्तु] ॥ चूह् गछ़ख् गछुनु [। त्वं गच्छ] ॥ त्वंहि गछिव् गछ़ुनि [। यूयं गच्छत] ॥ बुह् गछ़ गछुनु [। अहं गच्छानि] ॥ अंसि गछ़ब् ज़ेनंनि [। वयं जयेम ॥ इत्यादयो वाक्यार्था इच्छार्थे बोध्याः] ॥ अतीतकालिकेषु यथा । ताफ् गंछु करुनु [। आतपो ऽभविष्यत्] ॥ कुलि गंछि खसंनि [। वृक्षा अरुक्ष्यन्] ॥ चूह् गंछुख् गछुनु [। त्वमगमिष्यः] ॥ त्वंहि गंछिव गछ़ुनि [। यूयमगमिष्यत] ॥ बुह् गंछुस् गछुनु [। अहमगमिष्यम्] ॥ अंसि गंछि बडंनि [। वयमवर्धिष्याम ॥ इति वाक्यार्था आशंसापरा बोध्याः । अतीतकालश्चात्र क्रियातिपत्तौ चरितार्थः ॥ सर्वेषाम्] साधनं पूर्ववत् ॥

॥ भावकर्मणोरनी ॥ ५० ॥

धातोर्भावकर्मणोर्विषये अनी प्रत्ययो भवति ॥ करनी । करणीयम् ॥ पकनी । गमनीयम् ॥ वृथनी । उत्थेयम् ॥ दिनी । देयम् ॥ ह्यनी । क्रेयम् ॥ हेः सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इत्यकारागमः । शेषं स्पष्टम् ॥

॥ नञो ऽर्थे धातोरनय् ॥ ५१ ॥

धातोः नञ्शब्दस्य अभावस्यार्थे वाच्ये अनय् भवति स चाव्ययम् ॥ करनय् । अकृतम् ॥ गरनय् । अघट्टितम् ॥ परनय् । अपठितम् ॥ पोठनय् । अपुष्टम् ॥ दिनय् । अदत्तम् ॥ ह्यनय् । अक्रीतम् ॥ साधनं सुगमम् ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते कृदन्तप्रक्रियायां
कृत्क्रियादिपादः प्रथमः ॥ ९।१ ॥

अथ कृदन्तप्रक्रियायाम् ॥९॥

भावपादः ॥२॥

॥ भावे ॥ १ ॥

इतः परं ये वक्ष्यमाणाः प्रत्ययास्ते सर्वे भावे विज्ञेयाः ॥

॥ पुंस्युन् ॥ २ ॥

धातोर्भावे उन् प्रत्ययो भवति स च पुंलिङ्गे वर्तते ॥ करुन् । करणम् ॥ परुन् । पठनम् ॥ द्युन् । दानम् ॥ असुन् । हसनम् ॥

॥ अंनु [उनु] वा ॥ ३ ॥

धातोर्भावविषये अंनु प्रत्ययो वा विकल्पेन भवति सोऽपि पुंलिङ्गे ॥ चरंनु । उपचयनम् ॥ जुवंनु । जीवनम् ॥ [अंनु प्रत्ययस्थाने उनु प्रत्ययव्यवहारो दृश्यते । यथा ९।१ सूत्रेषु २२,२३,४१,४२ इत्यादिषु] । पक्षे । चरुन् । जुवुन् । इति स्वरूपे स्तः ॥

॥ तलबज़ोर्यागमो वा ॥ ४ ॥

तल स्नेहपाके । बज़ सेवायां स्नेहने च । इत्यनयोः उन् प्रत्यये परे

विकल्पेन यकारागमो भवति । तत्र बजः स्नेहन एव ॥ तल्युन् । स्नेहपाकः ॥ बज़्युन् । स्नेहपाकः ॥ पक्षे । तलुन् । बज़ुन् ॥

॥ मषश्च रब् ॥ ५ ॥

मष विस्मरणे इत्यस्य भावे रब् प्रत्ययो भवति ॥ मषरब् । विस्मरणम् ॥ पक्षे । मषुन् ॥

॥ द्रदरज्वज़रस्वसरां च उ् ॥ ६ ॥

द्रदर जीर्णीभवने । ज़्वज़र जर्जरत्वे । स्वसर काष्ठादिजीर्णने । इत्येषां भावे उ् प्रत्ययश्च स्यात् ॥ द्रदरु । जीर्णनम् ॥ ज़्वज़रु । जीर्णनम् ॥ स्वसरु । जीर्णनम् ॥ पक्षे । द्रदरुन् । ज़्वज़रुन् । स्वसरुन् ॥

॥ छ्वम्बज्वसबगारब्यहलमलोसवुनाम ऽच्च ॥७॥

छ्वम्ब कणमर्दने । ज़्वस कासे । बगार भ्रक्षणे । ब्यह उपवेशने । लम आकर्षणे । लोस श्रमे । वुन दैवानार्जवे । एषां भावे अ प्रत्ययश्च भवति ॥ छ्वम्ब । मर्दनम् ॥ ज़्वस । कासः ॥ बगार । भ्रक्षणम् ॥ ब्यह । आसनम् ॥ लम । आकर्षणम् ॥ लोस । श्रमः ॥ वुन [। दौर्भाग्यम्] ॥ पक्षे । छ्वम्बुन् । इत्यादयो भवन्ति ॥

॥ लदश्चाव् वेतने ऽपि ॥ ८ ॥

लद वस्तुप्रेषणे गृहादिनिर्माणोर्ध्वान्तरीकरणयोः सूत्रादिकर्मणि च इत्यस्य भावे आव् प्रत्ययश्च भवति ॥ तद्वेतने ऽपि गृहादिनिर्माण एव बोध्यम् । इतरयोस्तु गौणतया ॥ लदाव् । [गृहादि] निर्माणम् । तद्वेतनं च ॥

॥ छ्वकवछ्वकटकटुकट्वकठुकत्रुकथकपाकवफुकफ्वक ब्रकामुंछोपो वा ॥ ९ ॥

छ्वकव जलावगाहने। छ्वक वाङ्नैर्बल्ये। टक शब्दवद्दन्तैश्छेदने। टुक आखुवच्छेदे। ट्वकव कूटाद्याघाते। ठुक उत्खनने। त्रुक कणशश्छेदने भक्षणे च। थक श्रमे। पाकव पचने। फुक अङ्गारप्रदीपने। ब्रक दंष्ट्राघाते। एषां भावे उन् प्रत्ययस्य लोपो वा भवति ॥ तत्र छ्वको दाहवैदग्ध्ययोः। टकश्छेदन एव। ट्वकवछ्वकवपाकवानामन्त्यस्वरादिलोपः ॥ फुकः फूत्कारे उपधाया वत्वमिष्यते ॥ छ्वख्। जलशोधना ॥ छ्वख्। दाहः वैदग्ध्यं वा ॥ टख्। छेदः ॥ टुख्। छिद्रवच्छेदः ॥ ट्वख्। मृगादिहननम् ॥ ठुख्। उत्खननम् ॥ त्रुख्। कणभक्षणं छेदनं वा ॥ थख्। श्रमः ॥ पाख्। पाकः ॥ फुख्। अङ्गारप्रदीपनम् ॥ फ्वख्। फूत्कारः ॥ ब्रख्। आघातः ॥

॥ ट्वगरङ्गसगां गात् ॥ १० ॥

ट्वगव अवखण्डने। रङ्ग रञ्जने। सगव वृक्षादिसिञ्चने। गकारान्तेषु एषां धातूनां भावे उन् प्रत्ययस्य विकल्पेन लोपो भवति। ट्वगवसगवयोर्मूलधातू अनुपलब्धावपि कारितोत्पन्नो व प्रत्ययो ऽनुमीयते। अतः ट्वकवधातुवदत्रापि अन्त्यस्वरादिलोपे गान्तेषु पठितौ ॥ ट्वग्। खण्डनम्॥ रङ्ग्। रागः ॥ सग्। सेकः ॥

॥ वाँचश्च्यात् ॥ ११ ॥

अप्रसिद्धचवर्गान्तेषु धातुषु वाँच वञ्चने इत्यस्य धातोर्भावे उन् प्रत्ययस्य लोपो वा भवति ॥ वाँछ् । वञ्चनम् ॥

॥ चेटलूटवाटां टात् ॥ १२ ॥

टकारान्तेषु धातुषु । चेटकुट्टने । लूट लुण्ठने । वाट संधापने । इत्येषां भावे उन् प्रत्ययस्य लोपो वा भवति ॥ चेद् । कुट्टनम् ॥ लूद् । लुण्ठनम् ॥ वाद् । संधिः ॥

॥ गण्डो डात् ॥ १३ ॥

डकारान्तेषु । गण्ड ग्रन्थे । इत्यस्य भावे उन् प्रत्ययस्य लोपो वा भवति ॥ गंद् । ग्रन्थिः ॥

॥ खनछ्यनोर्नात् ॥ १४ ॥

नकारान्तेषु । खन अवदारणे । छ्यन छेदे । इत्यनयोर्भावे उन् प्रत्ययस्य लोपो वा भवति ॥ खन् । खातः ॥ छ्यन् । छेदः ॥

॥ कांम्पकृपचापजपटपां पात् ॥ १५ ॥

पकारान्तेषु । कांम्प कम्पने । कृप कर्तने । चाप अदने । जप जपने । टप परोक्षपरिभाषणे । एषां धातूनां भावे उन् प्रत्ययस्य लोपो वा भवति । टपः अश्वाघाते कार्यघाते च ॥ कांम्फ् । कम्पः ॥ कृफ् । कृन्तनम् ॥ चाफ् । अदनम् ॥ जफ् । जपः ॥ टफ् । अश्वपादादिप्रहारादि ॥

॥ ब्रमो मात् ॥ १६ ॥

ब्रम भ्रान्तौ । इत्यस्य मकारान्तेषु धातुषु भावे उन् प्रत्ययस्य लोपो वा भवति ॥ ब्रम् । भ्रान्तिः ॥

॥ चारचीरतारफुकारफ्यारमारस्वरां रात् ॥१७॥

रकारान्तेषु धातुषु । चार बलाद्बन्धने । चीर निष्पीडने । तार तारणे । फुकार कोपालापे । फ्यार रसनिष्कासने । मार मारणे । स्वर स्मरणे । इत्येषां भावे उन् प्रत्ययस्य लोपो वा भवति ॥ फुकारः पाकभेदे च । स्वरश्चेष्टायां च ॥ चार् । अतिबन्धनम् ॥ चीर् । निष्पीडनम् ॥ तार् । तारणम् ॥ फुकार् । ऊष्मनिर्गमः ॥ मार् । मारणम् ॥ स्वर् । चेष्टा स्मृतिश्च ॥

॥ च़्यलछ़लज़्लतोलदलमेलां लात् ॥१८॥

लकारान्तेषु धातुषु । च़्यल बलात्प्रवेशने । छ़ल छलने । ज़्ल नखैस्तक्षणे । तोल तोलने । दल विदारणे । मेल संगमे । एषां धातूनां भावे उन् प्रत्ययस्य लोपो वा भवति ॥ च़्यल् । बलात्प्रवेशः ॥ छ़ल् । छलम् ॥ ज़्ल् । नखक्षतम् ॥ तोल् । तौल्यम् ॥ दल् । अवखण्डनम् ॥ मेल् । सङ्गः ॥

॥ ज़ुवडुवताववृहवां वात् ॥ १९ ॥

वकारान्तेषु । ज़ुव जीवने । डुव संमार्जने । ताव तापने । वृहव शापे । इत्येषां भावे उन् प्रत्ययस्य लोपो वा भवति ॥ ज़ुव् । जीवः ॥ डुव् । नाशः ॥ ताव् । तापः ॥ वृहव् । शापः ॥

॥ रसह्सवोः सात् ॥ २० ॥

रस सरसीभवने । ह्सव श्वादिसूचनायाम् । इत्यनयोर्भावे उन् प्रत्ययस्य लोपो वा भवति ॥ ह्सवो ऽत्रापि पूर्ववद्वकारलोप इष्यते ॥ रस् । रसः ॥ ह्स् । सचना ॥

॥ गृहः सकारो वा ॥ २१ ॥

गृह घर्षणे इत्यस्य भावे उन् प्रत्ययस्य लोपो वा भवति। धातोरन्त्यस्य च विकल्पेन सकारो भवति ॥ गृह् । घर्षणस् ॥ पक्षे । गस् । घर्षणम् ॥

॥ चूहश्च ॥ २२ ॥

चूह चूषे इत्यस्य भावे उन्प्रत्ययस्य लोपो वा भवति ॥ चूह् । चूषणम् ॥

॥ स्त्रियाम् ॥ २३ ॥

इत उत्तरं ये वक्ष्यमाणाः प्रत्ययास्ते स्त्रियां भावे विज्ञेयाः ॥

॥ चरचुवमोरवमर्चां नित्यमिञ् ॥ २४ ॥

चर अन्तःकोपे । चुव कलहे । मोरव पीडासहने । मर्च अमर्षे । इत्येषां भावे नित्यम् इञ् प्रत्ययो भवति स च स्त्रियामेव ॥ चरिञ् । अन्तःकोपः ॥ चुविञ् । कलहः ॥ मोरवूञ् । सहनम् ॥ मर्चूञ् । अमर्षणम् ॥

॥ मोरवमर्चखसफिचादिभ्य ऊदादेः ॥२५॥

मोरव पीडासहने । मर्च अमर्षे । इत्याभ्यां परस्य उत्तरसूत्रे वक्ष्यमाणफिचादिभ्यश्च इञ् प्रत्ययस्य आदिस्वरस्य ऊमात्रादेशो भवति ॥ मोरवूञ् [। सहनम्] ॥ मर्चूञ् [। अमर्षणम्] ॥

॥ फिच [खस] फुहफुशवजवचुचां वा ॥२६॥

फिच विस्मरणे । [खस ततूरुहकर्षणे ।] फुह फुश अन्तःकोपे । वजव सार्द्रीकरणे । चुच दग्धी भवने । इत्येषां भावे स्त्रियां विकल्पेन इञ् प्रत्ययो

भवति ॥ फिचूझ् । कार्यविस्मृतिः ॥ [ख्सूझ् । तनूरुह + + कर्षणम् ॥] फुहूझ् । अन्तःकोपः ॥ फ्रशूझ् । अन्तःकोपः ॥ वज़वूझ् [। सार्द्रीभावाय जलादौ स्थापनम्] ॥ वुचूझ् । दाहः [अत्रापि क्रोधेनैवान्तर्दाह इव संताप इत्यर्थः] ॥ पक्षे । फिचुन् । [ख्सुन् ।] फुहुन् । फ्रशुन् । वज़वुन् । वुचुन् ॥

॥ सारखुतटुवडुवडलत्रुकथ्यकनचनटनमवुज़-वुठवुपां च ॥ २७ ॥

सार स्वारादिषु । खुत अन्तःखनने । टुव संकोचने । डुव संमार्जने । डल उल्लङ्घने । त्रुक भक्षणे । थ्यक श्लाघायाम् । नच्च नर्तने । नट कम्पे । नम नम्रीभावे । वुज़ जलादिव्यक्तीभावे । वुठ वेष्टने । वुप अन्तर्दाहे । इत्येषां भावे स्त्रियां विकल्पेन इझ् प्रत्ययो भवति ॥ सारिझ् । स्वारः ॥ खुतिझ् । अन्तः-खननम् ॥ टुविझ् । संकोचः ॥ डुविझ् । संमार्जना ॥ डलिझ् । प्रवणम् ॥ त्रुकिझ् । कणभक्षणम् ॥ थ्यकिझ् । श्लाघा ॥ नच्चिझ् । नर्तनम् नर्तकी च ॥ नटिझ् । कम्पः ॥ नमिझ् । नम्रता ॥ वुज़िझ् । जलादेराविर्भावः ॥ वुठिझ् । वेष्टनम् ॥ वुपिझ् । अन्तर्दाहः ॥ तत्र प्रसङ्गागतस्तद्धितोक्तः अल्प्रत्ययश्चेझन्त-भावादेव व्यवह्रियते नान्यत इति धीमद्भिरवधार्यम् । तद्यथा । थ्यकिझल् । श्लाघी ॥ नटिझल् । कम्पवान् । इत्यादि ॥

॥ लिवल्यवोश्च ॥ २८ ॥

लिव लेपने । ल्यव लेहने । इत्यनयोर्भावे स्त्रियां विकल्पेन इझ् प्रत्ययो भवति ॥ लिविझ् । लेपनम् ॥ ल्यविझ् । लेहनम् ॥

॥ लिवो वस्य पश्च ॥ २९ ॥

लिव लेपने । इत्यस्य वकारस्य पकारश्च भवति ॥ लिपिझ् । लेपनम् ॥

॥ करो लेपकायुधे ॥ ३० ॥

कर करणे । इत्यस्य लेपकायुधे गम्यमाने स्त्रियाम् इञ् प्रत्ययो भवति ॥ करिञ् । लेपकायुधः ॥ भावे करुन् इति पुंलिङ्गमेव भवति ॥

॥ वटः संग्रहे ॥ ३१ ॥

वट वेष्टने । इत्यस्य संग्रहार्थे स्त्रियाम् इञ् प्रत्ययो भवति ॥ वटिञ् । संग्रहः ॥

॥ फरश्चौरिण्याम् ॥ ३२ ॥

फर स्तेये । इत्यस्य चौरिण्या अर्थे स्त्रियाम् इञ् प्रत्ययो भवति ॥ फरिञ् । चौरिणी ॥

॥ च्वकतपलङ्गामिश् ॥ ३३ ॥

च्वक क्रोधे ऽम्लीभवने च । तप औष्ण्योपादाने । लङ्ग पङ्ग्वीभवने । इत्येषां भावे स्त्रियाम् इश् प्रत्ययो भवति । च्वकिश् । क्रोधः ॥ तपिश् । तापः ॥ लङ्गिश् । पङ्गुता ॥

॥ मिलवो ऽन्त्यस्य मश्च ॥ ३४ ॥

मिलव संयोजने इत्यस्य भावे इश् प्रत्ययो भवति । अन्त्याक्षरस्य च मकारो भवति ॥ मिलमिश् । संयोगः ॥

॥ कपटद्नननहावपिलफिरमाज़मिलवमुच़रमूर-ल्यववुठवुहामन् ॥ ३५ ॥

कपट कुन्तने । दून दूनव वस्त्रादिरजोपहरणे । नहाव क्रियाघाते । पिल

प्राप्तौ। फिर पुस्तकादिपरिवर्तने। माज़ तत्परतायां शोधने च। मिळव संयोजने। मुच्चर उद्घाटने। मूर त्वचो निष्कर्षे। ल्यव लेहने। वुठ वेष्टने। वुह अनिर्वाणे। इत्येषां भावे स्त्रियाम् अन् प्रत्ययो वा भवति ॥ कपटन्। कृन्तनम् ॥ दूनन्। [वस्त्रादेः] रजोपहरणार्थं कम्पनम् ॥ नहावन्। क्रियाघातः ॥ पिळन्। प्राप्तिः ॥ फिरन्। परिवर्त्तनम् ॥ माज़न्। शोधना। सा तु धान्यादिक एव व्यवह्रियते ॥ मिळवन्। संयोजना ॥ मुच्चरन्। उद्घाटनम् ॥ मूरन्। त्वङ्निष्कर्षणम् ॥ ल्यवन्। लेहः ॥ वुठन्। वेष्टनम् ॥ वुहन्। अनिर्वाणः ॥

॥ गिळवश्चेष्टार्थे ऽन्त्यलोपश्च ॥ ३६ ॥

गिळव भ्रामणे। इत्यस्य चेष्टाया अर्थे अन् प्रत्ययो भवति अन्त्याक्षरस्य च लोपो भवति ॥ गिळन्। चेष्टा ॥

॥ आंड्रखण्ड्रछ्वंट्रज़ीठ्रट्वंट्रपीठ्रफुट्रबंड्रबांग्रम्वंट्रवोव्रां च ॥ ३७ ॥

आंड्र मिश्रणे। खण्ड्र विभाजने। छ्वंट्र ह्रस्वीकरणे। ज़ीठ्र दीर्घीकरणे। ट्वंट्र वृत्तिसंकोचे। पीठ्र सशिक्षं प्रतिक्षेपणे। फुट्र भञ्जने। बंड्र वर्धने। बांग्र विभाजने। म्वंट्र घनीकरणे। वोव्र धातूनां तक्षणे। इत्येषां भावे अन् प्रत्ययो भवति ॥ आंड्रन्। मिश्रणम् ॥ खण्ड्रन्। खण्डना ॥ छ्वंट्रन्। संक्षेपता ॥ ज़ीठ्रन्। विस्तारः ॥ ट्वंट्रन्। वृत्तिसंकोचः ॥ पीठ्रन्। सशिक्षमुपालम्भः ॥ फुट्रन्। भञ्जनम् ॥ बंड्रन्। वर्धनम् ॥ बांग्रन्। विभागः ॥ म्वंट्रन्। घनता ॥ वोव्रन्। तक्षणम् ॥

॥ नव उपधाया वश्च ॥ ३८ ॥

नव नूनतायाम् । इत्यस्य अन् प्रत्ययो भवति उपधाया अकारस्य वकारश्च भवति ॥ न्वन्रन् । दोषोपचयनम् ॥

॥ तञ्जरतञ्चरस्यञ्जरां च क्वचित् ॥ ३९ ॥

तञ्जर विरलीकरणे । तञ्चर तापने । स्यञ्जर ऋज्वीकरणे । इत्येषां भावे क्वचित् अन् प्रत्ययो भवति ॥ तञ्जरन् । तनुता ॥ तञ्चरन् । तप्तता ॥ स्यञ्जरन् । ऋजुता ॥

॥ लारः कम्पे ॥ ४० ॥

लार स्पर्शानुगमनस्निग्धीकरणेषु । इत्यस्य कम्पार्थे अन् प्रत्ययो भवति ॥ लारन् । कम्पः ॥

॥ चिखिह्यां पुंस्येव ॥ ४१ ॥

चि पाने । खि खादने । हि धारणादिषु । इत्येषां भावे पुंसि अन् प्रत्ययो भवति ॥ च्यन् । पानम् ॥ ख्यन् । अशनम् ॥ ह्यन् । धारणम् ॥

॥ कडपासरश्रुकामञ् ॥ ४२ ॥

कड निष्कासने । पासर धिक्करणे । श्रुक क्रन्दने । इत्येषाम् अञ् प्रत्ययो भवति । तेषां तु नित्यं बहुत्वमेव ॥ कडञ । धिक्कारः ॥ पासरञ । धिक्कारः ॥ श्रुकञ । रोदनम् ॥

॥ चेनश्चावागमः ॥ ४३ ॥

चेन चेतने । इत्यस्य अञ् प्रत्ययो भवति अव् आगमश्च ॥ चेनवञ् । संज्ञापनम् ॥

॥ अर्ज़्बाववृपज़्श्रपस्यदगरघटशहलह्यकामत् ॥४४॥

अर्ज़ अर्जने । बाव अभिप्रायाविष्करणे । वृपज़ उत्पत्तौ । श्रप जीर्णने । स्यद सिद्ध्यामृज्वीभवने च । गर घट्टने । घट वेष्टने । शहल शीतीभवने । ह्यक शक्तौ । एषां भावे स्त्रियाम् अत् प्रत्ययो भवति ॥ वृपज़ो ऽन्त्यस्वरादिलोपश्चेष्यते ॥ घटः संग्रहे ॥ गरः पुंसि च ॥ अर्ज़थ् । अर्जनम् ॥ बावथ् । अभिप्रायाविष्करणम् ॥ वृपथ् । उत्पत्तिः ॥ श्रपथ् । अन्नादेर्जीर्णनम् ॥ स्यदथ् । सिद्धिः ॥ गरथ् । घट्टना ॥ घटथ् । संग्रहः ॥ शहलथ् । शीतलता ॥ ह्यकथ् । शक्तिः ॥

॥ पोठो ऽक् शक्तौ ॥ ४५ ॥

पोठ स्थूलीभवने । इत्यस्य धनादिशक्त्यर्थे अक् प्रत्ययो भवति ॥ पोठख् । [धनादिसंचयेन] शक्तिः ॥

॥ वखनखारज़ागवालनचक्खामनाम ऽय् ॥४६॥

वखन व्याख्याने । खार आरोहणे । जाग प्रतिजागरणे । वाल अवतारणे । नच्च नर्तने । हख शोषे । आमन वैवर्ण्ये । इत्येषां भावे स्त्रियाम् अय् प्रत्ययो भवति ॥ खारवालोर्निन्दार्थे तयोस्तु अन् आगमो वेष्यते ॥ वखनय् । व्याख्यानम् ॥ खारनय् वा खारय् । आरोहणम् ॥ जागय् । प्रतिजागरणम् ॥ वालनय् वा वालय् । अवतारणम् ॥ नच्चय् । नर्तनम् ॥ हखय् । शोषणम् ॥ आमनय् । वैवर्ण्यम् ॥

॥ मङ्गो दीर्घश्च ॥ ४७ ॥

मङ्ग याचने । इत्यस्य भावे अय् प्रत्ययो भवति पूर्ववर्णस्य च दीर्घः स्यात् ॥ माङ्गय् । याचञा ॥

॥ बाग्रो रलोपश्च ॥ ४८ ॥

स्पष्टम् ॥ बागय् । विभागः ॥

॥ जेन उपधाया इदाद्यन्तलोपो ऽपि प्रत्ययधात्वोः ॥४९॥

जेन जये । इत्यस्य अय् प्रत्ययो भवति उपधायाश्च इत्वं भवति प्रत्ययस्य आद्यक्षरस्य धातोश्चान्त्याक्षरस्यापि लोपो भवति ॥ जिय् । जयः ॥

॥ उदोपपदे साव उन्निद्रतायाम् ॥ ५० ॥

साव शायने । इत्यस्य उदशब्दे उपपदे सति उन्निद्रताया अर्थे अय् प्रत्ययो भवति ॥ उदसावय् । उन्निद्रता ॥

॥ केवलात्सुखार्थे ॥ ५१ ॥

साव शायने । इत्यस्मात्केवलात् सुखार्थे अय् प्रत्ययो भवति ॥ सावय् । सुखम् ॥

॥ होपपदे आमनो मिथ्याभियोगे ॥ ५२ ॥

आमन वैवर्ण्ये । इत्यस्य हशब्दे उपपदे सति मिथ्याभियोगार्थे अय् प्रत्ययो भवति ॥ हामनय् । मिथ्याभियोगः ॥

॥ लागो ऽनय् कृष्यर्थे ॥ ५३ ॥

स्पष्टम् ॥ लागनय् । कृषिः ॥

॥ बाग्रो रलोपश्च ॥ ५४ ॥

स्पष्टम् ॥ बागनय् । विभागः ॥

॥ सादो निमित्ते ॥ ५५ ॥

स्पष्टम् ॥ सादनय् । मुख्यहेतुः ॥

॥ छकछिकचमकट्कफूँकशेँकामिञो लोपः ॥५६॥

छक कीर्णने । छिक सेचने प्रमेहने च । चमक दीप्तौ । ट्क धावने । फूँक आघ्राणे । शेँक शङ्कायाम् । इत्येषां धातूनां भावे इञ् प्रत्ययस्य लोपो भवति ॥ छख् । कीर्णनम् ॥ छिख् । सिञ्चनम् ॥ चमख् । दीप्तिः ॥ ट्ख् । धावनम् ॥ फूँख् । आघ्राणम् ॥ शेँख् । शङ्का ॥

॥ ज़ागटाँगदगमङ्गलगलागवुङ्गश्वङ्गां गात् ॥५७॥

गकारान्तेषु धातुषु । ज़ाग प्रतिजागरे । टाँग घोरवाशिते । दग घातने । मङ्ग याचने । लग सङ्गे पीडायां संगतीभवने च । लाग अनुकरणादिषु । वुङ्ग श्वरवे । श्वङ्ग शयने । इत्येषां धातूनां भावे इञ् प्रत्ययस्य लोपो भवति ॥ ज़ाग् । अवेक्षा ॥ टाँग् । घोरवाशितम् ॥ दग् । घातः ॥ मङ्ग् । याच्ञा ॥ लग् । सङ्गः ॥ लाग् । नियमाल्लगनम् ॥ वुङ्ग् । श्वादिरवः ॥ श्वङ्ग् । निद्रा ॥ वुङ्गस्तु अकारान्तस्वरूपं मनुष्याणां चिन्तया रात्रिक्षेपे चेति ॥ [वुङ्ग] ॥

॥ पचरोचश्चोचां चात् ॥ ५८ ॥

अप्रसिद्धचकारान्तेषु । पच ऋणादिविश्वासे । रोच रोचने । श्चोच शुद्धौ । इत्येषां धातूनां भावे स्त्रियाम् इञ् प्रत्ययस्य लोपो भवति ॥ पछ् । विश्वासः ॥ रुछ् । रुचिः ॥ श्चोछ् । शौचः ।

॥ इछप्रिछोश्छात् ॥ ५९ ॥

इछ इच्छायाम् । प्रिछ पृच्छायाम् । अनयोरप्रसिद्धछकारान्तेषु इञ् प्रत्ययस्य लोपो भवति ॥ इछ् । इच्छा ॥ प्रिछ् । पृच्छनम् ॥ द्वितीयस्योदाहृतिर्यथा । प्रिछ् ष्यौव् । पृच्छनयोग्यः संपन्नः ॥ यथा च । प्रिछ्-गारु कंरुनस् । पृच्छनादिका रचिता तस्य ॥

॥ दून्छ्रो ऽन्त्यव्यञ्जनलोपः ॥ ६० ॥

दून्छ्र पृथक्पृथक्करणे । इत्यस्य भावे इञ् प्रत्ययस्य लोपो भवति अन्त्यव्यञ्जनस्य च लोपो भवति ॥ दून्छ् । पृथक्पृथक्करणम् ॥

॥ तछमन्दछरछां छात् ॥ ६१ ॥

प्रसिद्धछकारान्तेषु धातुषु । तछ तक्षणे । मन्दछ मन्दाक्षे । रछ रक्षायाम् । इत्येषां भावे इञ् प्रत्ययस्य लोपो भवति ॥ तछ् । कण्डूः ॥ मन्दछ् । लज्जा ॥ रछ् । रक्षा ॥

॥ तछ ऊमात्रागमो वा ॥ ६२ ॥

स्पष्टम् ॥ तछू । कण्डूः ॥

॥ रछो नित्यम् ॥ ६३ ॥

अस्य नित्यम् ऊमात्रागमः स्यात् न तु विकल्पेन ॥ रछू । रक्षा ॥

॥ ग्रज़ो ज़ात् ॥ ६४ ॥

ज़कारान्तेषु धातुषु । ग्रज़ गर्जने । इत्यस्य इञ् प्रत्ययलोपो भवति ॥ ग्रज़् । गर्जनम् ॥

॥ चूँटछ़टफुटां टात् ॥ ६५ ॥

चूँट अपानशब्दे । छ़ट उत्क्षेपणे । फुट भङ्गे । इत्येषाम् इञ् प्रत्ययलोपो भवति ॥ चूँठ् । पर्दनम् ॥ छ़ठ् । उत्क्षेपनम् ॥ फुठ् । बलिः ॥

॥ व्यठः प्रयोजने ॥ ६६ ॥

व्यठ तिक्तीभवने । इत्यस्य प्रयोजनार्थे इञ् प्रत्ययलोपो भवति ॥ व्यठ् । प्रयोजनम् ॥

॥ माँडवड्रोर्डात् ॥ ६७ ॥

माँड मिश्रीकरणे । वड्र निक्षेपे । इत्यनयोरिञ् प्रत्ययलोपो भवति ॥ माँड् । मिश्रणम् ॥ वड्रो ऽन्त्यव्यञ्जनलोप इष्यते ॥ वड् । उत्कोचः ॥

॥ छ़ाँड ऊमात्रागमो वा ॥ ६८ ॥

छ़ाँड अन्वेषणे । इत्यस्य ऊमात्रा आगमो वा स्यात् ॥ छ़ाँड् वा छ़ाँडू ॥ अन्वेषणम् ॥

[॥ छाडो नित्यम् ॥ ६८ क ॥

छाड अन्वेषणे । इत्यस्य धातोः स्त्रियां भावे इञ् प्रत्ययलोप ऊमात्रागमश्च नित्यं भवति ॥ छाडू । अन्वेषणम् ॥]

॥ न्यतलतोस्तात् ॥ ६९ ॥

न्यत पशुरोमकृन्तने । लतव लत्ताघाते । इत्यनयोः इञ् प्रत्ययलोपः स्यात् । लतवो वकारस्य च लोप इष्यते ॥ न्यथ् । पशुरोमकृन्तनम् ॥ लथ् । लत्ताघातः ॥

॥ पदप्यदप्वन्दां दात् ॥ ७० ॥

पद कुत्सिते शब्दे । प्यद वृत्तज्ञतायाम् । प्वन्द क्षुते । एषां भावे इञ् प्रत्ययस्य लोपः स्यात् ॥ पद् । पर्दनम् ॥ प्यद् । वृत्तज्ञता ॥ प्वन्द् । क्षुतम् ॥

॥ आमनज़ानोर्नात् ॥ ७१ ॥

आमन वैवर्ण्ये । ज़ान अवबोधने । इत्यनयोर्भावे इञ् प्रत्ययस्य लोपो भवति ॥ आमन् । आमता ॥ ज़ान् । ज्ञानम् ॥

॥ छानदोनोरूदागमश्च ॥ ७२ ॥

छान उत्पवने शातने च । दोन पिचुवद्विवरणे । अनयोः इञ् प्रत्ययस्य लोप ऊमात्रागमश्च भवति ॥ छांञू । उत्पवनम् ॥ दूञू । पृथक्पृथक्करणम् ॥

॥ चापः पात् ॥ ७३ ॥

चाप अदने । इत्यस्य इञो लोपो भवति ॥ चाफ् । अदनम् ॥

॥ वुफः फात् ॥ ७४ ॥

वुफ विहायसा गतौ । इत्यस्येञो लोपो भवति ॥ वुफ् । उड्डीतिः ॥

॥ लेखो ऽन्त्यस्य च फः ॥ ७५ ॥

लेख लेखने । इत्यस्य इञ् प्रत्ययलोपो भवति अन्त्यस्य खकारस्य च फकारः ॥ लेफ् । लिपिः ॥ शास्त्रदर्शिनां मते एवायं प्रयोगः ॥

॥ रम्बशूबोर्बात् ॥ ७६ ॥

रम्ब शोभायाम् । शूब शोभायाम् । बान्तेष्वनयोः इञ् प्रत्ययस्य लोपो भवति ॥ रम्ब् । शोभा ॥ शूब् । शोभा ॥

॥ प्रयो यात् ॥ ७७ ॥

प्रय प्रीणने । इत्यस्येञो लोपो भवति ॥ प्रय् । प्रीतिः ॥

॥ आवरडंख्रतूरथाँथरदोरमूरलारसखरां रात् ॥ ७८ ॥

रकारान्तेषु । आवर व्यापने आवरणे च । डंख्र आधारीकरणे । तूर शीतलीभवने । थाँथर त्वरायाम् । दोर गतिचातुर्ये । मूर त्वचो निष्कर्षे भक्षणे च । लार स्पर्शानुगमनास्निग्धीकरणेषु । सखर प्रस्थाने । इत्येषां भावे इञ् प्रत्ययस्य लोपो भवति ॥ [आवरडंख्रतूरामूमात्रागमश्च बोध्यः ॥] आवरू । आवृतिः ॥ डंख्रू । आधारः ॥ तूरू । शीतम् ॥ थाँथर् । [सभयं]

त्वरा ॥ दोर् । धावनम् ॥ मूर् । निष्कर्षणम् ॥ लार् । पलायनम् ॥ सम्बूर् । प्रस्थानम् ॥ [मूरो ऽनूच । मूरन् ॥]

॥ थारबाँबरसारहन्द्रामूदागमश्च ॥ ७९ ॥

थार त्वरायाम् । बाँबर त्वरायाम् । सार स्वारैकत्रीभवनक्रमानयनेषु । हन्द्र शीतीभवने । एषां भावे इञ् प्रत्ययस्य लोपो भवति ऊमात्वागमश्च स्यात् ॥ थारू । [सभयं] त्वरा ॥ बाँबरू । त्वरा ॥ सारू । स्वारः ॥ हन्द्रू । शीतम् ॥

॥ गाँगलटालतम्बलम्वकलवूललशहलां लात् ॥८०॥

गाँगल ग्राँगल परैश्वाश्चल्ये । टाल उपेक्षागमने । तम्बल चाञ्चल्ये । म्वकल मुक्तौ । वूलल अलंकरणे । शहल शीतीभवने । लकारान्तेषु एषां धातूनां भावे इञ् प्रत्ययस्य लोपो भवति ॥ गाँगल् वा ग्राँगल् । चञ्चलता ॥ टाल् । उपेक्षागमनम् ॥ तम्बल् । चाञ्चल्यम् ॥ म्वकल् । मुक्तिः ॥ वूलल् । वेशः ॥ शहल् । शीतलता ॥

॥ दवो वात् ॥ ८१ ॥

दव शीघ्रगतौ । इत्यस्य भावे इञ् प्रत्ययस्य लोपो भवति ॥ दव् । शीघ्रगतिः ॥

॥ वेतनार्थे धातोर्वञ् ॥ ८२ ॥

क्रियाया वेतने गम्यमाने सति धातोर्भावे स्त्रियां वञ् प्रत्ययो भवति ॥ करवञ् । कर्मवेतनम् ॥ परवञ् । पाठवेतनम् ॥ लोनवञ् । लवनवेतनम् ॥ रोजवञ् । स्थितिवेतनम् ॥

॥ व्यञ्जनान्ताद्कारागमः ॥ ८३ ॥

व्यञ्जनान्ताद्धातोरकारागमो भवति उदाहरणानि पूर्वसूत्रे (८२) उक्तानि ॥

॥ स्वरान्ताद्वः ॥ ८४ ॥

स्वरान्ताद्धातोः वकारागमो भवति ॥ दिववञ् । दानवेतनम् ॥ निववञ् । हरणवेतनम् ॥ ख्यववञ् । भुक्तिवेतनम् ॥ च्यववञ् । पानवेतनम् ॥

॥ छानद्वसिल्भ्यां वय् ॥ ८५ ॥

छानशब्द-द्वसिल्शब्दाभ्यां तयोर्वेतने गम्यमाने वय् प्रत्ययो भवति ॥ छानवय् । तक्षवेतनम् ॥ द्वसिल्वय् । लेपकवेतनम् ॥

॥ नावो वलोपश्च ॥ ८६ ॥

नाव् शब्दात्तद्वेतने अभिधेये वय् प्रत्ययो भवति वकारस्य च लोपो भवति ॥ नावय् । आतरः ॥

॥ बार उपधाऽप्रसिद्धता ॥ ८७ ॥

बार्शब्दात्तद्वेतने वाच्ये वय् प्रत्ययो भवति उपधायाश्चाप्रसिद्धता । तदप्रसिद्धत्वे सिद्धे । व्यञ्जनान्तात् (सू० ८३) इत्यादिसूत्रेणोक्ताकारागमस्य च ऊमात्रादेशो ऽवगन्तव्यः ॥ बारूवय् । भारवेतनम् ॥

॥ क्रेयाद्गरु शिल्प्यर्थे ॥ ८८ ॥

[स्त्रियामिति निवृत्तम्] शिल्पिनः अर्थे तस्य [वि]क्रेयाद्वस्तुनः गरु

प्रत्ययो भवति ॥ लायगंरु । लाजाविक्रेता ॥ गंडन्गंरु । पुस्तकसंदर्भी ॥ कङ्कञ्गंरु । कङ्कतिकाविक्रेता ॥ मण्डन्गंरु । और्णमर्दकः ॥ एवमन्येषां रूढपदव्यतिरिक्तानां पदानां बोध्यम् । यथा स्वनर् इति स्वर्णकारस्य रूढिः तस्य स्वनगंरु इति न भवति ॥

॥ दाञ् आदेर्डः ॥ ८९ ॥

दाञ्शब्दात् क्रेयाद्वस्तुनः शिल्प्यर्थे गंरु प्रत्ययो भवति । आद्यक्षरस्य दकारस्य डकारो भवति । उत्तरपदे परे तु ञकारस्यानुस्वारः पूर्वं (सू० ३ । ८) सिद्ध एव ॥ डाँगंरु । धान्यविक्रेता ॥

॥ योग्यार्थे लगो हार् ॥ ९० ॥

लग सङ्गे पीडायां च। इत्यस्मात् हार् प्रत्ययो भवति योग्यार्थे ॥ लगहार्। योग्यः ॥

॥ धातोस्तद्योग्यार्थे ऽनागमश्च ॥ ९१ ॥

तस्य धातोः क्रियाया योग्यत्वे अभिधेये सति हार् प्रत्ययो भवति अनागमश्च स्यात् ॥ करनहार् । करणयोग्यः ॥ गण्डनहार् । ग्रन्थनयोग्यः ॥

॥ स्वरादागमः स्वरवृद्धः ॥ ९२ ॥

स्वरान्ताद्धातोः अन् आगमः स्वरवृद्धः स्वरेण अकारेण वृद्धः भवति अर्थात् अन आगमो भवति ॥ खयनहार् । खादनयोग्यः ॥ च्यनहार् । पानयोग्यः ॥ ह्वनहार् । धारणयोग्यः ॥ तत्र न्यादिभ्यस्त्रिभ्य आगमादिवर्णलोप इष्यते ॥ निनहार् । हरणयोग्यः ॥ यिनहार् । आगमनयोग्यः ॥ दिनहार् । दानयोग्यः ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते कृदन्तप्रक्रियायां भावपादो द्वितीयः ॥९।२॥ कृदन्तप्रक्रिया समाप्ता ॥ ९ ॥

समाप्तं चेदं कश्मीरशब्दामृतं नाम व्याकरणम् ॥

निष्प्रत्यूहनिरर्गलत्वविधये योगं जुषद्भ्यामिव
संप्रीत्या विषये[1] ऽत्र पण्डितपटुः प्रोद्भावितो ऽहं पुरा ।
तत्पादाभ्युपपत्तितः खलु सरस्वत्या[2] गणेशेन[3] च
ग्रन्थं नूतनमेव पूर्तिमनयं सच्छाब्धिकोल्लासनम् ॥ १ ॥
वेदव्याकरणे किल त्रिनयनाभ्यस्ते च सारस्वत
ऐन्द्रे सादर ऐन्दवे सुमनसां यो बाहुलेये ऽपि च ।
प्रीत्या ईश्वरकौल ईशनिरतः कश्मीरशब्दामृतं
सद्वर्षे सुतिथौ शुभोडुनि शुभे घस्रे च मासे व्यधात् ॥ २ ॥
दोषाच्छादनकृन्मर्त्यः किल देवप्रियो भवेत् ।
स देवानां प्रियो यस्तु दोषाच्छादनकृद्भवेत् ॥ ३ ॥

इति श्रीकश्मीरमण्डलान्तर्मध्यनगरवार्तिसिद्धलक्ष्म्युपचितप्राशस्त्यवितस्ताकमलाप्लावितब्रीडामठप्रदेशनिवासिनेश्वरकौलेनैषा शारदाक्षत्रभाषाव्याकृतिः कश्मीरशब्दामृताख्या यथामति विस्तरतां नीता ॥ शुभाय भवतु वाचकश्रोतृपाठकानामोम् ॥

भद्रं पश्येम प्रचरेम भद्रम् । समाप्तं चेदं साङ्गं शब्दशास्त्रम् ।

---

(१) [1] विषये देशे च [2] सरस्वत्या देवतया तन्नाम्नया मात्रा च ।
[3] गणेशेन देवेन तन्नाम्ना पित्रा च ॥

(२) वेदेति इदं पद्यं ग्रन्थारम्भ एव व्याख्याय प्रकाशितम् ॥

[३ । दोषेति दोषाणामाच्छादनं गोपनं शोधनं च करोतीति दोषाच्छादनकृत् तादृशो मर्त्यो देवप्रियो देवस्य प्रकाशात्मनो ज्योतिःस्वरूपस्येश्वरस्य प्रियो भवति ईश्वरस्तं प्रति प्रसन्नो भवतीत्यर्थः । यस्तु दोषाच्छादनकृत् दोषाणामाच्छादनं वस्त्रतुल्यं कृन्तति छेदयतीति स देवानां प्रियो (देवानां प्रिय इति च मूर्खे पा० सू० ६। ३। २१ स्थवार्तिकोक्तया) मूर्खः पापी च भवतीत्यर्थः ॥]

अथाकारादिवर्णान्तक्रमेण धातुपाठसूची ।

खि . चि . जि . दि . नि . पि . यि . हि ॥

खिस्क . ग्रक . चमक . चूक . छक . छिक . [छ्वक] . टक . टुक . टक . ठाक . ठीक . ठुक . डक . ढ्वक . त्रुक . थक . थ्यक . थ्वक . द्वक . निक . पक . फक . फुक . फूँक . फ्रक . बक . ब्रक . लोक . वृक . शेंक . श्वक . सुक . ह्यक ॥

जख . लख . लिख . लेख . समख . हख ॥

ऋयङ्ग . जाग . टाँग . ठग . तग . तङ्ग . दग . द्वग . फाँग . बूग . मङ्ग . रङ्ग . लग . लङ्ग . लाग . वुङ्ग . वलङ्ग . श्वङ्ग . स्वग . स्वग . हग ॥

खरच . बच ॥

अच . कच . खोच . ग्वच . चर्च . चूच . छूच . तच . नच . पच . फिच . मर्च . म्वच . रोच . ल्यच . वाँच . व्यच . वुच . श्रोच . हच ॥

काँछ . तछ . वुछ . बेछ . मन्दछ . मुछ . रछ . वुछ . ह्यछ ॥

अछ . इछ . गछ . प्रिछ . ब्रिछ ॥

माँज ॥

अर्ज़ . कन्ज़ . खुन्ज़ . ग्रज़ . तेज़ . दज़ . न्यवाज़ . पज़ . पलज़ . पाज़ . पूज़ . प्रिन्ज़ . बज़ . बावज़ . बुज़ . बोज़ . ब्रज़ . माज़ . रन्ज़ . रोज़ . लज़ . वज़ . वुज़ . व्वपज़ . सपज़ . सोज़ ॥

कपट . काँट . कुट . क्रट . खट . गुरट . ग्यमट . चट . चूँट . चेट . छट . छाँट . छ्यट . छुट . ट्वट . डाँट . नट . पट . पलट . पिट . पीट . प्रैख्ट . प्राट . फट . फुट . म्यट . रट . रोट . लूट . वट . वाट . व्वट . हट ॥

काठ . कुठ . क्रेठ . चमठ . जठ . ट्यठ . टोठ . द्रेठ . नाँठ . पठ . पोठ . ब्रेठ . मेठ . व्यठ . वुठ . शिठ . श्रिठ . हाँठ ॥

अड . कड . गण्ड . छण्ड . छाड . छाँड . ताड . पेड . बड . बुड . व्वड . मण्ड . माँड . म्वण्ड . रुड . लड . ल्यड . वुड . सड . ह्वड ॥

तूरण . प्राण . प्रिण . रूण . वुष्ण ॥

कत . खुत . छत . ज़ोत . तत . न्यत . मत . रत . ल्वत . वात . व्वन्नत . श्रुत . स्वत . सत ॥

पाथ . मथ . व्वथ ॥

अन्द . आरद . गुन्द . गिन्द . तुन्द . थद . पद . प्यद . प्वन्द . बाद . ब्राद . मन्द . लद . वद . वन्द . व्यन्द . वुद . सपद . साद . स्यद ॥

श्वद्ध ॥

अन . आछ्न . आन . आमन . कान . कुहन . कून . क्यन्न . खन . गन . गुमन . चान . चेन . छन . छान . छाँछ्न . छ्यन्न . छुन . छ्वन्न . ज़ान . ज़ेन . दमन . तन . तीलन . दोन . दून . नन . पछान . पर्ज़न . पाकन . पिलन . पुचन . पुन . प्रज़न . प्रन . फान . बन . बसन . बाखन . ब्यन्न . मान . मुन . मेन . रन . लहन . ल्वन . लोन . लूहन . वखन . वन .

व्यछन . व्यगन . वुन . वोन . शिगन . सन . सपन . स्यन्न . हान . हामन . हान . हन ॥

कांप . कुप . कुप . खप . गुप . ज्ञाप . छप . ज़प . टप . व्यप . तप . त्रप . थिप . दप . नप . नाँप . पप . पप्प . याप . व्यप . वुप . श्रप . हप ॥

वुफ ॥

कब . ग्वब . चुम्ब . छुम्ब . व्यम्ब . डुब . त्यम्ब . त्वम्ब . त्रुम्ब . [निब.] फब . रम्ब . लब . लूब . शूब ॥

खम . गर्म . चम . चुम . थम . दम . नम . ब्रम . लम . वाम . वुम . शम . सम . हम . हुम ॥

काय . द्वय . दूय . पय . प्रय . विय . लय . लाय . लूय . वय . वाय . वुय ॥

अंदूर . अन्जूर . अंबूर . अलर . आंज़ूर . आँटूर . आंडूर . आपर . आवर . ईर . कतर . कंन्ज़ूर . कर . कहर . काचर . कायर . कार . काबूर . कूर . कूंर . खंण्डूर . खर . खार . खुखर . खोर . गंन्ज़ूर . गर . गार . ग्रांशूर . गीर . गेर . गोर . गोवर . चर . चर . चार . चार . चयंतूर . चीज़र . चीर . चुकूर . चूर . चोंखर . छंकूर . छर . छूर . छयंटूर . छिन्दूर . छयंबूर . छुंजूर . छुंटूर . छुंपूर . छेर . छोर . जर . ज़र . ज़िङ्गूर . ज़ीदूर . ज़्वङ्गूर . ज़्वज़र . ज़ुबूर . ज़ूर . ज़ोवर . ज़ूर . ठहर . डंखूर . डर . तंचूर . तंझूर . तर . तार . तीज़ूर . तूंर . तोवर . त्रकूर . त्रुंपूर . त्रोर . थंज़ूर . थर . थाँथर . थार . थुर . दर . दर्र . दांझूर . दार . द्वदर . द्वंबूर . दून्छूर . दूर . दोर . नंझूर . नांशूर . निकूर . न्वंमूर . न्वंबूर . नेर .

नोमूर . पंजूर . पंजूर . पंदूर . पर . पार . पांसूर . प्यतर . पीटूर . पीर . पुशूर . पूठूर . पूर . पैर . पोर . प्रार . फर . फंसूर . फहर . फांसूर . फिर . फुकार . फुटूर . फेर . फोर . फ्यार . बगार . बंदूर . बंन्जूर . बर . बंलूर . बहर . बांगूर . बांजूर . बाँबर . बिगर . ब्यंसूर . ब्रमूर . मठार . मंन्जूर . मर . मर . मंषूर . महार . मार . मुचर . म्वंटूर . म्वंण्डूर . म्वंदूर . मुसर . मूंन्छूर . मूँत्र . मूर . मोर . यंतूर . यार . येर . रंछूर . रावर . लतार . लार . ल्यंदूर . लूर . लोर . वंदूर . वथर . वर . वहार . वार . विचार . व्यंजूर . व्यंझूर . व्यंठूर . व्यंदूर . व्यंपूर . व्यलर . व्यंबूर . व्यसर . वुकूर . वुखर . वुथर . वुदर . वुफर . वुबर . वुर . वुसर . वोर . वोवूर . शूबूर . शेर . सखर । संझूर . संन्जूर . सन्दर . सन्दार . सर . साँगर . सार . स्यंजूर . स्यंन्दूर . सीर . स्वंम्बूर . स्वर . स्वसर . सोर . हकर . हंटूर . हंन्दूर . हर . हहर . हार . हंखूर . हंबूर . हंमूर . होर . हूर ॥

अल . अहल . कल . कुमल . कोल . खल . खोल . गल . गाँल . गाल . गेल . ग्राँगल . चल . चाल . च्यखल . च्यल्ल . छल . छुल . छुकल . जल . जाल . जूल . टल . टाल . डल . डाल . ड्यल . डुल . डोल . तम्बल . तल . ताल . तुल . तेल . तोल . थल . दल . न्यङ्गल . नील . पल . पाल . पिल . पिशल . पुल . प्रजल . फल . फाँफल . फुल्ल . बल . बोल . ममल . मल . म्वकल . मेल . लुल . वल . वाल . विगल . वुजल . वुतल . वुलल . वुशल . वोल . शहल . संबाल . हल . हाँकल . हिल . हूल ॥

अंदूराव . अंन्जूराव . अवसाव . अंबूराव . अर्पाव . अलराव . आंडूराव . आपराव . आयव . आरव . आलव . आवराव . कंन्जूराव . कपटाव . कमनाव . कमव . कोंकव . कूचव . क्राव . खंण्डूराव . खुललाव . गंन्जूराव .

गिलव . ग्यव. गुजराव. गुलव. ग्रांशराव . घताव. चाव . चीज़राव . चुकाव. चुकराव. चुगनाव. चुंमराव. चुव. छंकराव. छंचराव. छाव. छुर्यंट्राव. छिव. छिवराव . छुयव . छुर्यंवराव . छुकव . छुंजराव . छुंदराव . छुंराव . जीठराव . जुव . जुवराव . जोवराव . जरव . टुव . टुकव . ठगाव . डखव . डंखराव . डुलनाव . डुलव , डुव . तंचराव . तंजराव . तव . ताव . तीजराव . तोवराव. त्रकराव. त्रंगनाव. त्रंचराव. त्रंसराव. त्राव. त्रुम्बव. त्रुंशराव. थंजराव . थव . थाव. दंदराव. दवव. दव. दांजराव. दाव. दुगव. दुगनाव. दुदराव . दुंबराव. दूनछराव . दनव . दुंगराव . दषराव . नंजराव . नंदराव . नव . नहाव . नाव . नांशराव . निकराव . न्वंमराव . न्वंवराव . नेछव . नोमराव . न्याव . पछताव . पंजगाव . पंजराव . पटाव . पंढराव . पखांव . पर्जनाव . पाकव . पाव . पांसराव . पिटराव . पिलनाव . प्यव . पीढराव . पीनव . पुशराव . पूढराव . पोरव . प्रजनाव . प्राव . फर्कांव . फालव . फांसराव . फ्यचव . फिरव . फुटराव . बंचराव . बडाव . बंढराव . बंदराव . बंनजराव बंरकाव . बंलराव . बांगराव . बांजराव . बाव . ब्यंजराव . बुव . ब्रंमराव . मंचराव . मनव . मंनजराव . मर्दांव . मंषराव . मांजराव . मिलनाव . मिलव . मुचराव . म्वंदराव . म्वंण्डराव . म्वंदराव . म्वलव . मुसराव . मूनछराव . मूँत्राव . मोरव . यंतराव . रंछराव . रन्जनाव . रन्जव . राव . रावराव . रिन्जव . रिव . रुव . रुकव . लटाव . लडाव . लतव . ललव . लिथव . ल्यंदराव . लिव . ल्यव . लूकराव . वजव . वंढराव . वथराव . वनव . वव . वहाराव . व्यंजराव . व्यंजराव . व्यंठराव . व्यंदराव . व्यंपराव . व्यव . व्यंवराव . वुकराव . वुखराव . वुगराव . वुडाव . वुथराव . वुसराव . वुहव . वोवराव . शग्राव . शूरराव . सगनाव . सगव . संजराव . सताव .

सन्दराव . साव . स्यंज़्राव . स्यंज़्राव . सिव . स्वखनाव . स्वखव . स्वंग्राव . स्वंचूराव . सुरव . सुलव . सुव . स्रव . स्वंग्राव . हंट्राव . हंन्द्राव . हाँट्राव . हाव . हंख्राव . हंचूराव . हंब्राव . हंम्राव . हसनाव . हसव ॥

कश . क्रेश . वृश . नश . पश . फ्यश . फुश . (फ्रुश) फेश . ब्रश . शाश . स्वर्श ॥

डेष . तोष . द्वष . पोष . बाष . मष . मुष . रोष . वष . शष ॥

अवस . अस . आवस . आस . कस . कास . खस . खूस . चस . ज़्वस . दस . ठास . डस . त्रस . दस . पिस . प्रस . फस . बस . बास . मुस . रस . रूस . लस . लिस . लोस . वस . विस . वृवस . वृलस . वृस . सूस ॥

कुह . खह . ग्वह . गूह . चूह . पिह . फह . ब्यह . मुह . लूह . वुह . सूह ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
अकारादिवर्णान्तक्रमेण धातुपाठ-
सूचीपत्रं समाप्तम् ॥

अथाकारादिक्रमेण सूत्रसूची ।

अकार इकारे ए १ । ६

अकारलोपोपधाह्रस्वौ चोनृञोः २ । ३ । ३७

अकारव्यञ्जनान्तानां पुंस्येकवचने वा ऽन ऽसर्वनाम्नाम् २ । १ । ५८

अकारान्तानां प्रथमैकबहुत्वे लिङ्गवत् २ । १ । १

[अकारे ऽकारलोपः १ । ५ क ।]

अख्नोरयोराहागमो निश्चयसामान्ये २ । ३ । ३८

अङ्गीकारे संबोधनमुख्यप्रत्यया आहनशब्दात्परा उक्त्युपक्रमे २ । २ । २६

अत्र आदेर्लोपश्च ८ । ३ । ५७

अत्रप्रसोराकारः ८ । ३ । ५२

अंछिशब्दादुर्दृष्टाविट् ४ । ३६

अडल्यंकुशब्दो विकलार्थे ४ । २६१

अतीते इथ् ९ । १ । ५

अधिकरणे क्यथन्तौ २ । १ । ५३

अधीनार्थे बुञ्य् ४ । १६०

अनः पूर्वमावा ८ । ४ । ११

अनादरापत्यार्थे ऽधमशब्देभ्यः कद् ४ । ५

अनादरार्थे क्लय् ६ । ३

अनादेशकर्तृधातुभूतादौ नो आदेशाः ८ । ३ । ६८

अनारब्धा क्रिया भविष्यत्कालः ८ । २ । १

अनि च ९ । १ । १८

अनु वा ९ । २ । ३

अनेककार्यवित्कर्तृसत्तायां तत्तत्क्रिया धातुभ्यश्च ८ । १ । १०

अनेकपदेषु वाक्यारम्भपदात् ९ । १ । ४८

अन्ते सा प्रत्ययश्च २ । २ । ३

अन्त्यस्य वाप्तीः २ । ३ । ६

अन्द्रान्तौ निर्धारणे च २ । १ । ५७

अन्यतो ऽपि च ४ । १२८

अन्यतो ऽपि च ४ । १४३

अन्यतो ऽपि पशुजातेः ६ । २१

अन्यत्रापि च बलिदानस्थाने ४।१७२
अन्यप्राधान्ये सहार्थे सूत्य् ४।१८४
अन्येनापि क्वचित् ८।१।३२
अन्येभ्य ड् केवलश्च ४।१५५
अपरा अय्परा वा स्त्रियां मध्यमे ८।१।१६
अपराः प्रत्ययाः संप्रश्ने ८।२।३०
अपिशब्दार्थे ति ४।१७९
अप्रथमान्ते पूर्वपदे विभिन्नविभक्तिकयोः पदयोर्युगपत्कथनं तत्पुरुषः ३।५
अप्रसिद्धत्रवर्गादकारः ८।३।१२
अप्रसिद्धत्रवर्गादा ८।३।३७
अप्रसिद्धत्रवर्गादायः ८।३।१७
अप्रसिद्धत्रवर्गाल्लोपः ८।३।४७
अप्रसिद्धादिलोपः ४।५१
अप्राणिना पुंसोकुक्यौ पुंसि २।१।४८
अप्राणिनि स्प्रत्ययलोपस्तकारादेशश्च २।३।७
अप्राणिभ्यः स्थाने ३ प्रत्ययश्च ४।१३२
अभ्रधूमवातमात्रायां रिंग् ४।१६२
अयागमः स्वरे २।३।३३
अर्जवावव्वपजश्रपस्यदगरवटशहलह्यकामत् ९।२।४४
अ वा २।२।१९
अश्रोतृश्रोतृवक्तृभेदात्प्रथममध्यमोत्तमाः ८।१।३
अष्टसंख्यावधि शतार्थे हत् ४।११५
असवर्णे ऽकारस्य लोपः १।४
असेराद्यन्तस्वरयोर्लोपाकारावुत्तोः २।३।१९
अः प्रत्यर्थे लिङ्गात्पूर्वः प्रथ् च ४।१४६
आक्षेपे ऽपि नय् पराः ८।२।३४
आंड्रखण्ड्रछ्वट्रजीदरट्वट्रपीदरफुट्रबेट्रबांगरम्वेट्रवोव्रां च ९।२।३७
आदुपधाया अप्रसिद्धता ९।१।१३
आद्यखण्डवीप्सापूर्वाः प्रथमे वा ४।१८९
आनादयो ऽव्ययम्, ९।१।१६
आपरो वा ८।१।२८
आ प्रत्ययः कनिष्ठनीचयोः २।२।७
आभीक्ष्ण्ये द्विश्च पदम् ९।१।४
आमनज्ञानोर्नात् ९।२।७१
आमन्त्रणे २।२।१
आरब्धानारब्धसमापितक्रियाकाला

वर्तमानभविष्यद्भूतसंज्ञाः ८।१।२
आवरङ्खरतूरथाँगरदोरमूरक्लारस-
खरां रात् ९ । २ । ७८
आव्यनागमः ८ । ४ । ३
आशिषि यन् यन् यख् इव् प्रत्ययाः
८ । २ । २६
आसखसफसवसलसलोसवसां सात्
८ । ३ । ९६
आसन्नदूराभ्यां विधिर्द्विविधः ८ ।
२ । ३
आसो लोपो धातोश्च ८ । १ । २१
इकारस्य यत् ८ । ३ । ११
इकारान्तादेकत्वे ऽपि ८ । ३ । ६
इकारान्ताद्वपूर्वः ८ । १ । २०
इकारान्ताद्वा ८ । ४ । १०
इकारे लोपः २ । १ । ७५
इकारो ऽसवर्णे यो ऽपरलोपः १।१०
इछ्रमिछ्रोश्छात् ९ । २ । ५९
इतो लोपः २ । १ । ६
इथः क्यथ् वा ९ । १ । ६
इदुदूदन्तानामवर्णाप्रसिद्धता २ ।
१ । ७०
इदुदूद्युतानां पूर्ववर्णस्वरप्रसिद्धता
८ । ३ । १९
इ प्रत्यय आभीक्ष्ण्ये द्विश्च पदम् ९।
१ । ११
इ प्रत्ययस्याकारो व्यञ्जने २।१।४
इवार्थे ज्ञन् ४ । १८१
इहबोँदशब्दाभ्यां वर्षार्थे उस् ४ ।
१५०
इहहहोर्वुञ्वञ्चादेशौ ४ । १३९
उकार ओ । १ । ७
उकारोपधायाः स्त्रियां वत्वमप्राणि-
नि च २ । ३ । ३
उकारो वः १ । ११
उकु प्रत्ययस्योकारस्याकारः२।१।६४
उत्तमैकत्वे पुंस्त्रियोः क्रमात् ८।१।१७
उत्तरपदस्थस्य पोञ्जुशब्दस्य णो वः
३ । ६
उदन्तत्र्यक्षराणामुकारस्याकारः २।
१ । ७३
उदन्तान्नमोदुपधाया आत्वमप्रथमै-
कत्वे २ । १ । ६९
उदन्तानां लिङ्गवदेकत्वमेव २ । १ ।८
उदोपपदे साव उन्निद्रतायाम् ९। २।
५०
उद्युतस्योपधाया आत ओत्वम ८ ।
३ । २०

उनु वा ९ । १ । २२
उन्वन्तं लिङ्गवत् ९ । १ । २३
उपमाने थु ४ । १२६
उभयेषां तम्यम्कम्इम्हुमो द्वितीयाद्येकवचनेषु २ । ३ । ५
उलु २ । ५ । ७२
उलन्ताभ्यां राहुह्भ्यामिः ४। १४१
उवर्णान्तानामिकारः २ । १ । ३०
ऽ वा ४ । २९
ऊकारादौकारस्य वत्वम् २।१। २०
ऊदन्तटवर्गस्य चवर्गः प्रथमाबहुत्वादिषु २ । १ । २२
ऊदन्तानां पुंसि २ । १ । २
ऊदिचोरकारागमः स्त्रियां सकारे २ । १ । २१
ऊदोकारस्य ९ । १ । १५
एकत्वनिर्दिष्टपरिमाणादिशब्दात्खण्डा च २ । ३ । ४५
एकत्वे ऊमात्रादेशः ८ । ३ । ८
एकपदे भावतः परा वा ९ । १ । ४७
एकानेकाभ्यां द्वे द्वे वचने ८।१। ४२
एकार ऐ १ । ८
एत ईत् ९ । १ । १४
एभ्य एव संबन्धप्रत्ययाश्च ९।१।४६
एयश्च पुंसि ८ । ३ । १८
ऐठादिभ्यो ऽमरागमश्च २। ३। ४४
ओकारस्योकारः सादेशपुंकर्तरि च ८। ३ । २४
ओदतौ वत्वाप्रसिद्धत्वे ८। ३। ४३
ओदेदुपधाया ऊदीतौ ८ । २ । ७
ओर्तृप्रत्ययौ वान्त्यलोपश्च ४। १३६
ओवावादयः सामान्यपूर्णयोः ८।३। ७८
औकार औ १ । ९
औ प्रत्ययः प्रियकनिष्ठयोः २।२।१७
कंगो ऽल्पार्थे राकारश्च ६ । १२
कडपांसूरश्रुकामञ् ९ । २ । ४२
कथादीनां च २ । १ । २५
कपटदननहावपिलाफिरमाजमिलवमुचरमूरल्यवबुठबुहामन् ९।२।३५
करो लेपकायुधे ९ । २ । ३०
कर्तरि वुनु ९ । १ । २५
कर्तुः परौ वा ८ । २ । ३५
कर्तृतृतीयायामिदौतौ २ । १ । ५६
कर्तृधातूनामाख्यातभूतक्रियैव नित्यम् ९ । १ । ३९
कर्तृयुक्तायाः कर्तुरन्ते च २। २। ३१
कर्मणि पुंबहुत्वे इराद्यस्वरस्य ८।३।४

कर्मण्यन् ८ । १ । ३४
कर्मण्यस् भूते ८ । १ । ४३
कर्मयुक्तायाः कर्मान्ते २ । २ । ३०
कर्मोपपदे पुंस्यऽश्लीले ९। १। ३३
कवर्गस्यैकत्वे ऽपि ८ । ३ । ७१
कवर्गान्तानां चवर्गः ६ । ९
कवर्गान्तातां चवर्गादेशः क्रमात् ४। ४७
कशीर्देशभवे उरु अन्त्यस्वरादिलोपोपधादीर्घौ च ४। ११८
काँछ्राह्कँछ्राह्शब्दावेकत्वे २।३।३१
कामप्रवेदने आपराः ८ । १ । १४
काम्पक्रुपच्चापज्जपटपां पात् ९।२।१५
कालत्रयतद्विशेषक्रियाकर्मकर्त्रवबोधकृदाख्यातः ८।१।१
कालार्थे कालवाचिभ्यः ४। १५४
काव्नागवूँट्भ्यश्च ६। २०
किंचिदर्थे पहान् ४।१९३
कितावनस् ९ । १ । २०
कितिकिच्चान्तौ कर्मबहुत्वतः २। १। ५५
कुनु एककार्थे ४ । १९१
कृदुशब्दादल्पार्थे उनु ४ । ९७
कृतुशब्दस्योपधायाः प्रथमाबहुत्वे द्वितीयाद्येकवचनादिषु चाप्रसिद्धता २ । ३ । २५
कूँहो ऽन्त्यस्य सश्च २ । ३ । २९
कृतादेशव्यञ्जनान्तेभ्यश्च २।१।१४
कृतादेशानामूमात्रा आगमः २।१।१६
केन्च्शब्दो नित्यं बहुत्वे २ । ३ । ३०
केवलात्सुखार्थे ९ । २ । ५१
केवलो हतशब्दः क्वचिन्नैकत्वे २ । २ २४
कोजुमिम्युजुशब्दाभ्यां स् ४। १४४
कौतुके सर्वे प्रत्यया ह्यपराः ८ । २ । ३३
